# MudgalapurAna Khanda 9 Yogacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૯ યોગચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 9 Yogacharitam

File name : mudgalapurANam9.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

# મુદ્ગલપુરાણં ખણ્ડઃ ૯ યોગચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૯ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે નવમઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૯ અ. ૧ પાન ૧)

## ૯.૧ સ્વસંવેદ્યસ્વરૂપવર્ણનં નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શ્રીગણેશશારદાગુરુભ્યો નમઃ ।
શૌનક ઉવાચ ।
ધૂમ્રવર્ણાવતારસ્ય શ્રુત્વા ચરિતમુત્તમમ્ ।
નાનાખ્યાનસમાયુક્તં ન તૃપ્તોઽહં મહામતે ॥ ૧॥

અધુના વદ દક્ષસ્ય સંવાદં મુદ્ગલસ્ય ચ ।
પુનઃ કિં પૃષ્ટવાન્ દક્ષો મુદ્ગલાય મહર્ષયે ॥ ૨॥

સૂત ઉવાચ ।
શ્રુત્વા માહાત્મ્યમુખ્યં સ ધૂમ્રવર્ણાત્મકં પરમ્ ।
હૃષ્ટરોમા પ્રજાનાથઃ પુનઃ પપ્રચ્છ તં મુનિમ્ ॥ ૩॥

દક્ષ ઉવાચ ।
ધન્યોઽહં સર્વભાવૈશ્ચ ત્વત્તઃ શ્રુત્વા મહાદ્ભુતમ્ ।
ચરિતં ધૂમ્રવર્ણસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪॥

અધુના વદ વિપ્રેશ યોગં પૂર્ણપદપ્રદમ્ ।
અષ્ટૌ વિનાયકાઃ પ્રોક્તાસ્તેષાં યોગે સ્વરૂપકમ્ ॥ ૫॥

સ્વાનન્દઃ કીદૃશો યોગોઽયોગસ્તથૈવ કીદૃશઃ ।
સુશાન્તિદઃ પૂર્ણયોગસ્તેષાં રૂપં સુવિસ્તરાત્ ॥ ૬॥

સૂત ઉવાચ ।
એવં પૃષ્ટો મહાયોગી દક્ષેણ હર્ષસંયુતઃ ।
તં જગાદ શૃણુષ્વ ત્વં દ્વિજૈઃ શૌનક સૌખ્યદમ્ ॥ ૭॥

મુદ્ગલ ઉવાચ ।
સ્વાનન્દાત્ સ્વેચ્છયા દક્ષ બ્રહ્માણિ નિઃસૃતાનિ તુ ।
અસત્ સત્ સમનેતીતિ ચત્વારિ માયયા પ્રભોઃ ॥ ૮॥

એકૈકાશ્રિતભાવેન સૃષ્ટં તૈઃ સૌખ્યરૂપકમ્ ।
તતો બોધસ્તતઃ સોઽહં તતો બિન્દુર્મહામતે ॥ ૯॥

તતશ્ચતુર્વિધં વિશ્વં સ્થૂલં સૂક્ષ્મં સમાત્મકમ્ ।
નાદ એતાનિ બ્રહ્માણિ મીલિતાનિ પરસ્પરમ્ ॥ ૧૦॥

નિજસત્તાવિહીનાનિ જાતાનિ દૈવયોગતઃ ।
સ્વસ્વવ્યાપારજં ભોગં લેભિરે ન કદાચન ॥ ૧૧॥

તતસ્તૈશ્ચ તપસ્તપ્તં ઘોરં ચિત્તૈકભાવતઃ ।
યસ્મૈ કસ્મૈ નમશ્ચોક્ત્વા મૂલભૂતાય સર્વપૈઃ ॥ ૧૨॥

દિવ્યવર્ષસહસ્રેણ પ્રસન્નો ગણપોઽભવત્ ।
હૃદિસ્થં દર્શયામાસ મન્ત્રમેકાક્ષરં સ્વકમ્ ॥ ૧૩॥

તં દૃષ્ટ્વા હર્ષયુક્તાનિ જેપુર્મંત્રં તતઃ પરમ્ ।
ગતે વર્ષશતે પૂર્ણે દર્શયામાસ સ્વં વપુઃ ॥ ૧૪॥

નરકુઞ્જરરૂપં તુ દૃષ્ટ્વા વિસ્મિતમાનસૈઃ ।
સદ્યસ્તત્કૃપયા જ્ઞાનં પ્રાપ્તં તદ્રૂપબોધકમ્ ॥ ૧૫॥

જ્ઞાત્વા સ્વાનન્દનાથં તં બ્રહ્માણિ હર્ષતઃ પરમ્ ।
તમેવ હૃદયે ધ્યાત્વા જેપુર્મન્ત્રં સુસિદ્ધયે ॥ ૧૬॥

વર્ષેણૈકેન વિઘ્નેશઃ સુપ્રસન્નો બભૂવ હ ।
આયયૌ વરદાનાર્થં પુરસ્તેષાં પ્રતાપવાન્ ॥ ૧૭॥

તં દૃષ્ટ્વા તાનિ બ્રહ્માણિ તુષ્ટુવુઃ પૂજ્ય વિઘ્નપમ્ ।
બદ્ધ્વા કરપુટં દક્ષ સ્વસ્વસામર્થ્યસિદ્ધયે ॥ ૧૮॥

બ્રહ્માણ્યૂચુઃ ।
નમસ્તે પરેશાય વિઘ્નાધિપાય પરેષાં સદા સૌખ્યદાત્રે હિતાય ।

સ્વસંવેદ્યરૂપાય ચાનન્દદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૧૯॥

અનાથાય નાથાય સર્વાત્મનાં તે સદા મોહહીનાય નેતિધરાય ।
શિવાયાથ ત્રૈવિધ્યભાવપ્રદાત્રે નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૦॥

સમાયાથ માયાસ્વરૂપાય દ્વન્દ્વપ્રકાશાય સર્વાત્મકાયૈવ વિષ્ણો ।
મહાનન્દરૂપાય સર્વાતિગાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૧॥

સદા સત્યરૂપાય સર્વાત્મને તે વિકારૈર્વિહીનાય સૂર્યાય ભૂમ્ને ।
અનન્તાય ભેદાદિભિર્વર્જિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૨॥

અપારસ્વરૂપાય નાનામયાય વિહારેષુ સક્તાય પૂર્ણાત્મકાય ।
મહાશક્તયે શક્તિરૂપાય મોહિન્ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૩॥

(Page  ખં. ૯ અ. ૧ પાન ૨)
નિરોધસ્વરૂપાં સમાસ્થાય બુદ્ધિં નિજાનન્દભ્રાન્તિપ્રદાં સિદ્ધિરૂપામ્ ।
પ્રવિશ્યૈવ તુર્યેષુ બિમ્બાત્મકાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૪॥

તતઃ સાઙ્ખ્યરૂપં વિનિર્માય તુર્યૈસ્તદાકારરૂપાય વૈ બોધકાય ।
સદા સ્વાત્મનિષ્ઠાય સઙ્કલ્પહન્ત્રે નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૫॥

તતો બોધરૂપં વિનિર્માય બોધસ્વરૂપાય માયામયાકારધામ્ને ।
સદા ખેલકાયાથ નાનાપ્રચારિન્નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૬॥

તતો દેહિરૂપાય નિર્માય તં વૈ સદૈકપ્રબોધાય ભ્રાન્તેર્ધરાય ।
સ્વતો ભ્રાન્તિહીનાય સોઽહમ્પ્રદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૭॥

તતો બિન્દુમાત્રાય નિર્માય બિન્દું ચતુર્ધા ચતુષ્પાદરૂપેણ ખેલિન્ ।
અનન્તસ્વરૂપાય દેહપ્રચાર નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૮॥

તતો નાદરૂપં વિનિર્માય નાદસ્વરૂપાય તત્સ્થાય ચૈતન્યદાય ।
અજાયાથ ત્રૈવિધ્યદેહસ્થિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૨૯॥

સમાસ્થાય બાહ્યાન્તરે સંસ્થિતાય વિનિર્માય સૌષુપ્તરૂપં પરાત્મન્ ।
તદાકારરૂપેણ ચાનન્દદાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૦॥

સદા સ્વપ્નરૂપાય સર્વાન્તરસ્થાય સૂક્ષ્માય સત્ત્વાત્મને ખેલકાય ।
વિનિર્માય સૂક્ષ્મં ત્રિધા સંસ્થિતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૧॥

નમસ્તે પ્રભો સ્થૂલરૂપાય તત્ર વિનિર્માય જાગૃત્તદાકારરૂપ ।
સદા હ્યન્નભૂતાય બાહ્યાત્મકાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૨॥

ગણાંસ્તે ગણેશાત્મરૂપેણ સૃષ્ટાંસ્તવાંશાંશ્ચ તાન્ રક્ષ બ્રહ્મેશ દાસાન્ ।
સદા પાદપદ્મે રતાંસ્તે કુરુષ્વ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૩॥

ગજાકારતુણ્ડાય લમ્બોદરાય ચતુર્બાહવે શૂર્પકર્ણાય તુભ્યમ્ ।
ત્રિનેત્રાય પાશાઙ્કુશાદ્યૈર્યુતાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૪॥

નરાકારરૂપાય કણ્ઠાદધસ્તાત્તથા હ્યેકદન્તાય રક્તામ્બરાય ।
મહાઽઽખુધ્વજાયાઽઽખુવાહાય નિત્યં નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૫॥

અનન્તપ્રસૂતિશ્ચ તે વામભાગે મહાસિદ્ધિરૂપા તથા દક્ષિણાઙ્ગે ।
ધૃતે પૂર્ણમાયે પરે દેવદેવ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૬॥

સ્વસંવેદ્યનામ્નિ પુરે સંસ્થિતાય પ્રમોદાદિભિઃ સેવ્યમાનાય તુભ્યમ્ ।
તથેક્ષોઃ સમુદ્રે સુલીલાકરાય નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૭॥

સમાધિસ્વરૂપં ગણેશં સ્તુવીમઃ કથં બ્રહ્મણાં બ્રહ્મભૂતં મહાત્મન્ ।
તથાપિ સ્વબુદ્ધ્યા પ્રમાણૈઃ સ્તુતોઽસિ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૮॥

વયં ધન્યરૂપા ગણાધીશ તે વૈ સ્તવેનાઽથ પૂજાદિના દીનબન્ધો ।
નમસ્તે નમસ્તે પ્રસીદાઽઽશુ ભૂમન્ નિજાનન્દયોગાય ઢુણ્ઢે નમસ્તે ॥ ૩૯॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણાધીશં પ્રણેમુસ્તં પ્રજાપતે ।
બ્રહ્માણિ તાન્યથોવાચ હર્ષિતઃ સ ગજાનનઃ ॥ ૪૦॥

શ્રીગણેશ ઉવાચ ।
વરાન્ બ્રૂત હૃદિસ્થાન્ વૈ બ્રહ્માણિ તુષ્ટિમાગતઃ ।
દાસ્યામ્યનેન સ્તોત્રેણ તપસા દુર્લભાનપિ ॥ ૪૧॥

ભવત્કૃતમિદં સ્તોત્રં મમ સન્તોષકારકમ્ ।
ભવિષ્યતિ ન સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૨॥

(Page ખં. ૯ અ. ૨ પાન ૩)
યઃ પઠેત્ પાઠયેદ્વાઽપિ શ્રાવયેન્માનવોત્તમઃ ।
સ ભુક્ત્વા હ્યખિલાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૪૩॥

વિજયપ્રદમેતદ્ધિ પુત્રપૌત્રપ્રદં ભવેત્ ।
ધનધાન્યપશૂનાં તુ દાયકં પ્રભવિષ્યતિ ॥ ૪૪॥

અઙ્ગહીનજનાનાં તુ સ્વઙ્ગદં રોગનાશનમ્ ।
અલક્ષ્મીસઙ્કટસ્યૈવ દહનં પાઠકારિણામ્ ॥ ૪૫॥

વિદ્યા જ્ઞાનાદિકં સર્વં લભતેઽનેન નિશ્ચિતમ્ ।
ભુક્તિં મુક્તિં બ્રહ્મભૂયં પઠનાત્ શ્રવણાત્ કિલ ॥ ૪૬॥

ષટ્કર્મસાધને સિદ્ધં પરકૃત્યવિનાશનમ્ ।
રાજબન્ધહરં ચૈવ ભવિષ્યતિ સુસેવિનામ્ ॥ ૪૭॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાનિ યઃ ।
પઠતે સ લભેત્ સર્વમીપ્સિતં નાત્ર સંશયઃ ॥ ૪૮॥

એવં ગણપતેર્વાક્યં શ્રુત્વા બ્રહ્માણિ વિઘ્નપમ્ ।
પ્રણમ્ય હર્ષયુક્તાનિ જગુસ્તં ચ પ્રજાપતે ॥ ૪૯॥

બ્રહ્માણ્યૂચુઃ ।
વરદોઽસિ ગણાધીશ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ યયા મહામોહો નશ્યત્યત્ર ન સંશયઃ ॥ ૫૦॥

નિજવ્યાપારજં દેહિ બોધં કથય સર્વપ ।
કાર્યં તચ્ચ કરિષ્યામસ્ત્વદાજ્ઞાવશગાનિ ભોઃ ॥ ૫૧॥

સદાઽસ્મન્નિકટે નાથ તિષ્ઠ સ્વભક્તકારણાત્ ।
નિર્વિઘ્નં કુરુ સર્વત્ર ગજાનન નમોઽસ્તુ તે ॥ ૫૨॥

ત્વત્સમાનિ કુરુષ્વ ત્વમસ્માન્ પાદાશ્રિતાનિ તે ।
ભજતાં સર્વદાતૃણિ ત્વત્પ્રસાદાન્નમોઽસ્તુ તે ॥ ૫૩॥

યદ્યદિચ્છામહે નાથ તત્તત્તુ સફલં ભવેત્ ।
સત્યસઙ્કલ્પજં સૌખ્યં દેહિ નો ગણનાયક ॥ ૫૪॥

એવં તેષાં વચઃ શ્રુત્વા ભક્તિભાવેન તોષિતઃ ।
તથેતિ તાન્યથોક્ત્વાસાવન્તર્ધાનં ચકાર હ ॥ ૫૫॥

અષ્ટૌ વિનાયકાઃ પ્રોક્તાસ્તદ્રૂપેણ ગજાનનઃ ।
તેષાં સામીપ્યગો ભૂત્વાઽતિષ્ઠત્ સર્વાર્થસિદ્ધયે ॥ ૫૬॥

એતત્ સર્વં સમાખ્યાતં સ્વસંવેદ્યસ્ય ચેષ્ટિતમ્ ।
શ્રવણાત્ પઠનાન્નૃણાં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

નવમે ખણ્ડે યોગચરિતે સ્વસંવેદ્યસ્વરૂપવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૯.૧

## ૯.૨ અયોગચરિતકથનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અધુના શૃણુ દક્ષ ત્વં નિવૃત્તિરૂપધારિણઃ ।
ચરિતં ગણનાથસ્ય બ્રહ્મભૂતપદપ્રદમ્ ॥ ૧॥

સ્વાનન્દઃ સકલાધારો નાનાબ્રહ્મસુ સંસ્થિતઃ ।
જગત્સુ યોગભાવેન સંયોગેન તદાત્મકઃ ॥ ૨॥

સ નાનામાયયા યુક્તો નાનાભાવપરાયણઃ ।
ભાવાભાવાદિહીનત્વાચ્છોભતે નિત્યમઞ્જસા ॥ ૩॥

અનન્તકલ્પકાલે તુ ગતે સન્તોષમાદધે ।
નિવૃત્તિમિચ્છતિ પ્રાજ્ઞો માયાહીનત્વકારણાત્ ॥ ૪॥

જગદ્ભિર્બ્રહ્મભિઃ સાર્ધં ગણેશમભજત્તતઃ ।
સંયોગભાવનાશાર્થં સર્વતો ભક્તિસંયુતઃ ॥ ૫॥

એકાક્ષરવિધાનેન પૂજયામાસ તં વિભુમ્ ।
મન્ત્રં જજાપ સર્વેશો ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૬॥

દક્ષ ઉવાચ ।
સ્વસંવેદ્યાત્મકઃ પ્રોક્તો મન્ત્ર એકાક્ષરો મહાન્ ।
અયોગગણનાથસ્ય પ્રીતિદઃ સ કથં વદ ॥ ૭॥

મુદ્ગલ ઉવાચ ।
શબ્દશબ્દાર્થસંયુક્તો મન્ત્રો ગણપતેઃ સ્મૃતઃ ।
સ્વસંવેદ્યાત્મકઃ પ્રાજ્ઞૈઃ સર્વશાસ્ત્રેષુ સમ્મતઃ ॥ ૮॥

નામૈકદેશમાત્રત્વાત્ સ એવાયોગવાચકઃ ।
ન તત્ર શબ્દશબ્દાર્થૌ તયોર્યોગાદિકં કદા ॥ ૯॥

ગતે વર્ષશતે તત્ર પ્રસન્નો ગણનાયકઃ ।
આયયૌ તં વરાન્ દાતું નિજભક્તસુખપ્રદઃ ॥ ૧૦॥

દૃષ્ટ્વા ગજાનનં દક્ષ પ્રહૃષ્ટઃ સર્વસંયુતઃ ।

સ્વાનન્દઃ પ્રણનામાથ પુપૂજે ભક્તિસંયુતઃ ॥ ૧૧॥

દક્ષ ઉવાચ ।
સગુણો દેહ એતસ્ય નિર્ગુણં મસ્તકં પરમ્ ।
તયોરભેદભાવેઽયં ગજાનનો નિજાત્મકઃ ॥ ૧૨॥

અયોગે સગુણં નૈવ નિર્ગુણં નૈવ વર્તતે ।
તયોઃ સંયોગરૂપં યન્નૈવ યોગીન્દ્રસત્તમ ॥ ૧૩॥

કથં ગજાનનશ્ચાયમયોગે વાચકોઽભવત્ ।
છિન્ધિ મે સંશયં પૂર્ણં વચસા યોગભાવિના ॥ ૧૪॥

મુદ્ગલ ઉવાચ ।
સિદ્ધિર્દેહમયી માયા બભૂવે તસ્ય ભો વિધે ।
નાનાભ્રમં પરિત્યજ્ય લીના જાતા શરીરકે ॥ ૧૫॥

નાનાજ્ઞાનપ્રભાવં તુ ત્યક્ત્વા બુદ્ધિઃ શિરોઽભવત્ ।
ભ્રાન્તિધારકભાવં સા તલ્લીના સમ્બભૂવ હ ॥ ૧૬॥

તયોર્યોગે સ્વસંવેદ્યં બ્રહ્મ સંયોગધારકમ્ ।
ગજાનનાકૃતિસ્થં તદ્ બભૂવે લીનભાવતઃ ॥ ૧૭॥

સિદ્ધિબુદ્ધિવિહીનોઽયમયોગે વાચકોઽભવત્ ।
ગણેશો ગજવક્ત્રાદિચિહ્નયુક્તો ન સંશયઃ ॥ ૧૮॥

શબ્દશબ્દાર્થસંયોગૈસ્ત્રિભિર્હીનો ગજાનનઃ ।
અયોગે શોભતે દક્ષ માયાભ્યાં વર્જિતઃ સદા ॥ ૧૯॥

અથો શૃણુ ચરિત્રં ત્વં પ્રકૃતં શાન્તિદાયકમ્ ।
સ્વસંવેદ્યઃ પ્રતુષ્ટાવ ગણેશં હર્ષસંયુતઃ ॥ ૨૦॥

સસર્વસ્વાનન્દ ઉવાચ ।
અજં પુરાણં પરમવ્યયં તં નિવૃત્તિમાત્રં હ્યસમાધિસંસ્થમ્ ।
અયોગરૂપં ગણનાથમાદ્યં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૧॥

ન જારજં સ્વેદજમણ્ડજં ન ન ચોદ્ભિદં સ્થાવરજઙ્ગમં ન ।
અનાદિમધ્યાન્તમમોઘરૂપં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૨॥

ન ભૂસ્વરૂપં ન જલં પ્રકાશં ન વાયુરૂપં ન ખમેવ ઢુણ્ઢિમ્ ।
ન રાજસં સત્ત્વતમોયુતં ન નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૩॥

ન જાગૃતં સ્વપ્નગતં ન દેવં સૌષુપ્તકં નૈવ તુરીયસંસ્થમ્ ।
ન બિન્દુમાત્રં ન ચ સોઽહમેવ નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૪॥

ન બોધગં નૈવ વિબોધરૂપં ન મોહયુક્તં ન ચ મોહહીનમ્ ।
ન નિર્ગુણં નો સગુણં તથા તં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૫॥

ન કર્મરૂપં ન ચ જ્ઞાનરૂપં સમં ન ચાધીનતમં સદા ન ।
ન સ્વાત્મગં સર્વવિકારહીનં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૬॥

અસત્સ્વરૂપં ન ચ સત્સ્વરૂપં સમાનરૂપં ન ચ નેતિગં તમ્ ।
નિજાત્મરૂપં વિવિધેષુ નૈવ નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૭॥

(Page ખં. ૯ અ. ૨ પાન ૫)
અનન્તરૂપં ન તથૈકરૂપં સમં ન તુર્યં ન ચ પઞ્ચમં તમ્ ।
સદા ગણેશાકૃતિરૂપધારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૮॥

ન ચાગતં નૈવ ગતં ગણેશમયોગરૂપં પ્રવદન્તિ વેદાઃ ।
સદા નિવૃત્તિમયમાસમન્તાન્નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૨૯॥

વચોભિરારાત્ કથિતું કદાચિદયોગભાવાન્ મનસો ન શક્યમ્ ।
કદા તમપ્રાપ્ય વદામિ દેવં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૦॥

ન સિદ્ધિયુક્તં ન ચ બુદ્ધિયુક્તં ન માયિકં બ્રહ્મમયં પરેશમ્ ।
અનન્તપારં ગજવક્ત્રધારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૧॥

ત્રિનેત્રધારં ગજવક્ત્રયુક્તં ચતુર્ભુજં ચૈકરદં મહાન્તમ્ ।
મહોદરં વાહનહીનગં તં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૨॥

ન યોગનિષ્ઠં ન વિહારયુક્તં નિજાત્મનામ્નિ નગરે ન સંસ્થમ્ ।
નિજે સમુદ્રે ન વિહારકારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૩॥

ન ભક્તભક્તિપ્રિયમેવ દેવં તથાપિ યોગેન નિવૃત્તિદં તમ્ ।
અપારમાયામયપાશહારં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૪॥

અહં વિકારેણ વિમોહિતોઽતો ભ્રમન્ ગણેશાધિપતે મહાત્મન્ ।
જગત્સુ નાનાવિધબ્રહ્મસુ પ્રભો નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૫॥

સમાધિરૂપોઽહમચિન્ત્યભાવઃ સર્વાત્મકઃ સર્વવિવર્જિતોઽહમ્ ।
ભ્રમામિ માં રક્ષ નિવૃત્તિદાતર્નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૬॥

સુસિદ્ધિબુદ્ધિપ્રદ મોહયુક્તો વિભજ્ય નાનાવિધમાત્મરૂપમ્ ।

ચતુઃ પદાર્થેષુ ચરામિ ભ્રાન્ત્યા નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૭॥

સુખેલયુક્તોઽહમથો સુખેનેતરેણ યોગેન તદાત્મના વૈ ।
ન શાન્તિજં સૌખ્યમણુ હ્યવિન્દં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૮॥

અનન્તભાવેન વિમોહિતં માં રક્ષસ્વ તે પાદપ્રિયં ગણેશ ।
નિવૃત્તિકાં દેહિ પરાર્થભૂતાં નમામિ નિર્માયિકમપ્રમેયમ્ ॥ ૩૯॥

નમો ગણેશાય નિવૃત્તિધારિણે નમઃ પરેશાય સુખાબ્ધિવાસિને ।
નમશ્ચ હેરમ્બ મહોદરાય તે નમો નમો બ્રહ્મપતે સુશાન્તયે ॥ ૪૦॥

અયોગરૂપં ગણનાયકં તં પ્રવેશહીનાત્ કથમેવ ઢુણ્ઢે ।
દયાપરં સ્તૌમ્યધુના ચ તારય નમો નમો વિઘ્નપતે નમસ્તે ॥ ૪૧॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં સ્વાનન્દઃ પ્રણનામ તમ્ ।
ભક્ત્યા હર્ષેણ સંયુક્તસ્તમુવાચ ગજાનનઃ ॥ ૪૨॥

શ્રીગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગ સર્વં દાસ્યામિ ચેપ્સિતમ્ ।
માયામાયિકભેદૈસ્ત્વં દુઃખિતોઽસિ ન સંશયઃ ॥ ૪૩॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વશાન્તિપ્રદં ભવેત્ ।
ન માયાસમ્ભવં દુઃખં પ્રલભેત્ પાઠતો નરઃ ॥ ૪૪॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
અસાધ્યં સાધયેન્ મર્ત્યઃ શ્રવણેન નિજપ્રદમ્ ॥ ૪૫॥

એવં શ્રુત્વા ગણેશસ્ય વચનં સ્વસ્વરૂપકમ્ ।
જગાદ તં પ્રણમ્યાદૌ કૃત્વા કરપુટં વિધે ॥ ૪૬॥

સસર્વસ્વાનન્દ ઉવાચ ।
યદિ તુષ્ટોઽસિ વિઘ્નેશ તદા દેહિ નિવૃત્તિજમ્ ।
સુખં નાન્યં વરં ભ્રાન્તિં માયામેતાં નિવારય ॥ ૪૭॥

તથેતિ તમુવાચૈવ ગણેશોઽન્તર્દધે તતઃ ।
(Page  ખં. ૯ અ. ૩ પાન ૬)
સ્વાનન્દઃ ખિન્નભાવેન સ્વસ્થાને સંસ્થિતોઽભવત્ ॥ ૪૮॥

સસ્મારાયોગનાથં તં તતશ્ચિત્રં બભૂવ હ ।

વિશ્વાનિ બ્રહ્મમુખ્યાનિ સ્વાનન્દે લયમાયયુઃ ॥ ૪૯॥

તતઃ સ્વયં નિજાનન્દો નષ્ટસ્તત્ર બભૂવ હ ।
માયાહીનપ્રભાવેણાયોગસ્થઃ શુશુભે મુદા ॥ ૫૦॥

સંયોગમાયયા હીનો ન દદર્શ સ કિઞ્ચન ।
સ્વાત્માનં વાઽપરં મુખ્યં અયોગં ગણનાયકમ્ ॥ ૫૧॥

સર્વબન્ધવિનિર્મુક્તં બભૂવ સ્વસ્વરૂપકમ્ ।
એતત્ સર્વં સમાખ્યાતમયોગસ્ય ચરિત્રકમ્ ॥ ૫૨॥

અયોગે દક્ષ નૈવાસ્તિ ત્વમહં બ્રહ્મ શાશ્વતમ્ ।
ન ગણેશઃ સ્વસંવેદ્યં તેન નિર્વૃત્તિમાપ્નુયાત્ ॥ ૫૩॥

યઃ પઠેચ્છૃણુયાદ્વા યો હ્યયોગસ્ય ચરિત્રકમ્ ।
સ ભુક્ત્વા સકલાન્ ભોગાનન્તે નિર્વૃત્તિમાપ્નુયાત્ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે અયોગચરિતકથનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૯.૨

## ૯.૩ ગણેશસ્વરૂપવર્ણનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અધુના શ્ૃણુ દક્ષ ત્વં પૂર્ણશાન્તિપ્રદાયકમ્ ।
ચરિતં ગણનાથસ્ય નાનાયોગેશ્વરસ્ય યત્ ॥ ૧॥

અયોગો માયયા હીનઃ સદા બન્ધવિવર્જિતઃ ।
નિમગ્નશ્ચ બ્રહ્મસુખે તિષ્ઠ નિત્યં વિશેષતઃ ॥ ૨॥

સ્વાનન્દાખ્યં પરં બ્રહ્મ નષ્ટં ગાણેશયોગતઃ ।
પુનઃ સૃષ્ટં ગણેશેન પૂર્ણયોગસ્વરૂપિણા ॥ ૩॥

એવં પુનઃ પ્રનષ્ટં તત્ કાલેન બહુના વિધે ।
પુનઃ સૃષ્ટં પુનર્નષ્ટં કલ્પા એવં ગતા બહુ ॥ ૪॥

નિત્યં ત્વયોગસંસ્થઃ સ ગણેશો બ્રહ્મનાયકઃ ।
વિચારમકરોચ્ચિત્તે દૃષ્ટ્વા સ્વાનન્દજં ભ્રમમ્ ॥ ૫॥

અહો માયાપ્રભાવેણ બ્રહ્મ સ્વાનન્દધારકમ્ ।

નાનાભાવયુતં ભૂત્વા પુનર્ભવતિ નશ્યતિ ॥ ૬॥

માયાવિહીનભાવેનાઽહં સદા મોહવર્જિતઃ ।
અખણ્ડયોગસંયુક્તોઽતિષ્ઠં બ્રહ્મપરાયણઃ ॥ ૭॥

અવિનાશિપદં દત્તં મહ્યં કેન મહાત્મના ।
ન બ્રહ્મ નાશસંયુક્તમવિનાશિ ન વિદ્યતે ॥ ૮॥

દક્ષ ઉવાચ ।
અવિનાશિ સમાખ્યાતં દેહિરૂપં પુરા ત્વયા ।
સ્વત ઉત્થાનકેનૈવ સૃષ્ટં તદેવ નિશ્ચિતમ્ ॥ ૯॥

સ્વસંવેદ્યાત્ પરં બ્રહ્માયોગરૂપં પ્રકીર્તિતમ્ ।
તદેવ કેન યોગીશ વિનાશિ કથ્યતે ત્વયા ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
નાશાઽનાશાદિભેદાશ્ચ સ્વાનન્દાત્ સમ્ભવન્તિ ચ ।
ભેદાઽભેદાદિહીનં તત્ સ્વસંવેદ્યં પ્રકીર્તિતમ્ ॥ ૧૧॥

શિષ્યસ્ય બોધદાનાર્થં યોગિનસ્તં વદન્તિ ચ ।
કથિતું નૈવ શક્યત્વાત્ કિઞ્ચિદ્ભેદં પ્રજાપતે ॥ ૧૨॥

અયોગમવિનાશાખ્યં કથયામ્યધુના પરમ્ ।
(Page ખં. ૯ અ. ૩ પાન ૭)
નાશરૂપં સ્વસંવેદ્યં બોધાર્થં નાત્ર સંશયઃ ॥ ૧૩॥

અયોગશ્ચિન્તયાઽઽવિષ્ટો બભૂવે બન્ધહાનતઃ ।
નિવૃત્તિજં સુખં તુચ્છં માનયામાસ ચેતસા ॥ ૧૪॥

સદા માયાવિહીનત્વં મમાસ્ત્યત્ર ન સંશયઃ ।
માયાયુક્તવિહીનત્વં નૈવ બ્રહ્મણિ વિદ્યતે ॥ ૧૫॥

વિચાર્ય ખેદસંયુક્તો યોગમાર્ગપરોઽભવત્ ।
અયોગો હૃદિ સઞ્ચિન્ત્ય તપસ્તતાપ દારુણમ્ ॥ ૧૬॥

દશવર્ષૈર્ગણાધ્યક્ષઃ પ્રસન્નો હૃદિ સંસ્થિતઃ ।
દર્શયામાસ મન્ત્રં સ એકાક્ષરં સ્વકીયકમ્ ॥ ૧૭॥

દૃષ્ટ્વા યોગો જજાપાઽતિહર્ષિતો મન્ત્રમુત્તમમ્ ।
ધ્યાત્વા મન્ત્રસ્વરૂપસ્થં ગણેશં શાન્તિદાયકમ્ ॥ ૧૮॥

તતઃ સ્વલ્પેન કાલેન રૂપં ગણપતેઃ શુભમ્ ।
દદર્શ ગજવક્ત્રાદિ ચિહ્નયુક્તં મહાપ્રભુઃ ॥ ૧૯॥

તતોઽતિવિસ્મિતો ભૂત્વા વિચારમકરોત્ હૃદિ ।
કોઽયં ગજાનનો દેવઃ સ્ત્રીભ્યાં સંશોભતે હૃદિ ॥ ૨૦॥

ગણેશકૃપયા જ્ઞાનં બભૂવ તસ્ય શાશ્વતમ્ ।
તેન સર્વમયોગેન જ્ઞાતં વિઘ્નેશચેષ્ટિતમ્ ॥ ૨૧॥

તતોઽતિહર્ષિતો ભૂત્વા ધ્યાત્વા દેવં ગજાનનમ્ ।
મન્ત્રં જજાપ યોગજ્ઞઃ શાન્તિપ્રાપ્ત્યર્થમાદરાત્ ॥ ૨૨॥

સ્વયં સ્વલ્પેન કાલેન પુરો યયૌ ગજાનનઃ ।
વરદો ભક્તવાત્સલ્યાન્ મહાભક્તસ્ય ભો વિધે ॥ ૨૩॥

દક્ષ ઉવાચ ।
આશ્ચર્યં વિપ્ર વદસિ જ્ઞાયતે ન મયા પરમ્ ।
રહસ્યં તેઽદ્ય વાક્યસ્ય યોગગ્રથિતકસ્ય ચ ॥ ૨૪॥

અષ્ટૌ વિનાયકાઃ પ્રોક્તાસ્તે સર્વે ગજવક્ત્રિણઃ ।
એકદન્તાદિચિહ્નૈશ્ચ સંયુક્તા ગણપાઃ કિલ ॥ ૨૫॥

સંયોગસ્થં ગણેશાનં ભજતેઽનન્યમાનસાઃ ।
તેષાં હૃદિ ગણેશાનઃ પ્રકટો જાયતે યદા ॥ ૨૬॥

તદા તે વિસ્મિતા ભૂત્વા ન જાનન્તિ સ્વરૂપકમ્ ।
નિત્યં ગજાનનાઃ પ્રાજ્ઞા ગજાનનં કથં મુને ॥ ૨૭॥

એકાક્ષરરહસ્યં તે ન જાનન્તિ કથં પ્રભો ।
એકાક્ષરસ્ય ભાવેન સંસ્થિતા નિત્યમઞ્જસા ॥ ૨૮॥

તથા સંયોગરૂપસ્થો ગણેશો ગણનાયકમ્ ।
મન્ત્રયુક્તં ન જાનાતિ મન્ત્રાકૃતિધરઃ કથમ્ ॥ ૨૯॥

અયોગગણનાથોઽયં ગજાનનાકૃતિં ધરન્ ।
સમન્ત્રો મન્ત્રયુક્તં તં ન જાનાતિ ગણેશ્વરમ્ ॥ ૩૦॥

કીદૃશો ગણનાથસ્તુ પૂર્ણયોગપ્રવાચકઃ ।
યં ન જાનન્તિ વિઘ્નેશાસ્તદાકૃતિધરા અપિ ॥ ૩૧॥

સંયોગે ગણનાથોઽપિ સિદ્ધિબુદ્ધિસમન્વિતઃ ।

અયોગે સિદ્ધિબુદ્ધિભ્યાં હીન એવ સ વર્ણ્યતે ॥ ૩૨॥

પૂર્ણયોગે ગણેશાનઃ સંયોગાયોગવર્જિતઃ ।
માયાભ્યાં સંયુતઃ પ્રોક્તઃ કથં વદ રહસ્યકમ્ ॥ ૩૩॥

મુદ્ગલ ઉવાચ ।
સમ્યક્ પૃષ્ટં ત્વયા દક્ષ રહસ્યં પરમાદ્ભુતમ્ ।
યોગિનાં સુખદં પૂર્ણં શાન્તિદં ભાવિતાત્મનામ્ ॥ ૩૪॥

એકાગ્રચિત્તભાવેન શ ૃણુ તસ્ય ચરિત્રકમ્ ।
અન્યથા ભ્રાન્તિસંયુક્તો ભવિષ્યસિ નિરન્તરમ્ ॥ ૩૫॥

યથા વિશ્વમિદં નિત્યં બ્રહ્માકારં પ્રવર્તતે ।
તથાપિ બ્રહ્મરૂપં તન્ન જાનાતિ હૃદિ સ્થિતમ્ ॥ ૩૬॥

નામરૂપવિહીનત્વાન્ મન્ત્રસ્તસ્ય ન વિદ્યતે ।
તપસા યુક્તભાવેન પ્રણવં પશ્યતિ પ્રભુમ્ ॥ ૩૭॥

સર્વાકારં મહાબીજં પ્રણવાકૃતિરૂપિણમ્ ।
દૃષ્ટ્વા વિસ્મયભાવેન વિચારમકરોત્ હૃદિ ॥ ૩૮॥

(Page ખં. ૯ અ. ૩ પાન ૮)
તપસા યોગભાવેન ચતુષ્પાદં જગન્મયમ્ ।
જાનાતિ કૃપયા તસ્ય મન્ત્રરાજં જગદ્યથા ॥ ૩૯॥

તતો યોગપ્રભાવેણ પ્રણવાર્થસ્વરૂપિણમ્ ।
દેવં સર્વાત્મભાવસ્થં પશ્યતિ વિશ્વમઞ્જસા ॥ ૪૦॥

દૃષ્ટ્વાઽતિવિસ્મિતં ભૂત્વા વિચારયતિ ચેતસિ ।
તપસા યોગભાવેન તં જાનાતિ મહાપ્રભુમ્ ॥ ૪૧॥

તતો યોગપ્રભાવેણ શાન્તિસ્થં ગણનાયકમ્ ।
પશ્યતિ વક્રતુણ્ડાખ્યં બ્રહ્મ સ્વાનન્દગં પરમ્ ॥ ૪૨॥

પ્રણવો દેહરૂપશ્ચેત્ પ્રણવાર્થો ગજાકૃતિઃ ।
શિરસ્તયોશ્ચ સંયોગે ગણેશો યોગરૂપધૃક્ ॥ ૪૩॥

યોગાકારં મહદ્રૂપં દૃષ્ટ્વા વિસ્મિતમાનસમ્ ।
વિશ્વં ભક્તિસમાયુક્તં ભજનાર્થં મનો દધે ॥ ૪૪॥

એતાદૃશં સુશાન્તિસ્થં બ્રહ્મ દેહધરં કથમ્ ।

ભવતિ તસ્ય સેવા વૈ કુર્વે નિત્યં મહાત્મનઃ ॥ ૪૫॥

હૃદિ સ્થિતં તસ્ય ભાવં જ્ઞાત્વા રૂપધરઃ પ્રભુઃ ।
ગજાનનો બભૂવાપિ પુનર્દૃષ્ટ્વાઽતિવિસ્મિતમ્ ॥ ૪૬॥

તં પશ્યતિ પ્રજાનાથ કોઽયં ભિન્નસ્વરૂપધૃક્ ।
તસ્તસ્તં તસ્ય જાનાતિ કૃપયા યોગસેવયા ॥ ૪૭॥

ગણેશાનં મૂર્તિધરં ભજતેઽનન્યભાવતઃ ।
મન્ત્રાદિના રહસ્યેન જાનીહિ વિશ્વમાદરાત્ ॥ ૪૮॥

તથા ગણેશ્વરાઃ પ્રોક્તા અષ્ટૌ યોગપ્રવાચકાઃ ।
તેષાં હૃદિ સ્થિતં બ્રહ્મ સ્વસંવેદ્યં ન સંશયઃ ॥ ૪૯॥

મહૈશ્વર્યપ્રસંયુક્તા ન જાનન્તિ કદાચન ।
વયં બ્રહ્મસ્વરૂપાશ્ચ પ્રત્યેકં માનયન્તિ તે ॥ ૫૦॥

ન મત્તઃ પરમં કિઞ્ચિજ્જ્ઞાત્વા મોહસમન્વિતાઃ ।
વિશ્વાત્મનિ ચ વિશ્વસ્મિન્ ક્રીડાયુક્તા બભૂવિરે ॥ ૫૧॥

કૃત્વા નાનાવિધં ખેલં નાનાકલ્પપરાયણાઃ ।
એવં બહૌ ગતે કાલે શાન્તિમિચ્છન્તિ શાશ્વતીમ્ ॥ ૫૨॥

તતઃ ક્રીડાં વિહાયૈવ સ્વમહિમ્ન્યભવન્ સ્થિતાઃ ।
તથાપિ તે પુનર્વિશ્વપ્રવશાઃ સસૃજુઃ સ્વયમ્ ॥ ૫૩॥

તતસ્તે ખેદસંયુક્તા વિચારં કુર્વતે પરમ્ ।
કેન સ્મ પ્રેરિતા વિશ્વં સૃજામો વિવિધં વયમ્ ॥ ૫૪॥

અતઃ સ્વાધીનતા નો ન વિદ્યતેઽપિ કદાચન ।
વયં ન બ્રહ્મરૂપાશ્ચ માયામોહયુતાઃ સદા ॥ ૫૫॥

એવં મનસિ સન્ધાર્ય તપશ્ચેરુઃ સમાધિદમ્ ।
તપસા યોગસંયુક્તા બભૂવુર્નાત્ર સંશયઃ ॥ ૫૬॥

ક્રમેણ ગણપાઃ સર્વે પૂર્ણયોગસ્વરૂપિણિ ।
લયં યયુઃ સુશાન્તિસ્થાઃ શાન્તરૂપે પ્રજાપતે ॥ ૫૭॥

તત્ર વિધિં પ્રવક્ષ્યામિ શ◌ૃણુ સંશયનાશકમ્ ।
યોગોઽષ્ટધા સમાખ્યાતસ્તત્ સ્વરૂપં સુયોગદમ્ ॥ ૫૮॥

શમો દમ આસનં ચ પ્રાણાયામશ્ચતુર્થકઃ ।
પ્રત્યાહારો ધારણા વૈ ધ્યાનં સમાધિરષ્ટમઃ ॥ ૫૯॥

સ્વધર્મયુક્તભાવેન મનો નિયમ્ય યત્નતઃ ।
યતતે બ્રહ્મપ્રાપ્ત્યર્થં સ શમઃ પરિકીર્તિતઃ ॥ ૬૦॥

સ્વધર્મસ્થિતિમાસ્થાય નિયમાદિસ્વભાવતઃ ।
દમેદ્દેહં સુશાન્ત્યર્થં દમસ્તેન પ્રકથ્યતે ॥ ૬૧॥

સ્વસ્તિકાદીનિ ભો દક્ષ આસનાનિ વિશેષતઃ ।
સાધયિત્વા સમાતિષ્ઠેદ્યોગાર્થમાસનં સ્મૃતમ્ ॥ ૬૨॥

પ્રાણાયામં તતોઽભ્યસ્ય લબ્ધ્વાદિકં ક્રમેણ ચ ।
યોગાર્થં સાધયેદ્વાયું સ પ્રાણાયામ ઉચ્યતે ॥ ૬૩॥

નાનાવિષયભોગાર્થં ગચ્છન્તીન્દ્રિયકાણિ તુ ।
તેભ્યસ્તાનિ સમાગૃહ્ય યોગયુક્તાનિ કારયેત્ ॥ ૬૪॥

(Page ખં. ૯ અ. ૩ પાન ૯)
સ મનાંસિ સુશાન્ત્યર્થં હૃત્વા હૃત્વા પુનઃ પુનઃ ।
ઇન્દ્રિયાણિ નરઃ કુર્યાત્ પ્રત્યાહારઃ સ વૈ સ્મૃતઃ ॥ ૬૫॥

મહાવાક્યાદિભિઃ પ્રોક્તં બ્રહ્મ શબ્દાર્થભાવતઃ ।
સન્ધાર્ય સ શ્રમેદ્દક્ષ ધારણા સા પ્રકીર્તિતા ॥ ૬૬॥

હૃદિ બ્રહ્માવબોધશ્ચ જાયતે ઐક્યભાવતઃ ।
સ્વસ્ય તેન સમાખ્યાતં ધ્યાનં બ્રહ્મ સુખપ્રદમ્ ॥ ૬૭॥

તતો બ્રહ્મણિ સોઽપ્યેવં લીનઃ સઞ્જાયતે પરે ।
ન બ્રહ્મ ન સ્વયં તત્ર સમાધિઃ પરિકીર્તિતઃ ॥ ૬૮॥

ઇદં યોગાષ્ટકં પ્રોક્તં યોગપ્રાપ્ત્યર્થમાદરાત્ ।
સેવિનાં બ્રહ્મદં પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૬૯॥

તત્ર માયાયુતા જીવા ભિન્નદેહધરા મતાઃ ।
તેષામષ્ટકમેવં તદ્વર્તતે સાધનાત્મકમ્ ॥ ૭૦॥

બ્રહ્માકારાણિ પ્રોક્તાનિ તત્ત્વાનિ વિવિધાનિ તુ ।
વિશ્વરૂપાણિ સર્વાણિ બ્રહ્માણ્યન્નમુખાનિ ચ ॥ ૭૧॥

તેષાં યોગઃ સમાખ્યાતસ્ત્રિવિધો નાઽત્ર સંશયઃ ।

દેહાદિભાવશૂન્યત્વાત્ તચ્છૃણુષ્વ સુખપ્રદમ્ ॥ ૭૨॥

ધારણાધ્યાનકે દક્ષ સમાધિઃ પરિકીર્તિતઃ ।
ત્રિભિર્યોગં સમારાધ્ય શાન્તિગાનિ ભવન્તિ તુ ॥ ૭૩॥

સ્વસ્વબ્રહ્મણિ યે સન્તિ ભોગા બ્રહ્મસુખાત્મકાઃ ।
તાંસ્ત્યક્ત્વા ધારયેદ્બ્રહ્મ તપસ્તદેવ કથ્યતે ॥ ૭૪॥

પૂર્ણશાન્ત્યર્થમત્યન્તં બ્રહ્માણિ સમ્ભવન્તિ ચેત્ ।
ત્યક્ત્વા ભોગાંસ્તપસ્તેષાં જ્ઞાતવ્યં વિબુધૈઃ પરમ્ ॥ ૭૫॥

મનોવાણીવિહીનં ન મનોવાણીમયં ન ચ ।
બ્રહ્મ વેદેષુ વિખ્યાતં તદેવ ગણનાયકઃ ॥ ૭૬॥

ન તત્ર સગુણં દક્ષ નિર્ગુણં નૈવ વર્તતે ।
ગણેશે પશ્ય વેદેષુ યોગરૂપસ્તતઃ સ્મૃતઃ ॥ ૭૭॥

બ્રહ્માણિ ખેદયુક્તાનિ પરાધીનતયા યદા ।
તપશ્ચેરુસ્તદા તાનિ વિચાર્ય બ્રહ્મપ્રાપ્તયે ॥ ૭૮॥

અતિતપોબલેનૈવ હૃદિ સ્ફૂર્તિઃ પ્રજાયતે ।
યોગસ્ય મન્ત્રરાજં તં જાનીહિ બ્રહ્મણાં વિધે ॥ ૭૯॥

તતો હર્ષયુતાન્યેવાનુભવં સસ્મરુસ્તદા ।
જપસ્તદેવ તેષાં વૈ બ્રહ્મણાં ભવતિ પ્રભો ॥ ૮૦॥

હૃદિ સંસ્થં તતો યોગં દદૃશુસ્તાનિ સર્વદા ।
તદેવ ગણરાજસ્ય રૂપં તત્ર પ્રકીર્તિતમ્ ॥ ૮૧॥

તતસ્તલ્લીનભાવેન તિષ્ઠન્તિ બ્રહ્મકાનિ વૈ ।
ગણેશસ્ય કૃપા જ્ઞેયા તત્ર સા કથ્યતે બુધૈઃ ॥ ૮૨॥

યોગ એતાદૃશં બ્રહ્મ યદિ દેહયુતં ભવેત્ ।
તદા તં પ્રભજિષ્યામો નિત્યમિચ્છન્તિ તાનિ તુ ॥ ૮૩॥

બ્રહ્મદેહધરઃ સોઽપિ બભૂવ ભક્તિમોહિતઃ ।
આયયૌ વરદાનાર્થં તેષામગ્રે ગજાનનઃ ॥ ૮૪॥

બ્રહ્માકારાણિ ચિહ્નાનિ કથિતાનિ પુરા મયા ।
ગણેશસ્ય સ્વરૂપે તુ તાન્યપશ્યંશ્ચ તાદૃશમ્ ॥ ૮૫॥

તતસ્તાનિ પ્રણેમુસ્તં પુપૂજુસ્તં ચ નિત્યશઃ ।
અન્તે યોગમયાન્યેવ બભૂવુર્નાત્ર સંશયઃ ॥ ૮૬॥

એતત્સર્વં સમાખ્યાતં બ્રહ્મણાં ચરિતં મયા ।
તપોયોગાદિકાચારમન્યચ્છૃણુ પ્રજાપતે ॥ ૮૭॥

વક્રતુણ્ડો ગણેશાનો યદિ ખેદસમન્વિતઃ ।
પરાધીનતયા દક્ષ શાન્તિયોગપરોઽભવત્ ॥ ૮૮॥

તદા તપોયુતઃ સોઽપિ ત્રેધા યોગાર્થમાદરાત્ ।
શ્રામ્યેત્તેન હૃદિસ્થં તં લોકયેદેકદન્તકમ્ ॥ ૮૯॥

દેહેષુ બ્રહ્મભાવેન વક્રતુણ્ડઃ સ્થિતોઽભવત્ ।
તસ્માદ્દેહી સ્થિતઃ શ્રેષ્ઠો ભિન્નાકારઃ પ્રકીર્તિતઃ ॥ ૯૦॥

અતોઽયં વક્રતુણ્ડસ્તં ગજાનનં પરાત્પરમ્ ।
એકદન્તં ન જાનાતિ તત્ર ભેદં વદામ્યહમ્ ॥ ૯૧॥

ત્રિગુણાકારદેહશ્ચ તુરીયં મસ્તકં મતમ્ ।
વક્રતુણ્ડસ્તયોર્યોગે બિન્દુબ્રહ્મપ્રવાચકઃ ॥ ૯૨॥

ચતુર્વિધેષુ દેહેષુ મોહયુક્તં ચ યત્ સ્મૃતમ્ ।
સદા ભેદવિહીનં તજ્જીવસંજ્ઞં પ્રકથ્યતે ॥ ૯૩॥

મોહહીનં સદા સાક્ષિરૂપં પરાત્મધારકમ્ ।
એકદન્તસ્તયોર્યોગે સોઽહમ્માત્રાત્મકઃ સ્મૃતઃ ॥ ૯૪॥

જીવો દેહસ્વરૂપસ્થઃ પરમાત્મા શિરઃ સ્મૃતમ્ ।
ગજાકારં ન સન્દેહ એકદન્તસ્ય નિત્યદા ॥ ૯૫॥

જીવાત્મા પરમાત્માનૌ દૃષ્ટ્વા ભેદવિવર્જિતૌ ।
વિસ્મિતઃ સ ભવેત્તત્ર વક્રતુણ્ડો ગજાનનઃ ॥ ૯૬॥

નાનાભેદસમાયુક્તો વક્રતુણ્ડો મયોદિતમ્ ।
ભેદહીનમેકદન્તં દૃષ્ટ્વા પપ્રચ્છ તં પુનઃ ॥ ૯૭॥

હૃદિસ્થં સોઽહમાદૌ યદ્બ્રહ્માકારં પ્રકથ્યતે ।
બિન્દોસ્તદેકદન્તાખ્યં ન દેહાદિયુતં કદા ॥ ૯૮॥

સેવાર્થં વક્રતુણ્ડેન પ્રાર્થિતં હૃદિ સઙ્ગતમ્ ।
બ્રહ્મ તદેવ ભો દક્ષ એકદન્તો બભૂવ હ ॥ ૯૯॥

યથા જગદિદં સર્વં બ્રહ્માકારં પ્રકીર્તિતમ્ ।
તથા જ્ઞેયં વક્રતુણ્ડોઽપિ હ્યેકદન્તસ્વરૂપધૃક્ ॥ ૧૦૦॥

સગુણં નરસંજ્ઞસ્થં નિર્ગુણં ગજવાચકમ્ ।
તયોર્યોગે પરં બ્રહ્મ ગજાનનઃ પ્રકથ્યતે ॥ ૧૦૧॥

સેવાર્થં પ્રાર્થિતં સર્વૈસ્તદેવ દેહવાનભૂત્ ।
ગણેશો બ્રહ્મરૂપાખ્યો નાનાબ્રહ્મસુ સંસ્થિતઃ ॥ ૧૦૨॥

અતો ગણેશ્વરં દક્ષ ન જાનાતિ ગણેશ્વરઃ ।
નાનામોહસમાયુક્તો ભ્રાન્તિભાવાત્ સુશાન્તિદમ્ ॥ ૧૦૩॥

સ્વત ઉત્થાન ભાવે તુ દેહો બિન્દુમયઃ સ્મૃતઃ ।
સોઽહં શિરો ગજાકારં તયોર્યોગે મહોદરઃ ॥ ૧૦૪॥

એવં નાનાવિભેદૈશ્ચ નાનાબ્રહ્મપરાયણઃ ।
ગણેશ્વરઃ સ્થિતસ્તેષુ ગજાનનાદિચિહ્નિતઃ ॥ ૧૦૫॥

સંયોગે ગણનાથસ્ય સ્વત ઉત્થાનકં વપુઃ ।
ઉત્થાનં પરતસ્તસ્ય મસ્તકં નાત્ર સંશયઃ ॥ ૧૦૬॥

અયોગે બુદ્ધિહીનં તુ મસ્તકં સિદ્ધિવર્જિતમ્ ।
વપુસ્તયોર્ન સંયોગે ગણેશઃ પરિકીર્તિતઃ ॥ ૧૦૭॥

પૂર્ણયોગે શરીરં તુ મતં સંયોગવાચકમ્ ।
અયોગવાચકં તસ્ય મસ્તકં તુ ગજાકૃતિ ॥ ૧૦૮॥

અવિનાશાર્થસંયુક્તો ગજશબ્દઃ પ્રકીર્તિતઃ ।
અયોગાન્ન પરં બ્રહ્માવિનાશાખ્યં પ્રકથ્યતે ॥ ૧૦૯॥

સંયોગાયોગભાવાખ્યા ભ્રાન્તિઃ સર્વત્ર પઠ્યતે ।
નિરોધચિત્તાગ્ર દક્ષ સા સિદ્ધિઃ પરિકીર્તિતા ॥ ૧૧૦॥

સંયોગાયોગભાવસ્થા બુદ્ધિર્ભ્રાન્તિધરા મતા ।
તયોઃ સ્વામી ગણાધ્યક્ષઃ પૂર્ણયોગપ્રવાચકઃ ॥ ૧૧૧॥

અહં ગણેશરૂપશ્ચેત્ સંયોગાયોગકૌ મમ ।
કુતો માયાપ્રભાવાખ્યૌ તેન શાન્તિં લભેન્નરઃ ॥ ૧૧૨॥

સર્વત્રાઽભેદભાવેન સંયોગાત્મા ગજાનનઃ ।

તિષ્ઠત્યત્ર ન સન્દેહો યુતઃ સંયોગમાયયા ॥ ૧૧૩॥

સર્વત્રાઽભેદહીનશ્ચ યોગરૂપો ગજાનનઃ ।
અયોગમાયયા યુક્તસ્તિષ્ઠતિ વ્યતિરેકતઃ ॥ ૧૧૪॥

યદિ સર્વાત્મકં યોગં વદામિ ગણનાયકમ્ ।
નાનાબ્રહ્મસુસંસ્થં તમન્વયાખ્યં તદા વિદુઃ ॥ ૧૧૫॥

નાગતં ન ગતં યોગં કદાચિચ્ચેદ્ગજાનનમ્ ।
નાનાબ્રહ્મસુ મુક્તં તં વ્યતિરેકાત્મકં જગુઃ ॥ ૧૧૬॥

(Page ખં. ૯ અ. ૪ પાન ૧૧)
અતશ્ચિત્તલયેનૈવાઽહં ગણેશો ન સંશયઃ ।
ચિત્તપઞ્ચકમુત્સૃજ્ય પૂર્ણયોગમવાપ્નુયાત્ ॥ ૧૧૭॥

તત્ર સમાધિજં સૌખ્યં વદામિ યુક્તિભાવતઃ ।
ગણેશેઽહં તદાકારો ભવામિ યદિ યોગતઃ ॥ ૧૧૮॥

તદા સંયોગજઃ પ્રોક્તોઽનુભવો યોગિનાં હૃદિ ।
યદાઽહં ગણનાથશ્ચેન્નાગતો ન ગતઃ કદા ॥ ૧૧૯॥

તદા હ્યયોગશઃ પ્રોક્તોઽનુભવઃ શાન્તિદાયકઃ ।
અતોઽયોગમયો યોગઃ કથં તત્ર પ્રવર્તતે ॥ ૧૨૦॥

ચિત્તં નાનાવિધં દક્ષ સંયોગાયોગધારકમ્ ।
યોગે યોગાત્મકોઽહં ચ તદા શાન્તિઃ પ્રલભ્યતે ॥ ૧૨૧॥

શાન્તીનાં શાન્તિરૂપા સા યોગશાન્તિઃ પ્રજાપતે ।
તસ્માત્ પરં વિદ્યતે ન બ્રહ્મ યોગાત્ સુનિશ્ચિતમ્ ॥ ૧૨૨॥

અતોઽયં ગણનાથસ્તુ બ્રહ્મણસ્પતિરુચ્યતે ।
સંયોગાઽયોગકાદીનાં બ્રહ્મણાં પાતૃભાવતઃ ॥ ૧૨૩॥

એતત્ સર્વં સમાખ્યાતં રહસ્યં પરમાદ્ભુતમ્ ।
ગજાનનસ્ય તે દક્ષ પ્રકૃતં શ‌ૃણુ સામ્પ્રતમ્ ॥ ૧૨૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિત્રે ગણેશસ્વરૂપવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૯.૩

## ૯.૪ પૂર્ણયોગચરિતવર્ણનં નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

તપસા ભક્તિભાવેનાગતં દૃષ્ટ્વા ગજાનનમ્ ।
અયોગો હર્ષિતોઽત્યન્તમુત્થાય પ્રણનામ તમ્ ॥ ૧॥

તતઃ પૂજ્ય ગણેશાનં પ્રભું નાનોપચારકૈઃ ।
પુનઃ પ્રણમ્ય વિઘ્નેશં તુષ્ટાવ કરસમ્પુટઃ ॥ ૨॥

અયોગ ઉવાચ ।
શાન્તિસ્વરૂપાય સુશાન્તિદાય વાણીમનોહીનતમાય ઢુણ્ઢે ।
વાણીમનોયુક્તવિચારિણે વૈ યોગાય યોગાધિપતે નમસ્તે ॥ ૩॥

વાણીમનોયુક્તમયં વદામિ નો વિશ્વરૂપોઽસિ કથં સ્તવીમિ ।
નિત્યં ગણેશાય નમો મહાત્મન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૪॥

વાણીમનોહીનમયં કથં ત્વાં બ્રુવેઽથ સંયોગમયં કદા ચ ।
નો યોગરૂપં ત્વથ તે નમો વૈ યોગાય યોગાધિપતે નમસ્તે ॥ ૫॥

ત્વત્તઃ પ્રસૂતાનિ મહાનુભાવ બ્રહ્માણિ વિશ્વાનિ પરાણિ ભૂયઃ ।
ત્વય્યેવ લીનાનિ હ્યભિન્નભાવાદ્યોગાય યોગાધિપતે નમસ્તે ॥ ૬॥

નિત્યં હ્યયોગાય નિવૃત્તિદાય માયાવિહીનાય ગણાધિપાય ।
વાણીમનોહીનતયા સુલભ્ય યોગાય યોગાધિપતે નમસ્તે ॥ ૭॥

સ્વાનન્દરૂપાય સુશાન્તિદાય સિદ્ધ્યા ચ બુદ્ધ્યા સહ ખેલકાય ।
વાણીમનોહીન નિજાત્મલભ્ય યોગાય યોગાધિપતે નમસ્તે ॥ ૮॥

અવ્યક્તરૂપાય ચ સાહજાય મોહેન હીનાય સદા શિવાય ।
ત્રૈવિધ્યનાથાય ચ નેતિ કર્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૯॥

સામાન્યરૂપાય ત્રયીમયાય દ્વન્દ્વપ્રકાશાય ચ વિષ્ણવે તે ।
આનન્દનાથાય સુખેલકાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૦॥

આત્મસ્વરૂપાય સદાઽમૃતસ્થયોગેન સંલભ્યતમાય ભાનો ।
ભેદૈર્વિહીનાય ચ જીવનાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૧॥

નાનાપ્રભેદેષુ ચ તન્મયાય સર્વસ્વરૂપાય ચ શક્તયે તે ।
આનન્ત્યભાવૈશ્ચ સુમોહદાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૨॥

સાક્ષિસ્વરૂપાય ચ સાઙ્ખ્યયોગલભ્યસ્વરૂપાય સદાત્મસંસ્થ ।
બોધેન હીનાય પરાત્પરાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૩॥

બોધસ્વરૂપાય સઙ્ખ્યાવિહારકર્ત્રે સદા પાલકભાવધારિન્ ।
ત્રૈવિધ્યનાથાય મહોદરાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૪॥

સોહંસ્વરૂપાય ચ ચિન્મયાય મોહેન યુક્તાય ચ હીનકાય ।
દેહિસ્વરૂપેણ વિહારકર્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૧૫॥

બિન્દુપ્રચુરાય ચતુષ્પદાય ચતુર્વિધેષુ પ્રભવાય તુભ્યમ્ ।
આનન્ત્યતત્ત્વાય ચ દેહભોક્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૧૬॥

તુર્યાત્મદેહાય લયાત્મકાય કાલસ્વરૂપાય ગણેશ્વરાય ।
નાદાત્મકાયાઽથ ત્રિદેહગાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૭॥

આનન્દકોશાત્મકસંસ્થિતાય પ્રાજ્ઞાય સૌષુપ્તમયાય તુભ્યમ્ ।
નિત્યેશ્વરાયૈવ તયોઃ પ્રચારિન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૧૮॥

સર્વાન્તરસ્થાય ચ સૂક્ષ્મકાય સ્વપ્નપ્રચુરાય ચ તૈજસાય ।
હિરણ્યગર્ભાય તયોઃ પ્રચારિન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૧૯॥

બાહ્યસ્થિતાયાન્નમયાય વિશ્વવૈશ્વાનરાયૈવ તયોઃ પ્રચારિન્ ।
સ્થૂલસ્વરૂપાય ચ જાગૃદાસ્થ યોગાય યોગાધિપતે નમસ્તે ॥ ૨૦॥

વિશ્વસ્ય દ્વૈવિધ્યમયાય તુભ્યં નાનાણ્ડરૂપાય ચ ખેલકાય ।
શક્ત્તે ચ ધાત્રે હરયે શિવાય યોગાય યોગાધિપતે નમસ્તે ॥ ૨૧॥

એતે ગણેશાધિપતે કલાંશા વિઘ્નેશ્વરાસ્તે ગણનાયકાય ।
ન ત્વં સદૈતૈઃ સહિતો હિ તુભ્યં યોગાય યોગાધિપતે નમસ્તે ॥ ૨૨॥

સ્તુમઃ કથં નાથ ગણેશરૂપં સંયોગહીનં ચ હ્યયોગહીનમ્ ।
તાદાત્મ્યરૂપં ભવ તુષ્ટચિત્તં યોગાય યોગાધિપતે નમસ્તે ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં પ્રણનામ કૃતાઞ્જલિઃ ।
અયોગસ્તં ગણાધીશો જગાદ ઘનનિઃસ્વનઃ ॥ ૨૪॥

ગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ મનસીપ્સિતરૂપકાન્ ।
દાસ્યામિ ભક્તિતુષ્ટોઽહં સ્તોત્રેણાનેન યોગપ ॥ ૨૫॥

ત્વયા કૃતમિદં સ્તોત્રં યોગશાન્તિપદપ્રદમ્ ।
પઠતાં શ‍ૃણ્વતાં નિત્યં નાનાસિદ્ધિપ્રદં ભવેત્ ॥ ૨૬ ॥

યં યમિચ્છસિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મયિ પ્રીતિકરં ચાસ્તુ ભક્તિભાવપ્રદં તથા ॥ ૨૭ ॥

એકવિંશતિવારં ચૈકવિંશતિ દિનાવધિ ।
પઠતે તસ્ય સર્વં ચ દાસ્યામિ દુર્લભં હિ ચેત્ ॥ ૨૮ ॥

એવમુક્ત્વા ગણેશાનઃ સસ્વજે તં ગણાધિપમ્ ।
અયોગરૂપિણં હર્ષસંયુક્તં પ્રચકાર હ ॥ ૨૯ ॥

તતોઽયોગો ગણાધ્યક્ષં પ્રણમ્ય ચ પુનઃ પુનઃ ।
જગાદ ભક્તિસંયુક્તો હૃષ્ટરોમા સુહર્ષિતઃ ॥ ૩૦ ॥

અયોગ ઉવાચ ।
યદિ ઢુણ્ઢે વરાન્ મે ત્વં દાસ્યસિ ભક્તિમોહિતઃ ।
તદા તે પાદયુગ્મે મે ભક્તિં દેહિ દૃઢાં પરામ્ ॥ ૩૧ ॥

પૂર્ણયોગસ્વરૂપસ્થં માં કુરુષ્વ ગજાનન ।
(Page ખં. ૯ અ. ૫ પાન ૧૩)
સુખં મુક્તસ્વરૂપસ્થં નાથ નેચ્છામિ તે નમઃ ॥ ૩૨ ॥

મુદ્ગલ ઉવાચ ।
અયોગગણરાજસ્ય શ્રુત્વા વચનમુત્તમમ્ ।
જગાદ તં ગણેશાનસ્તથેત્યન્તર્હિતોઽભવત્ ॥ ૩૩ ॥

અયોગસ્તં હૃદિ સ્થાપ્ય ભજતેઽનન્યમાનસઃ ।
અન્તે યોગમયઃ સોઽપિ બભૂવે મોક્ષનાયકઃ ॥ ૩૪ ॥

ઇતિ તે સર્વમાખ્યાતં ચરિતં ગણપસ્ય યત્ ।
પૂર્ણયોગધરસ્યાપિ સમાસેન પ્રજાપતે ॥ ૩૫ ॥

અતસ્ત્વં ગણરાજં તં ભજસ્વ ભક્તિસંયુતઃ ।
તેન યજ્ઞમિમં પૂર્ણં કરિષ્યસિ ન સંશયઃ ॥ ૩૬ ॥

અન્તે યોગયુતશ્ચૈવ બ્રહ્મભૂતો ભવિષ્યસિ ।
આજ્ઞાં દેહિ ગમિષ્યામિ ત્વદાતિથ્યસુતોષિતઃ ॥ ૩૭ ॥

રહસ્યં ગણનાથસ્ય કથિતં સકલં મયા ।

નાન્યત્ કિઞ્ચિદતો દક્ષ પરં વેદાદિસમ્મતમ્ ॥ ૩૮॥

શ ृણુયાદ્યઃ પઠેદ્વાઽપિ સ સર્વં પ્રાપ્નુયાચ્છુભમ્ ।
અન્તે યોગમયો ભૂત્વા સન્તિષ્ઠેત્ ગણપાત્મકઃ ॥ ૩૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
યોગચરિતે નવમે ખણ્ડે પૂર્ણયોગચરિતવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૯.૪

## ૯.૫ સાર્વભૌમયોગો નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽહં કૃતકૃત્યોઽહં કૃતસ્ત્વયા મહામુને ।
યેન ગણેશમાહાત્મ્યં શ્રાવિતં યોગદાયકમ્ ॥ ૧॥

ગણેશગીતાસારાદિ કથિતં તુ વિશેષતઃ ।
જ્ઞાનં યોગપ્રદં પૂર્ણં સઙ્ક્ષેપેણ ત્વયા પરમ્ ॥ ૨॥

તન્ન બુદ્ધં મયા સર્વમતઃ સૌલભ્યતો વદ ।
યોગં ક્રમયુતં પૂર્ણં યેન યોગી નરો ભવેત્ ॥ ૩॥

સૂત ઉવાચ ।
એવં પૃષ્ટો મહાયોગી મુદ્ગલસ્તમુવાચ યત્ ।
હર્ષેણ મહતા યુક્તસ્તત્તેઽહં કથયામિ તુ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ કૃતકૃત્યોઽસિ સાક્ષાદ્ગણપતેઃ કિલ ।
વિભૂતિવાચકસ્તત્ર ન ચિત્રમિદમુત્તમમ્ ॥ ૫॥

ત્વયા પૃષ્ટં મહાભાગ લોકોપકારકારકમ્ ।
સર્વેષાં સુલભત્વેન યોગશાન્તિપદપ્રદમ્ ॥ ૬॥

કથયામિ ચ તે પ્રીત્યા ગુહ્યં વેદરહસ્યકમ્ ।
શ ृણુષ્વૈકમના દક્ષ યોગં શાન્તિપ્રદાયકમ્ ॥ ૭॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તેષુ પઞ્ચવિધો રસઃ ।
સરસં ચિત્તમુત્સૃજ્ય યોગી ભવતિ માનવઃ ॥ ૮॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।

ચિત્તં પઞ્ચવિધં વિદ્ધિ જગત્સુ બ્રહ્મસુ સ્થિતમ્ ॥ ૯॥

વ્યષ્ટિભાવે સ્થિતા યે તુ જન્તવો વિવિધાત્મકાઃ ।
લક્ષચતુરશીતિષુ યોનિષુ સમ્ભવાઃ કિલ ॥ ૧૦॥

દેહભોગાદિમાર્ગેષુ કુશલાઃ સમ્ભવન્તિ યે ।
તેષુ સ્વસ્વપ્રપઞ્ચેષુ નાનાકાર્યપરાયણાઃ ॥ ૧૧॥

તૈઃ ક્ષિપ્તં કાર્યસિદ્ધ્યર્થં ચિત્તં કાર્યેષુ નિત્યદા ।
તત્તત્કાર્યપ્રકાશેન પ્રકાશયતિ તાન્ હૃદિ ॥ ૧૨॥

તેન કાર્યેષુ દક્ષાસ્તે ભવન્ત્યત્ર ન સંશયઃ ।
તદેવ ક્ષિપ્તસંજ્ઞં ત્વં ચિત્તં જાનીહિ માનદ ॥ ૧૩॥

કેચિત્ સ્વલ્પજ્ઞકાસ્તેષુ કેચિજ્જ્ઞાનાધિકા મતાઃ ।
મધ્યમાઃ કેચિદેવં તુ નાનાભેદાશ્રિતા નરાઃ ॥ ૧૪॥

ત્રિવિધેષુ વિભાગેષુ સ્થિતા નાનાવિભેદતઃ ।
નાનાજ્ઞાનયુતાસ્તેષાં રૂપં ન કથિતું ક્ષમમ્ ॥ ૧૫॥

લક્ષચતુરશીતિષુ જન્તવો વિવિધાત્મકાઃ ।
વ્યષ્ટિસ્થાઃ સર્વકાર્યેષુ જ્ઞાનહીના ભવન્તિ યે ॥ ૧૬॥

તે મૂઢાઃ કથ્યતે લોકૈર્વિષયે ચતુરૈઃ સદા ।
તેષુ નાનાવિધા ભેદા અલ્પાધિકસુમધ્યમાઃ ॥ ૧૭॥

તેષાં પ્રકાશકં ચિત્તં નાનામૂઢસ્વભાવગમ્ ।
તદેવ મૂઢસંજ્ઞાખ્યં ચિત્તં જ્ઞાતવ્યમઞ્જસા ॥ ૧૮॥

પરૈઃ સમ્બોધિતો જન્તુર્ન બુબોધ વિચારતઃ ।
કાર્યં નાનાવિધં તસ્ય ચિત્તં મૂઢં પ્રકીર્તિતમ્ ॥ ૧૯॥

વ્યષ્ટિસ્થા યે નરા દક્ષ સ્વધર્મનિરતાઃ સદા ।
નાનાતપઃપરા ભૂત્વા મુક્તિમિચ્છન્તિ શાશ્વતીમ્ ॥ ૨૦॥

વિષયેષુ વિરજ્યૈવ સદા બ્રહ્મપરાયણાઃ ।
કુર્વન્તિ વિવિધં કર્માઽહર્નિશં મુક્તિકારણાત્ ॥ ૨૧॥

તદપિ બ્રહ્મ હૃદયે ન દૃષ્ટં તૈર્મહાત્મભિઃ ।
ન સંસારસુખે ચિત્તં તેષાં રમતિ કર્હિચિત્ ॥ ૨૨॥

અતો વિક્ષિપ્તચિત્તાસ્તે મતા યોગિજનૈઃ પુરા ।
બ્રહ્માર્પણક્રિયાઃ સર્વાઃ કુર્વન્ત્યન્તરબાહ્યજાઃ ॥ ૨૩॥

વિશેષેણૈવ ક્ષિપ્તોઽહં સંસારે માયયા સદા ।
વિગતક્ષેપણં સર્વે નાનાસાધનભાવતઃ ॥ ૨૪॥

તેષાં મુક્ત્યર્થમત્યન્તં પ્રકાશયતિ ભાવનામ્ ।
ચિત્તં ક્રિયાત્મિકાં તેન વિક્ષિપ્તં તત્પ્રકીર્તિતમ્ ॥ ૨૫॥

તત્ર નાનાક્રિયાયાશ્ચ સામર્થ્યેન વિમોહિતઃ ।
જાનાતિ દેવતાં તુષ્ટાં મમોપરિ ન સંશયઃ ॥ ૨૬॥

કદા દેવપ્રસાદાદિ ગૃહ્ય વિક્ષેપસંયુતઃ ।
અનાધારાં ક્રિયાં કુર્યોદ્દેવાજ્ઞાવશગો મુધા ॥ ૨૭॥

સ્વપ્નેષુ વિવિધાન્ ભાવાન્ પશ્યતિ તદ્ગતચેતસા ।
સત્યં સ્વપ્નં મદીયં તુ માન્યં તાદૃશજં ચરેત્ ॥ ૨૮॥

એવં વિક્ષિપ્તભાવેન મોહિતઃ સ કદાચન ।
અનાધારં કરોત્યેવ નાનાતપઃપ્રભાવતઃ ॥ ૨૯॥

સમષ્ટિવ્યષ્ટિસંસ્થં યચ્ચિત્તં વૈરાટગં પરમ્ ।
તેન વ્યષ્ટિં સમાવ્યાપ્ય ભુઙ્ક્તે સ વિવિધં સુખમ્ ॥ ૩૦॥

વૈરાટસ્ય ક્રિયા પ્રોક્તા વ્યાપિકા શાસ્ત્રસમ્મતે ।
તત્ર વ્યાપકભાવસ્ય ચિત્તં પ્રકાશદં મતમ્ ॥ ૩૧॥

તત્ત્વેષુ વિવિધેષ્વેવ સ્થૂલસૂક્ષ્માદિગેષુ ચ ।
વ્યાપકભાવકાશત્વાચ્ચિત્તં તેષુ સ્થિતં મતમ્ ॥ ૩૨॥

સમષ્ટિવ્યષ્ટિસંયોગેઽન્નં બ્રહ્મ સ્થૂલગં પરમ્ ।
તથા સ્વપ્નગતં સૂક્ષ્મં સૌષુપ્તં સમસંસ્થિતમ્ ॥ ૩૩॥

ચેતનાભાવગં પૂર્ણં તદ્ગન્નાદાત્મકં મતમ્ ।
અસ્મિતાખ્યં પરં બ્રહ્મ તેષુ ચિત્તં પ્રકીર્તિતમ્ ॥ ૩૪॥

સમષ્ટિવ્યષ્ટિભાગસ્ય તયોરૈક્યસ્ય ચ પ્રભો ।
પ્રકાશકારકં વિદ્ધિ ચિત્તમેકાગ્રસંજ્ઞિતમ્ ॥ ૩૫॥

સમષ્ટિવ્યષ્ટિભાવેષુ ન ભિન્નં ભવતીત્યહો ।
તેનૈકાગ્રં સમાખ્યાતં ચિત્તં તજ્જ્ઞાનકારકમ્ ॥ ૩૬॥

દેહશ્ચતુર્વિધઃ પ્રોક્તઃ સ્થૂલઃ સૂક્ષ્મઃ સમાત્મકઃ ।
અસ્મિતાખ્યશ્ચતુર્થશ્ચ તેષુ દેહી સ્થિતો મતઃ ॥ ૩૭॥

દેહેષુ મોહિતો દેહી જીવ ઇત્યભિધીયતે ।
(Page ખં. ૯ અ. ૫ પાન ૧૫)
મોહહીનઃ સ એવાઽપિ શિવઃ પ્રોક્તો મનીષિભિઃ ॥ ૩૮॥

જીવશિવાત્મિકા સંજ્ઞા દેહિનો ભ્રમમાત્રતઃ ।
સદૈકાત્મસ્વભાવત્વાત્તત્ર ભેદો ન વિદ્યતે ॥ ૩૯॥

તત્ર જીવશિવાકારભાવપ્રકાશકારકમ્ ।
ચિત્તમેકાગ્રસંજ્ઞાખ્યં તિષ્ઠતિ દેહિસંશ્રિતમ્ ॥ ૪૦॥

સાસ્મિતાખ્ય પરં ચિત્તમેકાગ્રં વિદ્યતે ન વૈ ।
દેહદેહિમયં ચિત્તમેકાગ્રં યોગિનાં મતે ॥ ૪૧॥

ચતુર્ણાં વપુષાં યત્ર બ્રહ્માકારેણ જાયતે ।
સંયોગો બિન્દુરૂપં તજ્જ્ઞાતવ્યં બ્રહ્મ સર્વગમ્ ॥ ૪૨॥

ચતુષ્પદં બુધૈઃ પ્રોક્તં ચતુર્ભિર્વર્જિતં સદા ।
દેહાનાં બ્રહ્મ વિખ્યાતં નાનાદેહસ્વભાવગમ્ ॥ ૪૩॥

તત્ર ચતુષ્પદાકારભાવપ્રકાશકારકમ્ ।
ચતુર્ભિર્વર્જિતસ્યૈવ ચિત્તં તિષ્ઠતિ તદ્ગતમ્ ॥ ૪૪॥

દેહેષુ ન ભવેદ્ભિન્નં સર્વગમાત્મભાવતઃ ।
નિરોધં કથ્યતે ચિત્તં બિન્દુધર્મપ્રકાશકમ્ ॥ ૪૫॥

જીવશિવાત્મભાવસ્થં મોહહીનં સદાત્મગમ્ ।
બ્રહ્મ સોઽહં સમાખ્યાતં સદા ભ્રાન્તિવિવર્જિતમ્ ॥ ૪૬॥

તત્ર જીવશિવાકારમોહહીનપ્રકાશકમ્ ।
ચિત્તમાત્મસ્વરૂપસ્થં નિરોધં કથ્યતે બુધૈઃ ॥ ૪૭॥

દેહદેહિસમાયોગે સ્વત ઉત્થાનમુચ્યતે ।
બોધાખ્યં દ્વન્દ્વભાવેન બ્રહ્મ ખેલકરં સદા ॥ ૪૮॥

તત્ર નિરોધકં ચિત્તં તસ્ય રૂપં વદામ્યહમ્ ।
સઙ્ક્ષેપેણ પ્રજાનાથ શ઼ૃણુ ભાવસમન્વિતઃ ॥ ૪૯॥

બાહ્યં સ્થૂલં સમાખ્યાતમાન્તરં સૂક્ષ્મગં મતમ્ ।
બાહ્યાન્તરૈકભાવસ્થમાનન્દદેહગં પરમ્ ॥ ૫૦॥

ત્રિભિર્હીનં ત્રયાણાં ચ ચાલકં હ્યસ્મિતાત્મકમ્ ।
અહમાનુભવેનૈતજ્જ્ઞાતવ્યં યોગિનાં હૃદિ ॥ ૫૧॥

તેષાં સંયોગભાવે યચ્ચતુર્ણાં વપુષાં પરમ્ ।
સર્વાત્મકં ભવેદ્બ્રહ્મ પઞ્ચમં બિન્દુસંજ્ઞિતમ્ ॥ ૫૨॥

ચતુર્વિધા નરસ્યૈવ કલ્પના હૃદિ સંસ્થિતા ।
અતઃ પરં ન ભેદોઽસ્તિ ભવેદ્યેનાસ્ય કલ્પના ॥ ૫૩॥

બિન્દુત્યાગે નિરાલમ્બં ચિત્તં ભવતિ સર્વદા ।
સતતં તત્ સમાખ્યાતં બ્રહ્મ ધ્યાતૃવિહીનતઃ ॥ ૫૪॥

ન કિઞ્ચિજ્જ્ઞાયતે યત્ર ભેદહીનપ્રભાવતઃ ।
સોઽહં માત્રાત્મકં ચિત્તં નિરાલમ્બસમાધિદમ્ ॥ ૫૫॥

અવલમ્બનગં ચિત્તં ચતુર્ધા દેહિસંશ્રિતમ્ ।
અવલમ્બનહીનં તદ્દેહિગં ચિન્મયં ભવેત્ ॥ ૫૬॥

નિરાલમ્બપરિત્યાગેઽધિકસંરોધનં ભવેત્ ।
ચિત્તસ્ય દેહદેહિભ્યાં હીનત્વાન્નાત્ર સંશયઃ ॥ ૫૭॥

મનોવાણીવિહીનં તચ્ચિત્તં જ્ઞાતવ્યમાદરાત્ ।
અસ્તિનાસ્તિવિહીનત્વાદાધારાધેયયોગતઃ ॥ ૫૮॥

અવલમ્બનયોગો ન પઞ્ચધા યોગિનાં હૃદિ ।
નિરાલમ્બનકં તસ્માન્ મનોવાણીવિવર્જિતમ્ ॥ ૫૯॥

બોધેન બુદ્ધ્યતે સર્વં નિરાલમ્બં સમાધિના ।
અવલમ્બનકં તદ્વદ્બોધબોધો ન વિદ્યતે ॥ ૬૦॥

એવં બોધાત્મકં બ્રહ્મ દેહદેહિસમાધિદમ્ ।
દેહદેહિસમાયોગપ્રકાશં ચિત્તમુચ્યતે ॥ ૬૧॥

દેહસૌખ્યં પ્રજાનાતિ દેહિસૌખ્યં નિરન્તરમ્ ।
તયોર્યોગે ચ યત્ સૌખ્યં જાનાતિ બ્રહ્મ બોધગમ્ ॥ ૬૨॥

પદાનાં બોધભાવેન પદાર્થાનાં વિશેષતઃ ।
ઉત્થાનં જાયતે તસ્માત્ સ્વત ઉત્થાનમુચ્યતે ॥ ૬૩॥

સુખં જ્ઞાત્વા સમુત્થાનં સ્વયમેવ કરોતિ યઃ ।
દેહદેહિ ચ સૃષ્ટ્વા સ ખેલતિ બ્રહ્મતત્પરઃ ॥ ૬૪॥

તત્રોત્થાનપ્રકાશાખ્યં ચિત્તં નિરોધસંજ્ઞકમ્ ।
તિષ્ઠત્યત્ર ન સન્દેહો જ્ઞાતવ્યં યોગિનાં હૃદિ ॥ ૬૫॥

(Page ખં. ૯ અ. ૫ પાન ૧૬)
બોધત્યાગે સમાખ્યાતં બ્રહ્મ સાઙ્ખ્યં પ્રજાપતે ।
કઃ સઙ્ખ્યાં કુરુતે તસ્ય બોધનાશપ્રભાવતઃ ॥ ૬૬॥

ઉત્થાનવર્જિતં બ્રહ્મ સાઙ્ખ્યં સાક્ષિસ્વભાવગમ્ ।
બોધહીનાત્ કદા તત્રોત્થાનં નૈવ પ્રજાપતે ॥ ૬૭॥

પ્રકૃતિસમ્ભવં બોધં તયોઃ પુરુષસમ્ભવમ્ ।
યોગસૌખ્યં ન જાનાતિ સાઙ્ખ્યં બોધવિહીનતઃ ॥ ૬૮॥

બુદ્ધ્વા સુખં નરસ્યૈવોત્થાનં યથા પ્રજાપતે ।
તથા માયાસુખં જ્ઞાત્વા બ્રહ્મણોત્થાનકં ભવેત્ ॥ ૬૯॥

તથા પરત ઉત્થાનં સાઙ્ખ્યે નિત્યં પ્રતિષ્ઠિતમ્ ।
તત્ર યોગં પ્રવક્ષ્યામિ યેન યોગી નરો ભવેત્ ॥ ૭૦॥

યદ્યુત્થાનસમાયુક્તં ભવતિ ચેત્તદા ભવેત્ ।
ઉત્થાનવર્જિતં દક્ષ તદેવં બીજમાદ્યકમ્ ॥ ૭૧॥

ઉત્થાનહીનભાવેન સદા સાઙ્ખ્યં વિરાજતિ ।
સ્વયં ચ સ્વત ઉત્થાનં નિઃસૃતં તત્ પ્રભાવતઃ ॥ ૭૨॥

સાઙ્ખ્યેન ન કૃતં ચૈતત્તથાપ્યુત્થાનહીનતઃ ।
સ્વયં ચ સ્વત ઉત્થાનં જાયતે નાત્ર સંશયઃ ॥ ૭૩॥

યદાઽનૃતં ભવેદ્દક્ષ તદા સત્યં પ્રકીર્ત્યતે ।
એકં બ્રહ્મ યદા તિષ્ઠેત્ સત્યં તત્ કેન કથ્યતે ॥ ૭૪॥

ન દૃષ્ટમનૃતં યેન ન જાનાતિ સ સત્યકમ્ ।
સદા તાદૃશરૂપત્વાદેકભાવપ્રદર્શનાત્ ॥ ૭૫॥

અત ઉત્થાનહીનત્વં ધૃતં તેન વિશેષતઃ ।
સ્વત ઉત્થાનભાવાખ્યં સ્વયમેવોપજાયતે ॥ ૭૬॥

ન કૃતં તેન સાઙ્ખ્યેન સ્વયમેવ વિનિઃસૃતમ્ ।
અતઃ પરત ઉત્થાનં પ્રાપ્તં તત્ર ન સંશયઃ ॥ ૭૭॥

સઙ્ખ્યાહીનપ્રકાશાખ્યં ચિત્તં તત્ર પ્રવર્તતે ।
બોધહીનપ્રકાશેન જ્ઞાયતે તન્નિરોધકમ્ ॥ ૭૮॥

ઉત્થાનેન યુતં બ્રહ્મ બોધમયં પ્રકીર્તિતમ્ ।
સાઙ્ખ્યમુત્થાનહીનં ચ તયોર્યોગે નિજાત્મકમ્ ॥ ૭૯॥

સ્વતઃ પરત ઉત્થાનં તત્ર નૈવ પ્રજાપતે ।
જગતાં બ્રહ્મણાં યોગે ભવતિ સ્વસ્વરૂપકમ્ ॥ ૮૦॥

સ્વસ્વરૂપાત્ પરો નાસ્તિ સંયોગઃ તન્મયઃ કદા ।
સ સમાધિઃ સમાખ્યાતો બ્રહ્મણ્યસ્યાન્વયાત્મકઃ ॥ ૮૧॥

સ્વકીયાભેદભાવસ્ય તત્ર પ્રકાશકારકમ્ ।
ચિત્તં નિરોધસંજ્ઞં તુ તિષ્ઠત્યત્ર ન સંશયઃ ॥ ૮૨॥

સંયોગઃ પઞ્ચધા દક્ષ ભવતિ શ઼ૃણુ રૂપકમ્ ।
તસ્ય ભિન્નં પ્રવક્ષ્યામિ લોકાનાં હિતકારણાત્ ॥ ૮૩॥

એતે ભેદાઃ સમાખ્યાતા યોગેન લયતાં યયુઃ ।
સ્વસંવેદ્યેન સન્દેહસ્તેન સૃષ્ટાશ્ચ પાલિતાઃ ॥ ૮૪॥

એતેષાં રૂપમાસ્થાય ખેલતિ સ્વસ્વરૂપકમ્ ।
નાનાલીલાકરં પ્રોક્તં તદેવં વેદવાદિભિઃ ॥ ૮૫॥

ઉત્પત્તિનાશસંયુક્તા ભેદા એતે મનીષિભિઃ ।
તેષાં નિજસ્વભાવત્વાદસત્સ્વાનન્દ ઉચ્યતે ॥ ૮૬॥

તદ્બ્રહ્મ શક્તિરૂપાખ્યં જ્ઞાતવ્યં ભેદધારણાત્ ।
તત્રાસત્કાશભાવેન ચિત્તં તિષ્ઠતિ નિશ્ચિતમ્ ॥ ૮૭॥

એતૈર્ભેદૈર્વિહીનં યદમૃતં બ્રહ્મ કથ્યતે ।
એતેષાં જીવનં નિત્યં તચ્ચ સત્સ્વસ્વરૂપકમ્ ॥ ૮૮॥

તદ્બ્રહ્મ સૌરમાખ્યાતં ભેદહીનપ્રભાવતઃ ।
તત્ર નિત્યસ્ય કાશાખ્યં ચિત્તં નિરોધકં મતમ્ ॥ ૮૯॥

(Page ખં. ૯ અ. ૫ પાન ૧૭)
અસત્ સત્ દ્વિવિધં પ્રોક્તં તયોર્યોગે સમાત્મકમ્ ।

સ્વસંવેદ્યં પરં બ્રહ્મ વિષ્ણુર્દ્વન્દ્વપ્રવેશનાત્ ॥ ૯૦॥

તત્રાનન્દપ્રકાશાખ્યં ચિત્તં નિરોધસંજ્ઞિતમ્ ।
તિષ્ઠતે તેન યોગીન્દ્રાસ્તં ગચ્છન્તિ સમાધિના ॥ ૯૧॥

ત્રિભિર્હીનં ત્રિભિર્યુક્તમવ્યક્તં નેતિ કારકમ્ ।
મોહહીનપ્રભાવેણ તુરીયં બ્રહ્મ કથ્યતે ॥ ૯૨॥

તદેવ શિવસંજ્ઞાખ્યં જ્ઞાતવ્યં યોગસેવયા ।
તત્ર નેતિ પ્રકાશાખ્યં ચિત્તં તિષ્ઠતિ તદ્ગતમ્ ॥ ૯૩॥

ત્રિવિધં મોહસંયુક્તં મોહહીનં ચતુર્થકમ્ ।
તેષાં સંયોગભાવે વૈ સ્વસંવેદ્યં પ્રકીર્તિતમ્ ॥ ૯૪॥

પૂર્ણસંયોગભાવાખ્યં પઞ્ચમં બ્રહ્મ તત્ સ્મૃતમ્ ।
તસ્માત્ પરો ન સંયોગઃ કથ્યતે યોગિભિઃ સદા ॥ ૯૫॥

સ એવ ગણનાથસ્તુ સ્વાનન્દાખ્યઃ પ્રકીર્તિતઃ ।
તત્ર નિજપ્રકાશાખ્યં ચિત્તં તિષ્ઠતિ સર્વગમ્ ॥ ૯૬॥

અતઃ પરમયોગાખ્યં બ્રહ્મ માયાવિવર્જિતમ્ ।
તદેવ યોગિભિઃ પ્રોક્તં નિવૃત્તિસુખદાયકમ્ ॥ ૯૭॥

ન તત્ર જગતાં દક્ષ બ્રહ્મણાં યોગ ઉચ્યતે ।
તસ્યાઽપિ તેષુ તદ્વચ્ચ તેનાયોગ ઇતિ સ્મૃતઃ ॥ ૯૮॥

બ્રહ્મણિ તન્મયત્વેન સ્વસ્ય સંયોગ ઉચ્યતે ।
તસ્માન્નિવૃત્તિરાપન્ના તેન નિવૃત્તિસંજ્ઞકમ્ ॥ ૯૯॥

સ્વસંવેદ્યસ્ય નાશેન લભ્યતે હ્યસમાધિના ।
નાઽગતં ન ગતં બ્રહ્મ સંયોગઃ કુત્ર જાયતે ॥ ૧૦૦॥

તત્રાયોગપ્રકાશાખ્યં ચિત્તં નિરોધસંજ્ઞિતમ્ ।
તિષ્ઠતિ ચાપવાદેષુ નિવૃત્તિસુખદાયકમ્ ॥ ૧૦૧॥

ઇદં પઞ્ચવિધં ચિત્તં કથિતં તે પ્રજાપતે ।
જગત્સુ બ્રહ્મસુ તજ્જ્ઞં નાનાપ્રકાશદાયકમ્ ॥ ૧૦૨॥

ભૂમયઃ પઞ્ચ વિખ્યાતાશ્ચિત્તસ્ય વિવિધાત્મનઃ ।
ભૂમીનાં ત્યાગભાવે તચ્ચિત્તં બ્રહ્મમયં ભવેત્ ॥ ૧૦૩॥

અતઃ પઞ્ચવિધં ચિત્તં ત્યજ ત્વં યોગસેવયા ।
યોગી ભવિષ્યસિ દક્ષ ચિન્તામણૌ ન સંશયઃ ॥ ૧૦૪॥

સંયોગાયોગસંજ્ઞસ્થં નિરોધાખ્યં મતં બુધૈઃ ।
અતઃ પરો નિરોધો ન વિદ્યતે સર્વસમ્મતે ॥ ૧૦૫॥

સાર્વભૌમાત્મધર્મેણ યોગી ભવતિ માનવઃ ।
તત્ર શાન્તિં લભેચ્ચિત્તં ત્યક્ત્વા ભૂમિભવં ભ્રમમ્ ॥ ૧૦૬॥

યોગરૂપે સુખં યદ્વૈ યોગિનાં હૃદિ વર્તતે ।
તદેવ કથિતું દક્ષ શક્યતે ન કદાચન ॥ ૧૦૭॥

મનોવાણીમયં ચિત્તં ચતુર્વિધં પ્રકીર્તિતમ્ ।
મનોવાણીવિહીનં તુ નિરોધસંજ્ઞકં મતમ્ ॥ ૧૦૮॥

અતો યોગઃ સમાખ્યાતો મનોવાણીમયો ન ચ ।
મનોવાણીવિહીનોઽપિ કથ્યતે નૈવ યોગિભિઃ ॥ ૧૦૯॥

કીદૃશં બ્રહ્મ તત્રાહં યોગેન કીદૃશેન ચ ।
બ્રહ્મભૂતઃ સ્વયં જાત એભ્યઃ શાન્તિં લભેન્નરઃ ॥ ૧૧૦॥

યોગે યોગી નરો જાતસ્તત્ર ન જ્ઞાયતે કદા ।
બ્રહ્મ વા સાધનં કિઞ્ચિદ્બ્રહ્મભૂતસ્ય કારકમ્ ॥ ૧૧૧॥

તન્મયત્વં બ્રહ્મણિ ન ન ચ તન્મયવર્જનમ્ ।
અતઃ શાન્તિં સમાગૃહ્ય શાન્તિયોગપરો ભવેત્ ॥ ૧૧૨॥

પઞ્ચવિધેષુ ચિત્તેષુ દૃશ્યતે જગતાં પરમ્ ।
બ્રહ્મણામૈશ્વરં સૌખ્યં રસં તત્ર ન ધારયેત્ ॥ ૧૧૩॥

નાનારસવિહીનં તુ ચિત્તં કૃત્વા પ્રજાપતે ।
તત્ત્યક્ત્વા સ ભવેદ્યોગી શાન્ત્યા શાન્તિમવાપ્નુયાત્ ॥ ૧૧૪॥

(Page ખં. ૯ અ. ૬ પાન ૧૮)
સ્રોતસોર્ણવમાનન્દાદ્દ્વચ્છન્ત્યપ્રેરિતાન્યપિ ।
પ્રારબ્ધેન તથા કામાન્ ભુનક્તિ યોગિસત્તમઃ ॥ ૧૧૫॥

નાનાદ્વન્દ્વવિહારેષુ સમભાવપરાયણઃ ।
યોગી ભવતિ શાન્ત્યા ચ સદા યોગસુખે રતઃ ॥ ૧૧૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન સાર્વભૌમયોગો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૯.૫
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ પ્રથમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૧

## ૯.૬ યોગિચિત્તાનુભવશાન્તિસુખવર્ણનયોગો નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
યોગસ્યાનુભવં બ્રૂહિ યત્ર શાન્તિં લભેન્ મનઃ ।
રસં ત્યક્ત્વા સુશાન્ત્યા તદ્યુક્તં તિષ્ઠેન્ મહામુને ॥ ૧॥

મુદ્ગલ ઉવાચ ।
ન તત્ર દૃશ્યતે દક્ષ જગદ્બ્રહ્મભવં સુખમ્ ।
તન્માયામયગં દૃષ્ટ્વા તસ્માન્નિર્વૃત્તિગો ભવત્ ॥ ૨॥

નાહં દેહો ન મે દેહો નાહં નાનાભ્રમાન્વિતઃ ।
ચરાચરમયો નૈવ તાભ્યાં સંવર્જિતો ન ચ ॥ ૩॥

ન સમષ્ટિસમાયુક્તો વ્યષ્ટિગો ન કદાચન ।
બ્રહ્માઽહમખિલેષ્વેવ તત્તદ્ભાવવિવર્જિતઃ ॥ ૪॥

ન બાહ્યસુખભોક્તાઽહં નાન્તરસ્થપરાયણઃ ।
ન સમાનગતોઽહં તુ નાત્મપ્રતીતિધારકઃ ॥ ૫॥

ન સ્થૂલો નૈવ સૂક્ષ્મોઽહં નાનન્દગઃ કદાચન ।
ન નાદદેહસંસ્થશ્ચ સર્વાકારઃ સદા મતઃ ॥ ૬॥

ચતુષ્પાદાઃ સન્તિ મે ચેન્ માયયા સન્ધૃતા મયા ।
માયાહીનપ્રભાવેણ પાદહીનોઽહમઞ્જસા ॥ ૭॥

માયાયુક્તવિયુક્તત્વં મયિ નૈવ પ્રતિષ્ઠિતમ્ ।
માયાસંસ્થાપિતં દ્વન્દ્વં તદપ્યાશ્ચર્યમુત્તમમ્ ॥ ૮॥

અનેનાનુભવેનૈવ યોગી બિન્દુગતો ભવેત્ ।
તત્ર લીનસ્વભાવેન સદા શાન્ત્યા પ્રવર્તતે ॥ ૯॥

અથાહં ભેદહીનશ્ચ ન ભેદો મયિ વર્તતે ।
સદા સન્તતભાવેન સંસ્થિતોઽત્ર નિરન્તરમ્ ॥ ૧૦॥

ન સૃજામિ હરામ્યેવ પાલયામિ ન નિશ્ચિતમ્ ।
સ્વયમેવ જગદ્ભાતિ યથા મયિ ધૃતં ભવેત્ ॥ ૧૧॥

ઉત્પન્નં સ્વસ્વભાવેન સ્મિતં નષ્ટં તથા કિલ ।
વિશ્વં તત્ર ન મે હાનિર્વૃદ્ધિર્ભવતિ કર્હિચિત્ ॥ ૧૨॥

ન વિશ્વસ્મિન્નહં જીવો ન શિવઃ સાક્ષિભાવગઃ ।
ભ્રાન્ત્યા માયાયુતં હીનં વદન્ત્યયોગિનઃ સદા ॥ ૧૩॥

યથાઽઽકાશભવં મેઘપટલં સર્વતઃ સ્થિતમ્ ।
તત્ર સૂર્યસ્ય કિં દક્ષાચ્છાદનં સમ્ભવેત્ કદા ॥ ૧૪॥

નષ્ટેઽભ્રે કિં રવિઃ સાક્ષાચ્છાદનેન વિવર્જિતઃ ।
તથા મોહવિમોહૌ ચ મયિ ભ્રાન્ત્યા વદન્તિ યે ॥ ૧૫॥

(Page ખં. ૯ અ. ૬ પાન ૧૯)
સદૈકાત્મસ્વરૂપાખ્યે મયિ મોહવિમોહકૌ ।
કથં ભેદૌ પ્રવર્તેતે પશ્ય માયાપ્રભાવજૌ ॥ ૧૬॥

તથાપિ વિશ્વસંયુક્તો મોહિતોહં ન સંશયઃ ।
જ્ઞાત્વાઽઽત્માનં વિમોહોઽહં સદા સાક્ષી ન સંશયઃ ॥ ૧૭॥

માયયા જીવસંજ્ઞોઽહં તથા શિવો ન સંશયઃ ।
મયિ બ્રહ્મણિ વિશ્વં તત્ દૃશ્યતે નૈવ દૃશ્યતે ॥ ૧૮॥

એવં જ્ઞાત્વા સ્વયં યોગી સદા શાન્ત્યા પ્રવર્તતે ।
દ્વન્દ્વભાવં પરિત્યજ્ય સોઽહં બ્રહ્મણિ સંસ્થિતઃ ॥ ૧૯॥

અતઃ પરં પ્રવક્ષ્યામિ બ્રહ્માનુભવરૂપકમ્ ।
ન દેહો નૈવ દેહસ્થોઽહં ભવામિ કદાચન ॥ ૨૦॥

સન્તતં મયિ નાસ્ત્યેવ વિશ્વં મયિ ન વિદ્યતે ।
ભેદાભેદવિહીનત્વાદ્બ્રહ્મ બ્રહ્મણ્યહં રતઃ ॥ ૨૧॥

વિશ્વરૂપોઽહમેવેદં મયિ સર્વં પ્રતિષ્ઠિતમ્ ।
વિશ્વહીનો ન સન્દેહઃ સદૈકરૂપધારકઃ ॥ ૨૨॥

ન સૃષ્ટં પાલ્યતે નૈવ હ્રિયતે ન મયા કદા ।
વિશ્વં સૃષ્ટં હૃતં નિત્યં પાલિતં સર્વદા મયા ॥ ૨૩॥

મયિ સન્તતભાવશ્ચ દૃશ્યતે ન વિનિશ્ચિતમ્ ।

ન વિશ્વં વિવિધાકારં નાનાદેહપરાયણમ્ ॥ ૨૪॥

સદા બોધમયોઽહં તુ દેહદેહિયુતસ્તથા ।
મમ તત્ર ન ભો દક્ષ બન્ધાઽબન્ધૌ પ્રકીર્તિતૌ ॥ ૨૫॥

માયયા સંયુતો નિત્યં દેહદેહિમયો મતઃ ।
માયાહીનપ્રભાવેણ દેહદેહિવિવર્જિતઃ ॥ ૨૬॥

માયાયુક્તવિયુક્તત્વં મયિ કુત્ર પ્રદૃશ્યતે ।
સદાઽહં બોધરૂપાખ્યો બ્રહ્મણિ બ્રહ્મભાવિતઃ ॥ ૨૭॥

એવં બોધાત્મકેનૈવાનુભવેન પ્રજાપતે ।
યોગી યોગસમાયુક્તઃ સદા શાન્ત્યા પ્રવર્તતે ॥ ૨૮॥

અતઃ પરં વિબોધાખ્યં વક્ષ્યામિ બ્રહ્મભૂતકમ્ ।
પ્રકૃતિર્ન તથા દક્ષ પુરુષોઽહં ન નિશ્ચિતમ્ ॥ ૨૯॥

તયોર્યોગેન બોધોઽહં બ્રહ્માઽહં ભોગવર્જિતઃ ।
સદા બ્રહ્મણિ સંસ્થશ્ચ ખેલહીનપ્રભાવતઃ ॥ ૩૦॥

મિથ્યારૂપં જગત્ સર્વં જગદાત્મા તથા મતઃ ।
તયોર્યોગકરં બ્રહ્મ મિથ્યામૂલપ્રકાશકમ્ ॥ ૩૧॥

મયિ બ્રહ્મણિ નાસ્ત્યેવ પ્રકૃતિર્વા પુમાન્ ક્વચિત્ ।
તયોર્યોગો ભ્રમાકારઃ સદા ખેલપરાયણઃ ॥ ૩૨॥

બોધેનોત્થાનભાવશ્ચ જાયતે બ્રહ્મણઃ સદા ।
મિથ્યાભૂતં તદેવાઽપિ કથં મયિ પ્રવર્તતે ॥ ૩૩॥

સત્યં બ્રહ્મ ઇતિ પ્રોક્તં વેદેષુ વેદવાદિભિઃ ।
તત્ર ખેલોઽનૃતાકારઃ કુતસ્તિષ્ઠતિ ભ્રાન્તિદઃ ॥ ૩૪॥

સદા બ્રહ્મસુખે સક્તો બ્રહ્મણિ બ્રહ્મભાવિતઃ ।
તત્ર ભેદાદિકં નાસ્તિ સ્ત્રીપુમ્ભાવમયં કદા ॥ ૩૫॥

માયયા રચિતં સર્વમનૃતાખ્યં ન સંશયઃ ।
સા મયિ ન સ્થિતા દક્ષ નિરાધારા ભ્રમાન્વિતા ॥ ૩૬॥

બ્રહ્મરૂપં ચ માં દૃષ્ટ્વા સ્વયમેવ વિનશ્યતિ ।
માયા તતઃ સ્વયં સાક્ષાત્ સત્યરૂપો ભવિષ્યતિ ॥ ૩૭॥

યદ્યહં માયયા યુક્તસ્તયા સ્ત્રીપુમ્મયં જગત્ ।
સૃજામિ ચેત્તદા સત્યં મયિ કુતઃ પ્રતિષ્ઠતિ ॥ ૩૮॥

યત્રાનૃતસ્વરૂપં તુ નાસ્ત્યેવ વેદવાદતઃ ।
તદેવ સત્યમાખ્યાતમતો બોધો ન દૃશ્યતે ॥ ૩૯॥

અનૃતં વિશ્વમખિલં પ્રકૃતિપુરુષાત્મકમ્ ।
તસ્માદ્ભિન્નોઽહમેકશ્ચ સત્યરૂપો ન સંશયઃ ॥ ૪૦॥

યોગેનૈતાદૃશેનૈવ શાન્તિયુક્તો ભવેન્નરઃ ।
સઙ્ખ્યાં ત્યક્ત્વા સ વિવિધાં બ્રહ્મભૂતસ્વભાવતઃ ॥ ૪૧॥

અથ સ્વાનન્દયોગં તુ વદિષ્યામિ હિતાય તે ।
તં શૃણુષ્વ પ્રજાનાથ સાવધાનેન ચેતસા ॥ ૪૨॥

સત્યમુત્થાનહીનં ચાનૃતમુત્થાનસંયુતમ્ ।
બ્રહ્મણિ દ્વિવિધં નાસ્તિ સ્વસ્વરૂપિણિ નિત્યદા ॥ ૪૩॥

બોધયુક્તં સ્વતોત્થાનં સાઙ્ખ્યમુત્થાનવર્જિતમ્ ।
તયોર્યોગે પરં બ્રહ્માઽસત્સ્વાનન્દમયં ભવેત્ ॥ ૪૪॥

ઉત્થાનવર્જિતોઽહં નોત્થાનયુક્તોઽપિ નાગ્જસા ।
ઉત્થાનયુક્તહીનોઽહં પશ્ય મે યોગમુત્તમમ્ ॥ ૪૫॥

મયિ બ્રહ્મણિ સર્વં તત્ સ્વસ્વરૂપમયં ભવેત્ ।
તત્રોત્થાનેન યુક્તત્વં હીનત્વં નૈવ દૃશ્યતે ॥ ૪૬॥

અહો માયાપ્રભાવેણ માં વદન્તિ વિમોહિતાઃ ।
ઉત્થાનેન યુતં હીનં સ્વસ્વરૂપં નિજે રતમ્ ॥ ૪૭॥

ઉત્થાનસંયુતં બ્રહ્મોત્થાનહીનં પ્રકીર્તિતમ્ ।
બ્રહ્મણિ તન્મયં સર્વં સંયોગાયોગભાવતઃ ॥ ૪૮॥

મયિ બ્રહ્મણિ સંયોગો જાયતે યોગિનાં યદા ।
ઉત્થાનેન યુતં હીનં કઃ પશ્યતિ તતઃ પરમ્ ॥ ૪૯॥

સમાધિહીનભાવેન પશ્યન્તિ વિવિધં સદા ।
અયોગિનો ન સન્દેહો યોગિનાં વૈ ન વિદ્યતે ॥ ૫૦॥

સર્વં બ્રહ્મેતિ વેદેષુ કથ્યતે વેદવાદિભિઃ ।
અતો માયાં પરિત્યજ્ય બ્રહ્માકારો ભવેન્નરઃ ॥ ૫૧॥

અનેન વિધિના યોગં સાધયેદ્યઃ સમાધિના ।
બ્રહ્મણિ બ્રહ્મભૂતઃ સ શાન્તિં પ્રાપ્નોતિ શાશ્વતીમ્ ॥ ૫૨॥

અથ સત્સ્વસ્વરૂપસ્ય વિધેર્યોગં વદામિ ભોઃ ।
તં જ્ઞાત્વા યોગમાર્ગેણ યોગી ભવતિ માનવઃ ॥ ૫૩॥

સર્વં બ્રહ્મેતિ વેદેષુ કથિતં નાત્ર સંશયઃ ।
તદેવોપાધિસંયુક્તં સર્વં માયાપ્રભાવતઃ ॥ ૫૪॥

એકમેવાદ્વિતીયં યદ્બ્રહ્મ વેદવિવાદતઃ ।
તત્ર સર્વં કુતો ભાતિ નાનાભાવપરાયણમ્ ॥ ૫૫॥

નાહમુત્થાનસંયુક્તો નાહમુત્થાનવર્જિતઃ ।
તયોર્યોગમયોઽહં નાદ્વિતીયેઽસ્મિન્ સ્થિતઃ સદા ॥ ૫૬॥

ન સત્યં મયિ નાસ્ત્યેવાનૃતં તત્ સંયુતં પરમ્ ।
બ્રહ્મ સંયોગદં નાસ્તિ સદાઽહં બ્રહ્મસંજ્ઞકઃ ॥ ૫૭॥

ન મયા સત્યરૂપં તુ સૃષ્ટં નાનૃતરૂપકમ્ ।
તયોર્યોગમયં નૈવામૃતોઽહં ચાત્મભાવતઃ ॥ ૫૮॥

આદિમધ્યાન્તભાવાશ્ચ કુતો મયિ ભવન્તિ તે ।
સદામૃતમયે સંસ્થોઽહમાત્મા બ્રહ્મભાવિતઃ ॥ ૫૯॥

માયયા સંયુતાઃ સર્વે સર્વેષાં જીવનં પરમ્ ।
માં વદન્તિ વિશેષેણ મયિ સર્વં ન વિદ્યતે ॥ ૬૦॥

સર્વાત્મકં પરં બ્રહ્મ નાનાખેલયુતં ભવેત્ ।
ખેલહીનં ભવતિ ચ તદેવાપિ તયોઃ પરમ્ ॥ ૬૧॥

તત્રાહં નાગતો દક્ષ ન ગતોઽપિ કદાચન ।
સ્વયમેવ ભવેત્ પશ્ય જીવનં મે પ્રભાવતઃ ॥ ૬૨॥

તત્ર કિં મયિ સર્વાત્મવિકારો દૃશ્યતે કદા ।
ભ્રાન્તિયુક્તા માં વદન્તિ જીવનં બ્રહ્મણાં પરમ્ ॥ ૬૩॥

બ્રહ્મણાં જગતાં નૈવ જીવનં સન્ધૃતં મયા ।
સ્વયમેવ પ્રભાવેણ મયિ તત્ દૃશ્યતે વૃથા ॥ ૬૪॥

સદા બ્રહ્મણિ સંસ્થોઽહં ભેદાભેદાદિવર્જિતઃ ।

અદ્વિતીયપ્રભાવેણાત્માઽહં પૂર્ણસ્વભાવતઃ ॥ ૬૫॥

અનેન યોગમુખ્યેન યોગી સઞ્જાયતે નરઃ ।
બ્રહ્મણિબ્રહ્મભૂતત્વાચ્છાન્તિયુક્તો ભવેત્ સદા ॥ ૬૬॥

અતઃ પરં સમાખ્યં યદ્બ્રહ્માનુભવરૂપકમ્ ।
(Page ખં. ૯ અ. ૬ પાન ૨૧)
કથયામિ મહાપ્રીત્યા યેન યોગી ભવેન્નરઃ ॥ ૬૭॥

નાહં સર્વાત્મકો દક્ષ નાહમાત્માત્મકઃ કદા ।
આનન્દોઽહં તયોઃ સામ્યે બ્રહ્મણિ બ્રહ્મભાવતઃ ॥ ૬૮॥

મયા માયાબલેનૈવ સર્વાત્મકં પ્રતિષ્ઠિતમ્ ।
એકમેવાદ્વિતીયાખ્યં તયોઃ સામ્યેઽહમાસ્થિતઃ ॥ ૬૯॥

બ્રહ્મણિ સર્વભાવશ્ચ ભાવહીનં કુતો ભવેત્ ।
અમૃતં મૃતમૂલં યન્નાસ્ત્યેવ મયિ સર્વદા ॥ ૭૦॥

અનન્તલીલયા યુક્તં લીલાહીનં ન વિદ્યતે ।
મયિ લીલાયુતં હીનં વર્તતે પશ્ય મે મહઃ ॥ ૭૧॥

અખણ્ડરૂપભાવેન સંસ્થિતોઽહં સદાઽમલઃ ।
નાનાવિકારહીનત્વાદ્ દ્વાભ્યાં હીનોઽહમઞ્જસા ॥ ૭૨॥

બ્રહ્મણિ સર્વભાવશ્ચ વર્તતે નાત્ર સંશયઃ ।
સદાત્મભાવસ્તત્રૈવ સામ્યં વેદે તતઃ સ્મૃતમ્ ॥ ૭૩॥

યદ્યત્ સઙ્કથ્યતે વેદે તેષુ બ્રહ્મ સ્થિતં મતમ્ ।
ન વર્ણ્યતે તથા તત્ર ન તદ્બ્રહ્મમયં કિલ ॥ ૭૪॥

અતઃ સમં સમાખ્યાતં બ્રહ્મ વેદવિવાદતઃ ।
આનન્દમુભયાનન્દાદાસમન્તાદ્વિચારય ॥ ૭૫॥

આનન્દોઽહં ન સન્દેહો બ્રહ્મ બ્રહ્મસુ સંસ્થિતમ્ ।
અનેનાનુભવેનૈવ શાન્તિયુક્તો નરો ભવેત્ ॥ ૭૬॥

અતસ્તે વ્યક્તસંજ્ઞસ્થં કથયામિ પ્રજાપતે ।
બ્રહ્માનુભવમાહાત્મ્યં યેન યોગી ભવેન્નરઃ ॥ ૭૭॥

અહમવ્યક્તરૂપશ્ચ ત્રિભિર્હીનઃ સદા મતઃ ।
ત્રિષુ મોહવિહીનોઽહં ત્રિનેતિકારકઃ પરઃ ॥ ૭૮॥

સર્વાત્મકં મયિ નાસ્તિ તથાઽમૃતમયં ન ચ ।
સામ્યં સ્વાધીનસંજ્ઞેઽથ બ્રહ્મણિ નન્દનાત્મકમ્ ॥ ૭૯॥

ઉત્થાનયુક્તહીનાખ્યો મોહઃ સર્વમયે સ્થિતઃ ।
સદાઽમૃતમયો મોહોઽખણ્ડબ્રહ્મણિ કથ્યતે ॥ ૮૦॥

નન્દનં સર્વભાવેષુ સમત્વાન્મોહરૂપકમ્ ।
સદા સ્વાધીનતા તેષુ કુતસ્ત્રિષુ ભવેત્ કિલ ॥ ૮૧॥

ત્રિભિર્યુક્તોઽહમત્યન્તં તદપિ ત્રિવિમોહતઃ ।
ભિન્નઃ સદા ત્રયાણાં તુ નેતિ કર્તાહઽમઞ્જસા ॥ ૮૨॥

નાનાભાવસમાયુક્તં ભાવહીનં તતઃ પરમ્ ।
સામ્યમુભયગં તેભ્યઃ પરોઽવ્યક્તસ્તતઃ સ્મૃતઃ ॥ ૮૩॥

સૃષ્ટ્વાઽહં ત્રિવિધાં માયાં તત્ર ખેલકરો મુદા ।
મોહહીનોઽહં તદપિ માયાયાઃ સ્વપ્રભાવતઃ ॥ ૮૪॥

મદાજ્ઞયા ત્રયં નિત્યં ચલત્યત્ર ન સંશયઃ ।
સ્વસ્વવ્યાપારસંયુક્તં સ્વાધીનોઽહં પ્રભાવતઃ ॥ ૮૫॥

ત્રયાણામન્તરે પ્રજ્ઞસ્તિષ્ઠામ્યત્ર ન સંશયઃ ।
મમાન્તરે કોઽપિ ન વૈ પ્રેરકઃ સાધુસત્તમ ॥ ૮૬॥

સ્વસ્વભાવેષુ નિત્યં તુ પ્રેરકસ્ત્રિષુ સંસ્થિતઃ ।
તથાપિ નૈવ મે મોહો નાહં પ્રેરક ઉચ્યતે ॥ ૮૭॥

અહમવ્યક્તરૂપશ્ચ વેદે સદ્ભુથિતો મતઃ ।
નેહ નાનાસ્તિભાવાખ્યઃ સદા નાનાત્રિવર્જિતઃ ॥ ૮૮॥

નેહ નાનાપ્રમાણેનાઽવ્યક્તં બ્રહ્મ સનાતનમ્ ।
તદેવાહં સુખે સક્તઃ સદા બ્રહ્મણિ યોગતઃ ॥ ૮૯॥

સર્વેષાં નેતિ કર્તાઽહં મહાદણ્ડધરઃ પ્રભુઃ ।
નેતિ કર્તા નાસ્તિ મે કસ્તેનાવ્યક્તોઽહમઞ્જસા ॥ ૯૦॥

મનોવાણીવિહીનોઽહમવ્યક્તઃ પરમો મતઃ ।
અનેનાનુભવેનૈવ શાન્તિં પ્રાપ્નોતિ માનવઃ ॥ ૯૧॥

અથ પૂર્ણનિજાનન્દાનુભવં શ‍ૃણુ સૌખ્યદમ્ ।

યેન સ્વાનન્દસંયુક્તો ભવિષ્યસિ મહામતે ॥ ૯૨॥

અહં બ્રહ્મમયઃ સાક્ષાન્ મયિ મોહવિવર્જિતમ્ ।
(Page ખં. ૯ અ. ૬ પાન ૨૨)
કુતો મોહયુતં બ્રહ્મ નિજરૂપે ભવેત્ કદા ॥ ૯૩॥

મહાવાક્યયુતા વેદા યદા લીનાઃ સમાધિના ।
તદા સ્વાનન્દગાઃ પ્રોક્તાઃ પશ્ય વેદે મહાત્મભિઃ ॥ ૯૪॥

અહમ્ભાવયુતો જન્તુર્માયયા તુર્યભાવયા ।
મોહહીનશ્ચ યુક્તશ્ચ ભવતિ ભ્રમભાવતઃ ॥ ૯૫॥

ચતુર્વિધં મયા સૃષ્ટં નાનાભાવપરાયણમ્ ।
ભાવહીનં સમાનં ચાવ્યયં તેષુ સ્થિતેન વૈ ॥ ૯૬॥

બ્રહ્મદોષવિહીનં તુ દોષયુક્તં પ્રકીર્તિતમ્ ।
સામ્યં નેતિમયં વેદે ચતુર્હીનપરં ભવેત્ ॥ ૯૭॥

સ્વાનન્દે તન્મયો યોગી ભવતે યઃ સમાધિના ।
ન પશ્યતિ પુનર્હ્યત્ર ચતુર્ષુ મોહિતાત્મસુ ॥ ૯૮॥

સમાધિના યુતો યોગી નિજરૂપે લયં ગતઃ ।
ન પુનર્દર્શનં તસ્ય તેષાં તત્ર પ્રવર્તતે ॥ ૯૯॥

કીદૃશોઽહમિમાં માયાં યસ્ત્યક્ત્વા યોગસંયુતઃ ।
બ્રહ્મણિ બ્રહ્મભૂતઃ સ ભવતિ સ્વસ્વરૂપિણિ ॥ ૧૦૦॥

યદા બ્રહ્મણિ યોગેન તન્મયો ભવતિ સ્વયમ્ ।
સ્વપરાદિકમેવેદં પુનર્વદ કુતઃ પ્રભો ॥ ૧૦૧॥

અહં બ્રહ્મેતિ યત્ પ્રોક્તં પશ્ય વેદે વિચારતઃ ।
તેનૈવ કૃતકૃત્યઃ સ ભવતિ યોગસેવયા ॥ ૧૦૨॥

એવં સંયોગયોગેન ભવેત્ બ્રહ્મણિ તન્મયઃ ।
શાન્તિયુક્તઃ સ વૈ સાક્ષાત્ વર્તતે શાન્તિધારકઃ ॥ ૧૦૩॥

અતઃ પરમયોગાખ્યં વદામિ યોગમુત્તમમ્ ।
તત્રાનુભવમાત્રેણ શાન્તિયુક્તો નરો ભવેત્ ॥ ૧૦૪॥

અહં બ્રહ્મેતિ યત્ પ્રોક્તં કુતસ્તત્ર ભવેદિદમ્ ।
તન્મયત્વં પ્રજાનાથ બ્રહ્મ બ્રહ્મણિ સંસ્થિતમ્ ॥ ૧૦૫॥

બ્રહ્મ વાણીવિહીનં ચ મનોગતિવિવર્જિતમ્ ।
તદેવ નાગતં કુત્ર ન બ્રહ્મણિ ગતં પુનઃ ॥ ૧૦૬॥

યદા ભિન્નં વિહારેષુ સંસક્તં જાયતે પરમ્ ।
તદા યોગેન સ્વાનન્દયુક્તં ભવતિ નાન્યથા ॥ ૧૦૭॥

બ્રહ્મ બ્રહ્મણિ સંસ્થં ચ નાગતં ન ગતં મતમ્ ।
કુતો યોગેન તત્રૈવ તન્મયો જાયતે નરઃ ॥ ૧૦૮॥

સદાઽહં બ્રહ્મરૂપશ્ચ ન માયાસંયુતઃ કદા ।
ભ્રાન્ત્યા માં નૈવ જાનન્તિ સ્વમહિમ્નિ સ્થિતં પરમ્ ॥ ૧૦૯॥

સર્વસંયોગયોગાખ્યા માયા નાનાભ્રમાત્મિકા ।
મયિ બ્રહ્મણિ સા કુત્ર તિષ્ઠતિ બ્રહ્મવર્જિતા ॥ ૧૧૦॥

યથા મરીચિસંસ્થં ચ તોયં વ્યર્થભ્રમપ્રદમ્ ।
તથા મયિ મહામાયા વ્યર્થા સંયોગધારિકા ॥ ૧૧૧॥

બ્રહ્મદોષવિહીનં તુ વેદ સઙ્કુથિતં પુરા ।
તદેવ માયયા યુક્તં કથં ભવતિ મોહિતમ્ ॥ ૧૧૨॥

ભ્રાન્તિયુક્તં સુયોગેન ભ્રાન્તિહીનં ભવેત્ કથમ્ ।
બ્રહ્મમાયાયુતા મૂર્ખો વદન્તિ બ્રહ્મવર્જિતાઃ ॥ ૧૧૩॥

અતોઽહં નાગતઃ પશ્ય જગત્સુ બ્રહ્મસુ પ્રભુઃ ।
ન બ્રહ્મણિ ગતસ્તત્ર પુનર્યોગસ્ય સેવયા ॥ ૧૧૪॥

બ્રહ્મણિ વિવિધાકારા માયા નૈવ પ્રતિષ્ઠતિ ।
માયાયાં નૈવ તદ્બ્રહ્મ હ્યપવાદપ્રભાવતઃ ॥ ૧૧૫॥

અયોગસ્ત્રિવિધઃ પ્રોક્તો મૃદુમધ્યાધિમાત્રતઃ ।
તેષાં ભેદં પ્રવક્ષ્યામિ માયામૂલનિકૃન્તનમ્ ॥ ૧૧૬॥

સ્વતોત્થાનભ્રમં ત્યક્ત્વાઽહં બ્રહ્મ હ્યપવાદતઃ ।
યસ્તિષ્ઠતિ નરઃ સોઽપિ મૃદુયોગયુતો મતઃ ॥ ૧૧૭॥

પરતોત્થાનજં દક્ષ ભ્રમં ત્યક્ત્વા હ્યયોગતઃ ।
તિષ્ઠતિ મધ્યગઃ સોઽપિ મતો યોગસ્ય સેવયા ॥ ૧૧૮॥

(Page ખં. ૯ અ. ૬ પાન ૨૩)

સ્વતઃ પરત ઉત્થાનહીનં સંયોગધારકમ્ ।
બ્રહ્મ તસ્ય ભ્રમં ત્યક્ત્વા તિષ્ઠતિ સોઽધિમાત્રગઃ ॥ ૧૧૯॥

નાઽઽગતોઽહં યદા ભ્રાન્ત્યા જગત્સુ બ્રહ્મસુ ભ્રમન્ ।
તદા મે ગમનં કુત્ર યોગેનૈવ ભવિષ્યતિ ॥ ૧૨૦॥

બ્રહ્મભૂતસ્વભાવેન સ તિષ્ઠતિ નરોત્તમઃ ।
નિવૃત્તિયોગમાશ્રિત્ય સદા શાન્ત્યા પ્રવર્તતે ॥ ૧૨૧॥

અધુના પૂર્ણયોગસ્યાનુભવં તે વદામ્યહમ્ ।
યોગી યેન નરો ભૂત્વા તિષ્ઠતિ ગણપપ્રિયઃ ॥ ૧૨૨॥

નાહં ન બ્રહ્મ વેદેષુ કથિતં ભેદભ્રાન્તિદમ્ ।
બ્રહ્મણિ દ્વિવિધં દક્ષ કુતો ભવતિ ચિત્તગમ્ ॥ ૧૨૩॥

અહં ચિત્તમયશ્ચૈવ બ્રહ્મ ચિત્તમયં તથા ।
ચિત્તં પઞ્ચવિધં ત્યક્ત્વા યોગી ભવતિ માનવઃ ॥ ૧૨૪॥

જગદ્રૂપં મહચ્ચિત્તં બ્રહ્મરૂપં તથા મતમ્ ।
જગતાં બ્રહ્મણાં સંયોગાયોગં ચિત્તમુચ્યતે ॥ ૧૨૫॥

ભ્રાન્તિયુક્તં ભવેચ્ચિત્તં નાનામાયાવિમોહિતમ્ ।
યોગસેવાપરં ચિત્તં ભ્રાન્તિહીનં તથા ભવેત્ ॥ ૧૨૬॥

અહં કુતસ્તથા બ્રહ્મ કુતસ્તયોશ્ચ યોગતઃ ।
અભેદઃ સર્વગં ચિત્તં ક્રીડત્યત્ર ન સંશયઃ ॥ ૧૨૭॥

નાહં સર્વત્ર યોગેન સંયોગાભેદભાવતઃ ।
તિષ્ઠામિ ચિત્તમોહેન વદન્ત્યયોગિનો મુધા ॥ ૧૨૮॥

બ્રહ્મ બ્રહ્મણિ સંસ્થં યન્નાગતં ન ગતં કદા ।
અયોગધારકોઽહં ન ચિત્તં તદેવ સમ્મતમ્ ॥ ૧૨૯॥

ધર્મમિચ્છતિ ચિત્તં ચ ભ્રમયુક્તં તથાર્થકમ્ ।
કામં મોક્ષં બ્રહ્મભૂતં પઞ્ચભૂમિપ્રભાવતઃ ॥ ૧૩૦॥

ચિત્તં ત્યક્ત્વા મહાયોગી પઞ્ચરૂપં સુશાન્તિગઃ ।
બ્રહ્મભૂતો ભવેન્નૂનં ચિન્તામણિઃ પ્રકથ્યતે ॥ ૧૩૧॥

ચિત્તરૂપા મહાબુદ્ધિસ્તત્ર ભ્રાન્તિપ્રદાયિકા ।
સિદ્ધિસ્તયોઃ પતિઃ સાક્ષાત્ ક્રીડતિ સ્વેચ્છયાઽપરઃ ॥ ૧૩૨॥

તં જ્ઞાત્વા બ્રહ્મભૂતશ્ચ ભવત્યત્ર ન સંશયઃ ।
સિદ્ધિબુદ્ધિમયં સર્વં ત્યક્ત્વા યોગી પ્રજાપતે ॥ ૧૩૩॥

નૈવ બ્રહ્મણિ સંયોગો નાયોગો વર્તતે કદા ।
સિદ્ધિબુદ્ધિભ્રમેણૈવ પરં વાઞ્છતિ તત્પતિઃ ॥ ૧૩૪॥

ગણેશોઽહં ન સન્દેહો કુતો મયિ ભવેદિદમ્ ।
સિદ્ધિબુદ્ધિકૃતં સર્વં તેન યોગી સ જાયતે ॥ ૧૩૫॥

સિદ્ધિબુદ્ધિસમાયુક્તો બ્રહ્મભૂતો નરો ભવેત્ ।
શાન્તિયોગેન શાન્તિસ્થો વર્તતે નિત્યમાદરાત્ ॥ ૧૩૬॥

બ્રહ્મણિ યોગભાવેન માયાયુક્તવિહીનતા ।
શાન્તિં પ્રાપ્તઃ સ્વયં ત્યક્ત્વા યોગં યોગી સ જાયતે ॥ ૧૩૭॥

એતાદૃશભવેનૈવાનુભવેન યુતં પરમ્ ।
ચિત્તં ભ્રાન્તિભવં સર્વં રસં ત્યક્ત્વા સુતિષ્ઠતિ ॥ ૧૩૮॥

યોગે રસસમાયુક્તં સદા ભવતિ તત્પરમ્ ।
નિશ્ચલં શાન્તિસંયુક્તં માયામલવિવર્જિતમ્ ॥ ૧૩૯॥

એતત્તે કથિતં સર્વમનુભવભવં સુખમ્ ।
યજ્જ્ઞાત્વા બ્રહ્મભૂતઃ સ તિષ્ઠત્યત્ર ન સંશયઃ ॥ ૧૪૦॥

શ ृણુયાદ્યઃ પઠેદ્વાઽપિ યોગાનુભવરૂપગમ્ ।
માહાત્મ્યં સ લભેત્ સર્વં વાઞ્છિતં શાન્તિમાપ્નુયાત્ ॥ ૧૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન યોગિચિત્તાનુભવશાન્તિસુખવર્ણનયોગો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૯.૬
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ દ્વિતીયોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૨

## ૯.૭ યોગસ્થિતિવર્ણનયોગો નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
સ્થિતિં વદ મહાયોગિન્ જીવન્મુક્તસ્ય સૌખ્યદામ્ ।

શુભાશુભકૃતં તેન કુત્ર ગચ્છતિ તત્પરમ્ ॥ ૧॥

કાયિકં વાચિકં માનસિકં સાંસર્ગિકં પ્રભો ।
કર્મ યોગિકૃતં સર્વં કીદૃશં તસ્ય કા ગતિઃ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
જીવન્મુક્તઃ સ્વયં યોગી સ્વેચ્છાચારી ભવેત્ સદા ।
પ્રારબ્ધપ્રેરિતઃ સાક્ષાદ્ વર્તતે નિત્યમાદરાત્ ॥ ૩॥

સ્વયં બ્રહ્મણિ સંસ્થશ્ચ બિમ્બં ચિત્તે પ્રતિષ્ઠતિ ।
યોગિનસ્તત્કૃતં સર્વં ન કદા બન્ધદં ભવેત્ ॥ ૪॥

નરવત્ સર્વકર્તાઽપિ તથાઽપિ દોષવર્જિતઃ ।
બ્રહ્મણિ બ્રહ્મભૂતત્વાચ્છુભાશુભવિવર્જિતઃ ॥ ૫॥

પ્રારબ્ધેન સ્વયં યોગી પ્રેરિતઃ પુણ્યમાચરેત્ ।
તીર્થયાત્રાદિકં સર્વં યજ્ઞદેવાર્ચનાદિકમ્ ॥ ૬॥

સદા શૌચસમાયુક્તો નિત્યં ધર્મપરાયણઃ ।
તથાપિ પુણ્યજં ભોગં ભુનક્તિ નૈવ નિશ્ચિતમ્ ॥ ૭॥

અથવા પૂર્વજેનૈવ પ્રારબ્ધેન નિયન્ત્રિતઃ ।
પાપાનિ નિત્યમાનન્દાત્ પ્રકુર્યાદ્વિવિધાનિ સઃ ॥ ૮॥

બ્રહ્મહત્યાદિકં સર્વં માતૃગમનકાદિકમ્ ।
મદ્યપાનાદિકં ચૌર્યં પ્રકુર્યાદ્ દૈવયોગતઃ ॥ ૯॥

એવં પાપસમાચારો યદિ તિષ્ઠતિ માનવઃ ।
યોગી પાપફલં નૈવ ભુનક્તિ નરવત્ કદા ॥ ૧૦॥

પૂર્વજન્માર્જિતેનૈવ પ્રારબ્ધેન પ્રજાપતે ।
કારિતં યોગિના તત્ર તેન કિઞ્ચિત્ કૃતં ન ચ ॥ ૧૧॥

મરણે યા મતિઃ પ્રાપ્તા તાદૃશીં લભતે ગતિમ્ ।
નરો હ્યયોગયુક્તો યો યોગી બ્રહ્મૈવ જાયતે ॥ ૧૨॥

ઇદં સંશયનાશાર્થં કથિતં બ્રહ્મણઃ સુત ।
યોગિનાં કર્મજં સર્વં માહાત્મ્યં લેશતો મયા ॥ ૧૩॥

યોગી યોગસમાયુક્તો ન પાપાનિ કદાચન ।
ચરતિ ધર્મનિષ્ઠઃ સ ભવત્યત્ર ન સંશયઃ ॥ ૧૪॥

લોકોદ્ધારકરાઃ સર્વે યોગિનઃ પરિકીર્તિતાઃ ।
નાચરન્તિ કદા પાપમહિંસાદિસમન્વિતાઃ ॥ ૧૫॥

(Page  ખં. ૯ અ. ૭ પાન ૨૫)
ફલહીનસ્વભાવેન ધર્મં ચરતિ નિત્યદા ।
યોગી લોકોપકારાર્થં સ્વયં બ્રહ્મપરાયણઃ ॥ ૧૬॥

કદાચિત્ પૂર્વસંસ્કારાત્ પાપં તેન કૃતં પરમ્ ।
ન તત્ર પાપયુક્તોઽસૌ તદર્થો વર્ણિતઃ પુરા ॥ ૧૭॥

કિમર્થં પ્રાણિનાં યોગી દુઃખદાયકમાચરેત્ ।
પાપં પાપસમાયુક્તો ન ભવેન્નિશ્ચિતં પુરા ॥ ૧૮॥

સર્વત્ર ગણનાથં સ પશ્યત્યનન્યચક્ષુષા ।
પુણ્યેન સુખસંયુક્તં વિશ્વં ભવતિ તચ્ચરેત્ ॥ ૧૯॥

પ્રારબ્ધં યોગિનાં દક્ષ ન ભવેત્ પાપકારકમ્ ।
પુણ્યચેષ્ટાસમાયુક્તં તેષાં પ્રારબ્ધમઞ્જસા ॥ ૨૦॥

યોગાર્થં ધર્મસંયુક્તો બ્રહ્માર્પણવિધાનતઃ ।
યતતે જન્મસુ પ્રાજ્ઞસ્તદા યોગી ભવેન્નરઃ ॥ ૨૧॥

તસ્ય પ્રારબ્ધકં દક્ષ કુતો દુર્બુદ્ધિદાયકમ્ ।
ભવતિ ચ મહાયોગી ધર્મયુક્તો ભવેત્ સદા ॥ ૨૨॥

અથ યોગિજનાનાં તે સ્થિતિં વદામિ સર્વદા ।
ક્રમયુક્તો યથા યોગી ભ્રાન્તો નૈવ ભવેત્ કદા ॥ ૨૩॥

સાધયિત્વા મહાયોગં ચિત્તનિરોધકારકમ્ ।
પઞ્ચવિધં પરિત્યજ્ય ચિત્તં યોગી ભવેન્નરઃ ॥ ૨૪॥

ચિત્તે ચિન્તામણિં જ્ઞાત્વા સચિત્તઃ સહસા ગતઃ ।
તદાકારઃ સ વૈ યોગી તત્ર બ્રહ્મણિ સંરતઃ ॥ ૨૫॥

પ્રારબ્ધં યોગિનાં નાસ્તિ ભોગદં શાસ્ત્રસમ્મતમ્ ।
યદા હઠયુતો યોગી ભવેત્ પ્રારબ્ધચાલકઃ ॥ ૨૬॥

દેહપાતં પ્રકુર્યાચ્ચેદાત્મહત્યાં લભેન્ન ચ ।
આયુષા સંયુતો વાઽપિ દેહં ત્યજતિ નિશ્ચિતમ્ ॥ ૨૭॥

તથાપિ યોગસંયુક્તો ન દેહં ત્યજતિ પ્રભુઃ ।
ન પ્રારબ્ધમતિક્રમ્ય કરોતિ કિઞ્ચિદઞ્જસા ॥ ૨૮॥

શાન્તિયુક્તસ્વભોવન તિષ્ઠત્યત્ર ન સંશયઃ ।
યદ્ભાવિ તદ્ભવત્યેવ માયામોહવિવર્જિતઃ ॥ ૨૯॥

દેહપાતેન કિં ગ્રાહ્યં દેહરક્ષણતસ્તથા ।
રચિતં ગણનાથેન સદા ભવતુ તાદૃશમ્ ॥ ૩૦॥

એવં નિશ્ચિત્ય ચિત્તેન શાન્તિયુક્તસ્વભાવતઃ ।
આચરેદ્યોગસંયુક્તઃ સ્વધર્મે સંસ્થિતાં ક્રિયામ્ ॥ ૩૧॥

વર્ણાશ્રમયુતો યોગી ભવેદ્યદિ સ સર્વદા ।
તદા સ્વધર્મજં કુર્યાત્ કર્મ નિઃસઙ્ગભાવતઃ ॥ ૩૨॥

દેહઃ કર્મમયઃ પ્રોક્તસ્તસ્થોઽકર્મી કુતો ભવેત્ ।
વ્યવસ્થાસમ્ભવં કર્મ કૃતં ભવતિ ન હ્યપિ ॥ ૩૩॥

યદિ કર્મ પરિત્યજ્ય તિષ્ઠેદ્યોગપરાયણઃ ।
તદા દેહનિપાતેન યુક્તો ભવેન્ન સંશયઃ ॥ ૩૪॥

અન્નભક્ષણરૂપં યદ્ભવતિ કર્મ નિશ્ચિતમ્ ।
જાગૃત્સ્વપ્નાદિકં સર્વં ત્યક્ત્વા જીવતિ તત્કથમ્ ॥ ૩૫॥

ક્રિયતેઽનેન યત્કિઞ્ચિત્ સા ક્રિયા પરિકીર્તિતા ।
અતઃ કર્મમયો દેહસ્તેન ધર્મં સમાચરેત્ ॥ ૩૬॥

દેહત્યાગે સમુદ્યુક્તો યદિ યોગી ભવેત્ પ્રભો ।
સહને દ્વન્દ્વભાવસ્ય ન સમર્થઃ સ વૈ સ્મૃતઃ ॥ ૩૭॥

અશાન્તિસંયુતઃ સોઽપિ યોગહીનો યથા નરઃ ।
તથા દ્વન્દ્વં સમાલોક્ય સહને ન સમર્થકઃ ॥ ૩૮॥

ગણેશેન કૃતં તસ્યેચ્છયા સર્વં ચ યદ્ભવેત્ ।
ભવતુ તાદૃશં સર્વં સહે નિત્યં સુશાન્તિગઃ ॥ ૩૯॥

સ યોગી શાન્તિહીનો ન પ્રભવેત્ ક્વચિદઞ્જસા ।
બ્રહ્મભૂતો મહાશ્રેષ્ઠઃ પાવનઃ સર્વદેહિનામ્ ॥ ૪૦॥

અતો વર્ણાશ્રમસ્થો યો યોગી ભવેત્ સ તત્ ક્રિયામ્ ।
(Page ખં. ૯ અ. ૭ પાન ૨૬)

બ્રહ્માર્પણતયા કુર્યાદ્ હૃદિ ધ્યાત્વા ગજાનનમ્ ॥ ૪૧॥

યદિ સ્વધર્મસંયુક્તં કર્મ નૈવ સમાચરેત્ ।
તમક્રિયં સમાલોક્યાન્યે ત્યજેયુઃ સ્વધર્મકમ્ ॥ ૪૨॥

અતો લોકોપકારાર્થં યોગી કર્મ સમાચરેત્ ।
અન્યાન્ કર્મયુતાન્ કુર્યાત્ સ્વવશાન્ ધર્મપાલકઃ ॥ ૪૩॥

સર્વેભ્યશ્ચાધિકો યોગી કુર્યાત્ સત્કર્મ ધર્મદમ્ ।
તાદૃશં કર્મ સર્વેઽપિ કરિષ્યન્તિ વિશેષતઃ ॥ ૪૪॥

તેન પ્રામાણ્યમાનન્દાત્ કૃતં કર્મ પ્રજાપતે ।
તદેવ સર્વલોકાશ્ચ માન્યં કુર્વન્તિ નિશ્ચિતમ્ ॥ ૪૫॥

બ્રહ્માર્પણતયા કર્મ બન્ધદં ન ભવેત્ કદા ।
બ્રહ્મપ્રાપ્તિકરં તસ્ય ફલં પ્રોક્તં મનીષિભિઃ ॥ ૪૬॥

યોગિભિશ્ચ કૃતં કર્મ લોકસઙ્ગ્રહકારણાત્ ।
અસક્તમનસા નિત્યં નૈમિત્તિકં ન બન્ધદમ્ ॥ ૪૭॥

સદા બ્રહ્મમયત્વેન તેન કિઞ્ચિત્ કૃતં ન ચ ।
દેહસ્વભાવજો ભાવો ભવેદસ્ય નિરન્તરમ્ ॥ ૪૮॥

અન્યં માર્ગં પ્રવક્ષ્યામિ યે નિન્દન્તિ સ્તુવન્તિ તમ્ ।
યોગિનં પાપભોક્તારો ભવન્તિ પુણ્યભોગિનઃ ॥ ૪૯॥

યોગિના યત્ કૃતં પાપં તત્ સ્પ્રષ્ટું ન ક્ષમં કદા ।
નિન્દકાંસ્તત્ સમાશ્રિત્ય પ્રતિષ્ઠેત્તસ્ય નિત્યદા ॥ ૫૦॥

યોગિના યત્ કૃતં પુણ્યં તદેવ તં ન સંસ્પૃશેત્ ।
સ્તુવતસ્તાન્ સમાશ્રિત્ય નિત્યં તિષ્ઠેત્ સ્વભાવજમ્ ॥ ૫૧॥

અતો ન યોગિનાં નિન્દાં કદા કુર્યાદ્વિચક્ષણઃ ।
સેવાં સમાચરેત્તેષાં તેન સૌખ્યયુતો ભવેત્ ॥ ૫૨॥

વને યદિ સ્થિતો યોગી પ્રારબ્ધેન નિયન્ત્રિતઃ ।
ફલાદિકં તત્ર ભુઞ્જન્ શાન્ત્યા તિષ્ઠેત્ સ નિત્યદા ॥ ૫૩॥

તત્ર નિન્દાકરાસ્તસ્ય તથા સેવાકરા ન ચ ।
એક એવ મહાયોગી શુભાશુભં સમાચરેત્ ॥ ૫૪॥

તદેવ દેહપાતેઽસ્ય યોગિનશ્ચ મૃતં ભવેત્ ।
શુભાશુભં નિરાધારમુપોષણસમન્વિતમ્ ॥ ૫૫॥

એતત્તે કથિતં દક્ષ બ્રહ્મીભૂતસ્ય ચેષ્ટિતમ્ ।
કર્મ યોગમયં પૂર્ણં શ્રવણાચ્છુભદં ભવેત્ ॥ ૫૬॥

અથ યોગં પ્રવક્ષ્યામિ જ્ઞાનાત્મકમહં પરમ્ ।
યોગિભ્યઃ સુખદં પૂર્ણં શાન્તિયુક્તં વિશેષતઃ ॥ ૫૭॥

દેહઃ કર્માત્મકઃ પ્રોક્તસ્તત્ર યોગં સમાચરેત્ ।
બ્રહ્માર્પણતયા કર્મ ચાચરન્ શાન્તિધારકઃ ॥ ૫૮॥

જ્ઞાનં સ્ફૂર્તિમયં પ્રોક્તં હૃદિ તિષ્ઠતિ સર્વદા ।
વિવેકાત્મમયં તત્ર જ્ઞાનયોગં સમાચરેત્ ॥ ૫૯॥

હૃદિ યદ્યદ્ ભવેજ્જ્ઞાનં નાનાયોગાર્થસૌખ્યદમ્ ।
અથવા વિષયાર્થાનાં બોધકં તત્ સ સન્ત્યજેત્ ॥ ૬૦॥

ઉત્પત્તિનાશસંયુક્તં જ્ઞાનં વિષયબોધકમ્ ।
બ્રહ્મ સૌખ્યપ્રદં જ્ઞાનં યોગભૂમિપ્રભાવજમ્ ॥ ૬૧॥

ઉપાધિસંયુતં ચૈકમનુપાધિયુતં પરમ્ ।
તત્ત્યક્ત્વા યોગસંયુક્તો ભવેદ્યોગી મહાયશાઃ ॥ ૬૨॥

જ્ઞાનાનાં સકલાનાં ચ યોગે જ્ઞાનમયઃ સ્મૃતઃ ।
યોગસ્તત્ર ભવેલ્લીનો બ્રહ્મીભૂતસ્વભાવતઃ ॥ ૬૩॥

બ્રહ્મણિ બ્રહ્મીભૂતોઽહં મમ જ્ઞાનં કુતો ભવેત્ ।
નાનાભ્રાન્તિકરં હૃત્સ્થં ત્યક્ત્વા બ્રહ્મપરો ભવેત્ ॥ ૬૪॥

અનેન વિધિના સર્વં જ્ઞાનં ત્યક્ત્વા હૃદિ સ્થિતમ્ ।
શાન્તિયુક્તઃ સ્વયં યોગી તિષ્ઠેદ્બ્રહ્મપરાયણઃ ॥ ૬૫॥

ન કર્તાઽહં કદાચિદ્વૈ કારયિતા ન નિશ્ચિતમ્ ।
(Page ખં. ૯ અ. ૭ પાન ૨૭)
માયામોહયુતા માં તે વદન્તિ કર્મકારિણમ્ ॥ ૬૬॥

અહં સાક્ષી શરીરસ્ય યદ્દેહેન કૃતં ભવેત્ ।
તન્મયા ન કૃતં ક્વાપિ બ્રહ્માહં પરતઃ પરઃ ॥ ૬૭॥

યદ્યત્ સ્ફૂર્તિર્ભવેન્ મે વૈ સા માયા ભ્રાન્તિદાયિકા ।

ન તસ્યાં સંસ્થિતો જીવઃ સદા સાક્ષિસ્વભાવતઃ ॥ ૬૮॥

ન મોહેન સમાયુક્તો ન કદા મોહવર્જિતઃ ।
માયયા માં વદન્ત્યેવ હ્યયોગિનો ન સંશયઃ ॥ ૬૯॥

એવં સદા મહાયોગી સાક્ષિવત્સંસ્થિતો ભવેત્ ।
હૃદયજ્ઞાનયોગસ્થસ્ત્યક્ત્વા સ્ફૂર્તિભવં ભ્રમમ્ ॥ ૭૦॥

સર્વત્ર રસહીનં યન્ મનસ્તસ્ય મહાત્મનઃ ।
શાન્ત્યા યુક્તં ભવેદ્દક્ષ બ્રહ્મીભૂતસ્ય નિત્યદા ॥ ૭૧॥

એષ તે કથિતો યોગો જ્ઞાનાત્મકો વિશેષતઃ ।
સાક્ષિવદ્દેહસંસ્થઃ સ મયા તિષ્ઠતિ લેશતઃ ॥ ૭૨॥

અતઃ પરં સમં યોગં શ‌ૃણુ સ્થિતિપરાયણ ।
યં જ્ઞાત્વા બ્રહ્મભૂતો યઃ શાન્તિહીનો ભવેન્ન સઃ ॥ ૭૩॥

દેહઃ કર્મત્રયસ્તત્ર કર્મયોગં સમાચરેત્ ।
મનો વિવેકરૂપં તુ સાક્ષિત્વં તત્ર સઞ્ચરેત્ ॥ ૭૪॥

અહં બ્રહ્મ યદા દક્ષ કુતસ્તત્ર ભવેદિદમ્ ।
દ્વન્દ્વરૂપં વિશેષેણ તસ્ય વક્ષ્યામિ રૂપકમ્ ॥ ૭૫॥

દેહઃ કર્મમયઃ પ્રોક્તો વિવેકઃ કર્મવર્જિતઃ ।
દ્વન્દ્વં જ્ઞાત્વા મહાયોગી સમયોગં સમાચરેત્ ॥ ૭૬॥

દેહે કર્મમયોઽહં તુ હૃદિ સાક્ષી તથાઽમલઃ ।
ઉભયોર્યોગભાવેન ભવતિ કિઞ્ચિદઞ્જસા ॥ ૭૭॥

યદા વિવેકહીનશ્ચેત્ દેહઃ કિં તુ કરિષ્યતિ ।
દેહહીનં મનસ્તદ્વજ્જ્ઞાનદં કસ્ય વા ભવેત્ ॥ ૭૮॥

આનન્દમયભાવેન સંસ્થિતોઽહં તદાત્મકઃ ।
ઉભયત્ર તતઃ સ્વસ્વવ્યાપારં કુરુતઃ પરૌ ॥ ૭૯॥

દેહે કર્મમયોઽહં વૈ હૃદિ વિવેકધારકઃ ।
દ્વિવિધાં રચ્યતાં માયાં સદાનન્દનધર્મગઃ ॥ ૮૦॥

તયોઃ સમાનભાવેન સંસ્થિતોઽહં ન સંશયઃ ।
અનુપાધેરુપાધેશ્ચ વર્જિતો બ્રહ્મસંજ્ઞિતઃ ॥ ૮૧॥

અતઃ સમં સમાશ્રિત્ય બાહ્યાન્તરૈકભાવતઃ ।
યાદૃશં સંસ્થિતં બ્રહ્મ તાદૃશં તત્ર ચાચરેત્ ॥ ૮૨॥

દેહે કર્મકરો ભૂત્વા હૃદિ સાક્ષિમયો ભવેત્ ।
ઉભયં તત્ પરિત્યજ્યાનન્દાવસ્થાં સમાચરેત્ ॥ ૮૩॥

યદ્યદુભયભાવાખ્યં નાનાભેદમયં પરમ્ ।
તત્ર યોગમયો ભૂત્વા તિષ્ઠેદાનન્દસંયુતઃ ॥ ૮૪॥

આનન્દાનાં સમાયોગે બ્રહ્માનન્દઃ પ્રકીર્તિતઃ ।
ઉભયેષાં પ્રજાનાથ તાદૃશં ચાચરેદ્બુધઃ ॥ ૮૫॥

મદીયસઙ્ગયોગેનોભયં પ્રવર્તતે સદા ।
ઉભયં ચાચરેત્ સર્વમુભાભ્યાં વર્જિતોઽપિ સઃ ॥ ૮૬॥

ઇયમાનન્દરૂપાખ્યા કથિતા યોગિભિઃ પુરા ।
બ્રહ્મીભૂતઃ સમાસ્થાય તિષ્ઠેત્તાં શાન્તિસંયુતઃ ॥ ૮૭॥

અતઃ પરં પ્રજાનાથાવસ્થાં શ‌ૃણુ સુખપ્રદામ્ ।
સહજાખ્યાં મહાયોગી ચાચરેત્તાં વિશેષતઃ ॥ ૮૮॥

દેહઃ કર્મમયઃ પ્રોક્તસ્તત્ર યોગં સમાચરેત્ ।
બ્રહ્માર્પણતયા નિત્યં કર્મણાં યોગિસત્તમઃ ॥ ૮૯॥

હૃદિ સાક્ષિસ્વભાવેન તિષ્ઠેત્તયોઃ પરે તતઃ ।
સમભાવં સમાશ્રિત્ય ત્રિષુ ત્રૈધં પ્રકીર્તિતમ્ ॥ ૯૦॥

તેષુ વિસ્મૃતિભાવેન ભ્રાન્ત્યા વા વિસ્મૃતં ભવેત્ ।
વિપરીતં ભવેદ્વાઽપિ તતઃ ખેદં ન ધારયેત્ ॥ ૯૧॥

ત્રિવિધં માયયા યુક્તં પરાધીનં પ્રકીર્તિતમ્ ।
તુર્યં સ્વાધીનરૂપાખ્યં પ્રોક્તં શાસ્ત્રેષુ સર્વદા ॥ ૯૨॥

તુર્યેચ્છયા ત્રિધા ભૂતં ચલત્યત્ર ન સંશયઃ ।
સ્વસ્વપ્રારબ્ધસંયુક્તં સદા ભ્રાન્તમિવ સ્થિતમ્ ॥ ૯૩॥

ન કસ્યાહઙ્કૃતિસ્તસ્ય તુરીયસ્ય કદાચન ।
યાદૃશં કુરુતે કર્મ તાદૃશં ફલમશ્નુતે ॥ ૯૪॥

અતઃ પ્રારબ્ધયોગેન વિસ્મૃતોઽહં સ્થિતિં પરામ્ ।
યોગરૂપાં ચ તુર્યેણ પ્રેરિતઃ સર્વધારિણા ॥ ૯૫॥

અથવા જ્ઞાનમોહેન વિપરીતં કૃતં મયા ।
ત્યક્ત્વા યોગસ્થિતિં પૂર્ણાં પ્રારબ્ધં તત્ર મુખ્યકમ્ ॥ ૯૬॥

પ્રારબ્ધધારકં પ્રોક્તં તુરીયં નાત્ર સંશયઃ ।
તસ્યેચ્છયા ચ યજ્જાતં તદેવં યોગદં ભવેત્ ॥ ૯૭॥

પરાધીનોઽહમત્યન્તં તુર્યેચ્છયા સમન્વિતઃ ।
કરોમિ કર્મ સાક્ષિત્વમાનન્દં વા ન સંશયઃ ॥ ૯૮॥

સદા સ્વાધીનભાવેન તિષ્ઠતિ બ્રહ્મ તુર્યગમ્ ।
તુરીયૈઃ ખેલકં પ્રોક્તં તસ્ય કિં બન્ધનં ભવેત્ ॥ ૯૯॥

યજ્જાતં તત્કૃતં તેન તુરીયેણ ન સંશયઃ ।
તત્ર કુત્ર સ્થિતોઽહં તુ સ્વેચ્છયા ક્રીડતિ પ્રભુઃ ॥ ૧૦૦॥

ઇયં તુ સહજાવસ્થા કથિતા તે પ્રજાપતે ।
યજ્જાતં તત્ર સા પ્રોક્તા ન કૃતા તદપિ હ્યહો ॥ ૧૦૧॥

યત્કૃતં સહ જાતેન સ્વયમેવ પ્રવર્તતે ।
યોગસ્તેન સમાખ્યાતા સહજા તુર્યસંજ્ઞિતા ॥ ૧૦૨॥

અતઃ પરં બ્રહ્મભૂતં સ્વાનન્દાખ્યં પ્રકીર્તિતમ્ ।
તત્ર યોગસ્વરૂપાખ્યાં સ્થિતિં શ‍ૃણુ સુખપ્રદામ્ ॥ ૧૦૩॥

સ્વાધીનં તુર્યભાવાખ્યં પરાધીનં ત્રિધા મતમ્ ।
તેષાં યોગે નિજાત્મસ્થો ભવેદ્યોગી નિજાત્મસુ ॥ ૧૦૪॥

ત્રિવિધં ખેલરૂપં તુ તુર્યઃ ખેલક ઉચ્યતે ।
તયોર્યોગે પ્રજાનાથ સ્વાનન્દસ્થો ભવેન્નરઃ ॥ ૧૦૫॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ય યોગિનશ્ચ કુતો ભવેત્ ।
સ્વાધીનં તુ પરાધીનં માયાયુક્તં ન સંશયઃ ॥ ૧૦૬॥

યોગસ્થિતિં સમાશ્રિત્ય બુધશ્ચત્વારિ ચાચરેત્ ।
તેષાં સંયોગરૂપેણ તિષ્ઠેત્તેષુ મહાત્મવાન્ ॥ ૧૦૭॥

કર્મયોગં સમાશ્રિત્ય દેહચેષ્ટાં સમાચરેત્ ।
જ્ઞાનયોગં તથાઽઽશ્રિત્ય સાક્ષિત્વં ચાચરેત્ બુધઃ ॥ ૧૦૮॥

સમયોગં સમાશ્રિત્ય આનન્દં આચરેત્ પરમ્ ।

સહજં સ સમાશ્રિત્ય વિપરીતેન શોકભાક્ ॥ ૧૦૯॥

ચતુર્ભિઃ સંયુતો ભૂત્વા ચતુભિર્વર્જિતસ્તથા ।
તિષ્ઠેદ્યોગમયીં દક્ષાવસ્થામાશ્રિત્ય સર્વદા ॥ ૧૧૦॥

અવસ્થા નિજરૂપે તુ કુતોઽવસ્થાપ્રધારકઃ ।
તયોર્યોગે યોગમયી વ્યવસ્થા તે પ્રકીર્તિતા ॥ ૧૧૧॥

ચતુર્મયી ચતુર્હીના યોગાવસ્થા પ્રકીર્તિતા ।
યોગિભિસ્તાં સમાશ્રિત્ય શાન્તિહીનો ભવેન્ન સઃ ॥ ૧૧૨॥

અધુના શ‍ૃણુ યોગસ્થામવસ્થાં દ્વિતીયાં પરામ્ ।
અયોગધારિકાં પૂર્ણાં સદા નિવૃત્તિદાયિકામ્ ॥ ૧૧૩॥

બ્રહ્મણિ બ્રહ્મભૂતો યો યોગી તાં સંશ્રયેત્ પરામ્ ।
યદા નિવૃત્તિસંયુક્તઃ શાન્તિહીનો ભવેન્ન સઃ ॥ ૧૧૪॥

બ્રહ્મણિ બ્રહ્મસંસ્થં તન્નાગતં ન ગતં પુનઃ ।
માયાયાં બ્રહ્મભૂતો યોઽવસ્થાયા ધારકઃ કુતઃ ॥ ૧૧૫॥

યત્ કુર્યાત્ કારયેદ્યચ્ચ તત્ર નૈવાવલોકયેત્ ।
(Page  ખં. ૯ અ. ૭ પાન ૨૯)
માયામયં વિનિશ્ચિત્ય પઞ્ચકં પઞ્ચકેષુ ગમ્ ॥ ૧૧૬॥

નાહં પઞ્ચકગશ્ચેદ્વૈ તતસ્તત્કૃતમઞ્જસા ।
કુતો મયિ પ્રદૃશ્યેતાધાર્યનિવૃત્તિગો ભવેત્ ॥ ૧૧૭॥

જીવનં મરણં જન્મ યોગો યોગાત્મિકા પરા ।
અવસ્થા મે કુતો માયામોહયુક્તં સ્મૃતં બુધૈઃ ॥ ૧૧૮॥

અથ યોગમયીં પૂર્ણામવસ્થાં શ‍ૃણુ માનદ ।
સંયોગાયોગહીનાં તાં યયા શાન્તો ભવેન્ન સઃ ॥ ૧૧૯॥

બ્રહ્મણિ બ્રહ્મભૂતોઽહં મયિ માયામયં પરમ્ ।
પઞ્ચકં ચ કુતો ભાતિ માયાહીનમયોગકમ્ ॥ ૧૨૦॥

વિધિનિષેધસંયુક્તં ચિત્તં ભવતિ સર્વદા ।
વિધિનિષેધહીનં તુ તદેવં જાયતે મુધા ॥ ૧૨૧॥

દેહેન કર્મયોગશ્ચ જ્ઞાનગો હૃદિ જાયતે ।
ઉભયત્ર સમશ્ચૈવ તુર્યેષુ સહજાત્મકઃ ॥ ૧૨૨॥

સર્વસંયોગભાવેષુ સ્વાનન્દાખ્યઃ પ્રવર્તતે ।
નિવૃત્તિષુ હ્યયોગાખ્યો યોગેષુ શાન્તિયોગકઃ ॥ ૧૨૩॥

એવં નાનાવિધં યોગં સમાસ્થાય મહામતિઃ ।
યોગી શાન્ત્યા સમાતિષ્ઠેદ્બ્રહ્મીભૂતોઽપિ નિશ્ચિતમ્ ॥ ૧૨૪॥

યોગસ્થિતિઃ સમાખ્યાતા બ્રહ્મીભૂતસુખપ્રદા ।
અનેન વિધિના દેહનિર્વાહો યોગિનાં ભવેત્ ॥ ૧૨૫॥

વર્ણાશ્રમસ્થિતો યોગી ચાચરેત્ સ્થિતિમુત્તમામ્ ।
લોકસઙ્ગ્રહકાર્યાર્થમસક્તસ્તત્ફલાદિષુ ॥ ૧૨૬॥

યદા વર્ણાશ્રમં ત્યક્ત્વા પઞ્ચમાશ્રમધારકઃ ।
ન તસ્ય સ્થિતિરૂપં તુ કદાચિન્નાત્ર સંશયઃ ॥ ૧૨૭॥

વિધિનિષેધહીનોઽયં વિનાયકો ભવેત્ સદા ।
યદ્યત્ કુર્યાત્ સ તત્ સર્વં યોગરૂપં ભવેત્ સદા ॥ ૧૨૮॥

યદિ સ્થિતિસમાયુક્તો વેદાદિષુ પ્રમાણતઃ ।
તદા વિધિયુતઃ સોઽપિ ભવેત્ પશ્ય પ્રજાપતે ॥ ૧૨૯॥

યદા સ્થિતિવિહીનોઽયં તિષ્ઠેત્ સઙ્કુથિતં પરમ્ ।
વેદેષુ સ નિષેધેન તદા યુક્તો ભવેત્ પરઃ ॥ ૧૩૦॥

અતઃ સ્થિતિયુતો યોગી સ્થિતિહીનો યથારુચિ ।
વર્ણાશ્રમાન્ પરિત્યજ્ય તિષ્ઠેદ્વિનાયકો યથા ॥ ૧૩૧॥

શાન્ત્યા નિત્યં ચરેત્ સર્વં મનસીપ્સિતમઞ્જસા ।
વિધિનિષેધહીનશ્ચ બ્રહ્મણિ રસધારકઃ ॥ ૧૩૨॥

એતત્ સર્વં સમાખ્યાતં યોગિનાં ચેષ્ટિતં મહત્ ।
બ્રહ્મભૂતાત્ પરં પૂર્ણં ચરેદેવં નિરન્તરમ્ ॥ ૧૩૩॥

શ ृણુયાદ્યઃ પઠેદ્વાઽપિ સ સર્વં હીપ્સિતં લભેત્ ।
અન્તે યોગમયો ભૂત્વા તિષ્ઠેત્ સ ગણપે રતઃ ॥ ૧૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામતાર્થશાસ્ત્રે
યોગસ્થિતિવર્ણનયોગો નામ સપ્તમોઽધ્યાયઃ ॥ ૯.૭

॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ તૃતીયોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૩

## ૯.૮ યોગભ્રષ્ટચરિતનિરૂપણં નામ અષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
યોગશાન્તિં સમાશ્રિત્ય યોગમભ્યસ્ય નિત્યદા ।
બ્રહ્મણિ બ્રહ્મભૂતઃ સ યોગભ્રષ્ટઃ કથં ભવેત્ ॥ ૧॥

માયામયં જગત્ સર્વં નાનાભ્રમસમન્વિતમ્ ।
જ્ઞાત્વા સ્વયં પુનર્ભ્રષ્ટઃ કૌતુકં વદ મે મુને ॥ ૨॥

મુદ્ગલ ઉવાચ ।
બ્રહ્મણિ બ્રહ્મભૂતસ્ય યોગિનો બિમ્બસંસ્થિતમ્ ।
બુદ્ધૌ તસ્યાં વિમોહેન મોહયુક્તં પ્રજાપતે ॥ ૩॥

દૃષ્ટ્વા નાનાવિધાન્ ભોગાન્ સ્વયં મોહેન મોહિતઃ ।
તેષુ ભૂત્વા રસયુતો તાનિચ્છતિ નિરન્તરમ્ ॥ ૪॥

તત્ર તસ્ય હૃદિ દક્ષ વિવેકઃ સંસ્થિતો ભવેત્ ।
તસ્ય રૂપં પ્રવક્ષ્યામિ શ‌ૃણુ બુદ્ધિવિશારદ ॥ ૫॥

અહં બ્રહ્મણિ યોગેન બ્રહ્મીભૂતો ન સંશયઃ ।
પાપપુણ્યાદિકં મે ન શુભાશુભકૃતે ભવેત્ ॥ ૬॥

યદા ભોગં પરિત્યજ્ય તિષ્ઠામિ નિત્યમાદરાત્ ।
તદા યોગસ્ય વૃદ્ધિર્મે ન ભવિષ્યતિ નિશ્ચિતમ્ ॥ ૭॥

યદા નિત્યં પ્રભુઞ્જાને ભોગાન્નાનાવિધાન્ પરાન્ ।
પાપપુણ્યમનાદૃત્ય તદા યોગક્ષયો ન ચ ॥ ૮॥

અતોઽહં યોગમુત્સૃજ્ય કિમર્થં દુઃખસંયુતઃ ।
તિષ્ઠામિ શાન્તિમાશ્રિત્ય વિધિનિષેધસંયુતઃ ॥ ૯॥

એવં મનસિ સન્ધાર્ય યોગી ભોગેષુ લાલસઃ ।
વિવિધેષ્વેવ ભવતિ રસયુક્તઃ ક્રમેણ સઃ ॥ ૧૦॥

અયં મોહઃ સમાખ્યાતો યોગિહૃદ્ભ્રાન્તિદાયકઃ ।
તેન શાન્તિં પરિત્યજ્ય પાપપુણ્યપરો ભવેત્ ॥ ૧૧॥

તતઃ કામં સમાશ્રિત્ય દેહસૌખ્યપ્રદાયકમ્ ।
ઇચ્છેત્ સ વિવિધાન્ ભોગાન્ પુણ્યપાપપરાયણઃ ॥ ૧૨॥

ભોગાર્થં યતમાનસ્ય યોગિનઃ ક્રમભાવતઃ ।
તત્ર વિઘ્નઃ કૃતઃ કેન તતઃ ક્રોધયુતો ભવેત્ ॥ ૧૩॥

યેન વિઘ્નઃ કૃતસ્તેષુ ભોગેષુ તસ્ય ભોગિનઃ ।
તં શત્રું સ હિ જાનાતિ ભિન્નભાવપરાયણઃ ॥ ૧૪॥

તતો હ્યજ્ઞાનસમ્ભૂતિઃ ક્રમેણોત્પદ્યતે પરા ।
યોગિનશ્ચ તયા યુક્તો હન્તું તં યતતે સદા ॥ ૧૫॥

શત્રુશિક્ષાર્થમર્થાન્ સ નાનાભાવસમન્વિતઃ ।
સમ્પાદ્ય તં તુ નિર્જિત્ય ભોગાન્ ભુઙ્ક્તે પ્રયત્નતઃ ॥ ૧૬॥

સ્વપરજ્ઞાનહીનત્વં ગતં તસ્ય પ્રજાપતે ।
તદેવાજ્ઞાનસમ્ભૂતિઃ શત્રુમિત્રપ્રદર્શિની ॥ ૧૭॥

તતઃ શાન્તેઃ ક્રમેણાસ્ય વિસ્મૃતિર્જાયતે પરા ।
તયા યુતઃ સ્વયં દેહં મન્યતે સત્યરૂપકમ્ ॥ ૧૮॥

દેહે સન્તોષમાપન્ને કૃતકૃત્યમિવ સ્થિતમ્ ।
મન્યતે વિપરીતે સ આત્માનં ભાગ્યવર્જિતમ્ ॥ ૧૯॥

તતો યોગં પરિત્યજ્ય સ્વયં બિમ્બી પ્રજાયતે ।
બિમ્બે તન્મયભાવેનાગમિષ્યતિ ન સંશયઃ ॥ ૨૦॥

એવં ક્રમેણ યોગી સ શાન્તિહીનસ્વભાવતઃ ।
સદા તિષ્ઠતિ તં યોગં નાશ્રયતે કદાચન ॥ ૨૧॥

સુખયુક્તે શરીરે સ સુખયુક્તો ભવેત્ સ્વયમ્ ।
દુઃખયુક્તે તથા દુઃખી નાનાભાવપરાયણઃ ॥ ૨૨॥

લેશમાત્રમયં શાન્તિં લભતે ન કદાચન ।
અસન્તોષયુતો નિત્યં ભ્રમતે ભોગલિપ્સયા ॥ ૨૩॥

ભોગાર્થં વિવિધાન્યેવ નિત્યં પાપાનિ ચાદરાત્ ।
ચરતે સર્વપુણ્યાનિ વિધિનિષેધવર્જિતઃ ॥ ૨૪॥

વર્ણાશ્રમયુતો યોગી સ્વધર્મં ત્યજ્ય નિત્યદા ।
પાપં ચરતિ વા પુણ્યં સ્વધર્મૈઃ સંયુતઃ કદા ॥ ૨૫॥

(Page  ખં. ૯ અ. ૮ પાન ૩૧)
યોગાન્ ભુઙ્ક્તે વિશેષેણ મોહયુક્તો નિરન્તરમ્ ।
યોગભ્રષ્ટોઽયમાખ્યાતસ્ત્યક્ત્વા યોગં નરો ભવેત્ ॥ ૨૬॥

હૃદિ તસ્ય વિવેકશ્ચ સદા તિષ્ઠતિ મોહદઃ ।
પુણ્યપાપવિહીનોઽહં બ્રહ્મૈવ બ્રહ્મભાવિતઃ ॥ ૨૭॥

અન્તે સ નરકાન્ ગચ્છેદ્ દ્વન્દ્વદુઃખપ્રદાયકાન્ ।
યાતનાં ઘોરરૂપાં તુ પતેદ્ભુક્ત્વા ધરાતલે ॥ ૨૮॥

દક્ષ ઉવાચ ।
યોગભ્રષ્ટગતિં બ્રૂહિ યોગીન્દ્ર દયયા પરામ્ ।
કથં નરકગો ભૂત્વા યાતનાં પ્રાપ્નુયાત્ પરમ્ ॥ ૨૯॥

કર્મફલપરિત્યાગાદિહજન્મધરઃ કથમ્ ।
સમ્ભવેદ્વિસ્મયો ભાતિ ચેષ્ટિતં યોગિનઃ પરમ્ ॥ ૩૦॥

મુદ્ગલ ઉવાચ ।
બ્રહ્મણિ બ્રહ્મભૂતસ્ય પુનર્વિષયસેવનાત્ ।
બ્રહ્મણો ભક્તિહીનસ્યાન્તે સ્થાનં ન ભવેત્ કિલ ॥ ૩૧॥

અપારપુણ્યયોગેન બ્રહ્મણિ દેહિનઃ કદા ।
રસોત્પત્તિર્ભવેદ્દક્ષ સર્વશ્રેષ્ઠસ્ય યોગદા ॥ ૩૨॥

દેહવિષયસંયોગાદ્ દ્વન્દ્વભાવપરાત્મનઃ ।
નાનાપાપાદિયોગેન પુણ્યં સ્વલ્પં પ્રહીયતે ॥ ૩૩॥

મૃતોઽયં શિવલોકે વૈ વૈકુણ્ઠે સૌરશાક્તયોઃ ।
બ્રહ્મણ ઇન્દ્રલોકે વા પતેદન્તે ન સંશયઃ ॥ ૩૪॥

શોકહર્ષપ્રદં વિશ્વં નાનાદ્વન્દ્વસમન્વિતમ્ ।
નરકો નાત્ર સન્દેહો યોગિનાં શાસ્ત્રસમ્મતમ્ ॥ ૩૫॥

ઉત્પત્તિનાશસંયુક્તં ત્યક્ત્વા બ્રહ્મપરાયણઃ ।
બ્રહ્મણિ બ્રહ્મભૂતઃ સ પુનર્દ્વન્દ્વપરો યતઃ ॥ ૩૬॥

વિકુણ્ઠાદિપદે સંસ્થો દ્વન્દ્વં ભુઙ્ક્તે નિરન્તરમ્ ।
ઉત્પત્તિનાશસંયુક્તં નાનાભોગપરાયણઃ ॥ ૩૭॥

અતો યોગી પ્રજાનાથ સ્વર્ગાખ્યાન્નરકાન્ પરાન્ ।
ભુક્ત્વા દ્વન્દ્વમયાન્ પશ્ચાદિહ જન્મધરો ભવત્ ॥ ૩૮॥

ભવેદ્યોગિકુલે તસ્ય જન્મ વા તાપસે કુલે ।
ઋદ્ધિમતાં સ તત્રાપિ પુનર્યોગં ચરિષ્યતિ ॥ ૩૯॥

પૂર્વસંસ્કારયોગેન ન ભોગે સ રમેત્ કદા ।
ચિત્તં તસ્ય મહાયોગી પ્રભવેત્ સ્વલ્પયોગતઃ ॥ ૪૦॥

પુનર્ન યોગભ્રષ્ટઃ સ સમ્ભવેદ્બ્રહ્મણઃ સુત ।
શાન્ત્યાયુક્તસ્વભાવેન શરીરં પોષયેન્ મુદા ॥ ૪૧॥

અન્તે બ્રહ્મણિ યોગી સ તદાકારો ભવેત્ પરમ્ ।
યોગસંસ્કારપુણ્યેન સ્થિતિં લબ્ધ્વા મહામતિઃ ॥ ૪૨॥

એતત્તે કથિતં પૂર્ણં યોગભ્રષ્ટસ્ય ચેષ્ટિતમ્ ।
કિં પુનઃ શ્રોતુમિચ્છા તે વદ ધાતર્વદામ્યહમ્ ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
યોગભ્રષ્ટચરિતનિરૂપણં નામ અષ્ટમોऽધ્યાયઃ ॥ ૯.૮
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ ચતુર્થોऽધ્યાયઃ ॥ ૯(દત્તગીતા).૪
(Page ખં. ૯ અ. ૯ પાન ૩૨)

## ૯.૯ અજ્ઞાનિનાં ક્રમયોગવર્ણનં નામ નવમોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ચિત્તં ચઞ્ચલમત્યન્તં વિષયેષુ પરાયણમ્ ।
દુર્ગ્રહં શાન્તિસંયુક્તં ન ભવેન્ મુનિસત્તમ ॥ ૧॥

અતો યોગસ્ય પ્રાપ્ત્યર્થં સિદ્ધ્યર્થં સુગમં તતઃ ।
ઉપાયં વદ ચિત્તસ્ય જયાર્થં વાऽપરં પ્રભો ॥ ૨॥

મુદ્ગલ ઉવાચ ।
પઞ્ચચિત્તેષુ યદ્બિમ્બં સ્થિતં ભ્રાન્ત્યા સમન્વિતમ્ ।
ચિન્તામણેઃ સમાખ્યાતં તસ્યૈવ ભજનં ચરેત્ ॥ ૩॥

તેન ચિત્તં જયેદ્યોગી નાન્યં પશ્યામિ ભો વિધે ।
વિના ચિત્તજયં યોગદાયકં નાત્ર સંશયઃ ॥ ૪॥

દક્ષ ઉવાચ ।
સુગમં વદ માર્ગં મે સર્વેભ્યો બ્રહ્મદાયકમ્ ।
સંસેવ્ય જન્તવઃ સર્વે બ્રહ્મીભૂતા ભવન્તિ વૈ ॥ ૫॥

મુદ્ગલ ઉવાચ ।
અજ્ઞાનેન સમાયુક્તો નરો વિષયલમ્પટઃ ।
શિશ્નોદરપરો નિત્યં યોગં નેચ્છતિ કર્હિચિત્ ॥ ૬॥

તસ્ય સકામિકં કર્મ સુખદં બોધયેત્ પરમ્ ।
અલભ્યપ્રાપકં હૃદ્યમાચરેલ્લોભસંયુતઃ ॥ ૭॥

અલભ્યલભ્યલોભેન ત્યક્ત્વા પાપં મહાખલઃ ।
સત્કર્મનિરતો ભૂત્વા ચરેત્ પુણ્યં નિરન્તરમ્ ॥ ૮॥

તતસ્તેનૈકભાવેન પાપં નશ્યેન્નિરન્તરમ્ ।
શુદ્ધોઽત્યન્તં નરઃ કુર્યાત્ કર્મ કામયુતં પરમ્ ॥ ૯॥

સમાપ્નુયાત્તતોઽલભ્યં હૃદ્યં ચેત્ પુનરેવ સઃ ।
વિશ્વાસેન સમાયુક્તઃ કુર્યાત્ કર્મ વિશેષતઃ ॥ ૧૦॥

અથવા નૈવ સમ્પ્રાપ્તમલભ્યં તેન તં તદા ।
ઉપાદિશેદ્વિશેષેણાધિકં સત્કર્મ ચાચર ॥ ૧૧॥

અનન્તજન્મભિઃ પાપં ત્વયા કૃતમસંશયમ્ ।
અપારમન્તરાયો ભવતિ તે તદ્વિઘાતકમ્ ॥ ૧૨॥

એવં કર્મપરઃ સોઽપિ દુઃખિતોઽત્યન્તમાચરેત્ ।
પાપનાશાર્થમાનન્દાત્તેન શુદ્ધાન્તરો ભવેત્ ॥ ૧૩॥

સત્કામિકપરસ્યાસ્ય કર્માત્યન્તપ્રભાવતઃ ।
તસ્ય બુદ્ધિર્ભવેત્ દક્ષ નિઃકામિકપરાયણા ॥ ૧૪॥

જન્મમૃત્યુપ્રદા ભોગા ભુક્તા વિવિધજન્મસુ ।
અપારસુખદં બ્રહ્મ ન પ્રાપ્તં દેહધારિણા ॥ ૧૫॥

અલભ્યં ન મયા પ્રાપ્તં પ્રારબ્ધાધીનતોઽથવા ।
પ્રારબ્ધં ચાલિતું કોઽપિ ન સમર્થો ભવિષ્યતિ ॥ ૧૬॥

અતો નિઃકામિકં કર્મ કરોમિ નિત્યમાદરાત્ ।
જન્મમૃત્યુવિહીનોઽહં ભવિષ્યામિ ન સંશયઃ ॥ ૧૭॥

બ્રહ્મસુખમપારં યલ્લબ્ધ્વા બ્રહ્મપરાયણઃ ।
બ્રહ્મીભૂતો ભવિષ્યામિ યત્નં કરોમિ તત્પરઃ ॥ ૧૮॥

એવં ધાર્ય પરિત્યજ્ય કામાન્ સેવેત્ સ પઞ્ચકાન્ ।
દેવાન્ ગણેશમુખ્યાંશ્ચ મુક્તિમાર્ગપરાયણઃ ॥ ૧૯॥

સાલોક્યાદિભવં સૌખ્યમિચ્છતિ નિત્યમાદરાત્ ।
ક્રમેણ તપસા યુક્તો પ્રભવેન્ માનવસ્તતઃ ॥ ૨૦॥

વિભૂતિર્બ્રહ્મણઃ પ્રોક્તા નાનારૂપા પ્રજાપતે ।
તત્ર તસ્ય રમેચ્ચિત્તમૈશ્વર્યૈર્યુક્તભાવતઃ ॥ ૨૧॥

ઇમે સમર્થરૂપા વૈ બ્રહ્મણઃ પરમાત્મનઃ ।
અંશતેજોધરાસ્તસ્ય સર્વાધીશા ભવન્ત્યતઃ ॥ ૨૨॥

એવં સર્વત્ર સઞ્ચિન્ત્ય તેષાં પૂજાપરો ભવેત્ ।
લભેત્તત્ કૃપયા દક્ષ ચિત્તશુદ્ધિં નરોત્તમઃ ॥ ૨૩॥

વિચારેણ ગણેશાનં જ્ઞાત્વા સમ્પૂર્ણમઞ્જસા ।
સર્વપૂજ્યાદિચિહ્નૈસ્તં શ્રેષ્ઠં તત્ર રતો ભવેત્ ॥ ૨૪॥

જ્ઞાત્વા સ્વાનન્દનાથં તં સ્વાનન્દાર્થં વિશેષતઃ ।
પ્રભજેદ્ગણરાજં સ નિષ્કામભક્તિસંયુતઃ ॥ ૨૫॥

તતોઽહર્નિશમત્યન્તં ભજેત્તત્તપસા યુતઃ ।
(Page ખં. ૯ અ. ૯ પાન 33)
મોક્ષાર્થં સર્વભાવેન વિરક્તો વિષયાદિષુ ॥ ૨૬॥

ગણેશકૃપયા તસ્ય ચિત્તશુદ્ધિર્ભવેત્ પરા ।
તયા સર્વસ્વભાવેન ભજેત્તં ગણનાયકમ્ ॥ ૨૭॥

વિશ્વં ચરાચરં સર્વં જાનીયાત્તત્સ્વરૂપકમ્ ।
સર્વેષાં હિતભાવેન ભજેત્તં દ્વિરદાનનમ્ ॥ ૨૮॥

કસ્યાપિ સમ્ભવેત્ દુઃખં તાદૃશં પ્રચરેન્ન સઃ ।
સહન્ સન્ દ્વન્દ્વજં ભાવમાર્જવેન સમન્વિતઃ ॥ ૨૯॥

દેવકાર્યં વિના સાધુર્ન છિન્દ્યાત્ સ કદાચન ।

પત્રાદિકં વિશેષેણ વિશ્વરૂપપરાયણઃ ॥ ૩૦॥

એકાન્તે નિર્જને સ્થાને સ્થિત્વા ધ્યાત્વા ગજાનનમ્ ।
પૂજયેદ્ભક્તિસંયુક્તો ધ્યાનં કુર્યાદ્વિશેષતઃ ॥ ૩૧॥

અનન્યમનસા દેવં ભજેત્તં ભાવધારકઃ ।
શમદમપરો ભૂત્વા ચિત્તનિગ્રહમાચરેત્ ॥ ૩૨॥

દુર્જયં ચિત્તમત્યન્તં જ્ઞાત્વા વાયુનિબન્ધતઃ ।
પ્રાણાયામપરો ભૂત્વા જયેત્તન્નાત્ર સંશયઃ ॥ ૩૩॥

અથ વાયુનિરોધસ્ય વદામિ માર્ગમુત્તમમ્ ।
યેન પાપં પરિત્યજ્ય શુદ્ધચિત્તો નરો ભવેત્ ॥ ૩૪॥

પૂરયેદ્વામનાસાયાં વાયું તસ્માચ્ચતુર્ગુણમ્ ।
ધારણં તસ્ય કુર્યાત્ સ સ્વોદરે નિયતો ભવેત્ ॥ ૩૫॥

પૂરકાદ્ દ્વિગુણં કુર્યાદ્રેચકં ચ પ્રજાપતે ।
પુનર્નસા દક્ષિણયા પૂરયેત્ કુમ્ભકં ચરેત્ ॥ ૩૬॥

વામયા રેચકં ચૈવ પુનઃ પુનર્નિરન્તરમ્ ।
પ્રાણાયામં ચરેદ્ ધીમાન્ પાપહીનો નરો ભવેત્ ॥ ૩૭॥

એવં ત્રૈકાલિકં કુર્યાત્ પ્રાણાયામં વિશેષતઃ ।
નાતિનિરોધસંયુક્તં વાયું હઠસમન્વિતઃ ॥ ૩૮॥

અતિહઠેન સંરુદ્ધો વાયૂ રોમભ્ય એવ ચ ।
નિઃસૃત્ય કુષ્ઠસંયુક્તં તં કરોતિ ન સંશયઃ ॥ ૩૯॥

નાભિમૂલસ્થિતા નાડી ઇડા ચ પિઙ્ગલાઽપરા ।
સુષુમ્ણા તત્ર રોધેન માર્ગો ભવતિ નિર્મલઃ ॥ ૪૦॥

અપાનો નાભિમૂલસ્થો હ્યધો ગચ્છતિ સર્વદા ।
પ્રાણ ઊર્ધ્વં તથા જન્તોર્નાડીભિઃ પ્રેરિતઃ સદા ॥ ૪૧॥

માર્ગરોધનભાવેન નાડ્યાં માર્ગો ભવિષ્યતિ ।
વાયુર્મૂલં સમાશ્રિત્ય તિષ્ઠતિ ક્રમતસ્તતઃ ॥ ૪૨॥

તત્ર લઘ્વક્ષરાણ્યેવ દ્વાદશાપિ પ્રતિષ્ઠતિ ।
વાયુશ્ચેત્ સ લઘુઃ પ્રોક્તઃ પ્રાણાયામશ્ચ યોગિભિઃ ॥ ૪૩॥

તતો દ્વિગુણતસ્તિષ્ઠેદ્યદા વાયુઃ સુરોધિતઃ ।
મધ્યમઃ સ સમાખ્યાતસ્ત્રિગુણાદુત્તમોત્તમઃ ॥ ૪૪॥

એવં પ્રાણમપાનં ચ સ્વમૂલે સન્નયેદ્ બુધઃ ।
તયો રોધનભાવેન મૂલગૌ તૌ ભવિષ્યતઃ ॥ ૪૫॥

એવં ક્રમેણ મૂલેઽયં વાયુર્મુહૂર્તં સંસ્થિતઃ ।
તદા સમાનગા નાડી ભિદ્યતે તત્ર સંસ્થિતા ॥ ૪૬॥

સા સુષુમ્ણા સમાખ્યાતા તત્ર સમ્મિલિતૌ ક્રમાત્ ।
પ્રાણાપાનૌ સમૌ ભૂત્વા તદ્રૂપૌ તૌ ભવિષ્યતઃ ॥ ૪૭॥

ત્રિકાલજ્ઞઃ સ્વયં સિદ્ધો ભવિષ્યતિ નરોત્તમઃ ।
વાયુસાધનપાત્રત્વં પ્રાપ્ય તેજઃસમન્વિતઃ ॥ ૪૮॥

તતઃ સ્વાધીનતાં યાતૌ પ્રાણાપાનૌ વિશેષતઃ ।
સ નયિષ્યતિ તૌ યત્ર ક્રમાત્તત્ર ગમિષ્યતઃ ॥ ૪૯॥

તતો ધ્યાનપરો ભૂત્વા ષટ્ચક્રભેદને રતઃ ।
ચક્રસ્થં સ્વસ્વરૂપં સ પશ્યેત્તદ્વાયુના ગતઃ ॥ ૫૦॥

એવં ક્રમેણ યોગીન્દ્રો ગચ્છેદ્ભેદ્ય પ્રજાપતે ।
સહસ્રારે સ ચક્રાણિ તત્ર પશ્યેદ્ગજાનનમ્ ॥ ૫૧॥

(Page ખં. ૯ અ. ૯ પાન ૩૪)
તત્ર ક્રમેણ વાયું સંસ્થાપયેત્ સુસમાધિના ।
વાયુના સંયુતસ્તિષ્ઠેત્ પશ્યન્ વિઘ્નેશ્વરં પરમ્ ॥ ૫૨॥

ક્રમાદ્વાયુબલેનૈવં શુદ્ધચિત્તો ભવિષ્યતિ ।
પશ્યેત્ સર્વત્ર ભાવેષુ સ્થિતં બ્રહ્મ સનાતનમ્ ॥ ૫૩॥

તતઃ સ્વાધીનતાયુક્તઃ પ્રભવેત્ સ્વેન તેજસા ।
યં યમિચ્છેત્ સ તં તં તુ સદ્યો વૈ સફલં ભવેત્ ॥ ૫૪॥

કિઞ્ચિદિચ્છેન્ન યો યોગી તદા યોગમવાપ્નુયાત્ ।
નો ચેચ્છન્દરતો ભૂત્વા ભોગયુક્તઃ પુનઃ પતેત્ ॥ ૫૫॥

સાધનં દ્વિવિધં પ્રોક્તં ક્રિયારૂપં પ્રજાપતે ।
બાહ્યં કર્મસ્વરૂપાખ્યં તપોયુક્તં સ્વધર્મજમ્ ॥ ૫૬॥

આન્તરં વાયુરોધાખ્યં સર્વસિદ્ધિપ્રદાયકમ્ ।

તાભ્યાં ચિત્તં વિનિર્ગૃહ્ય સ્વવશં કારયેન્નરઃ ॥ ૫૭॥

બાહ્યકર્મરતાજ્જન્તોરાન્તરં શીઘ્રસિદ્ધિદમ્ ।
સહસ્રાધિકભાવાખ્યં પ્રોક્તં યોગીન્દ્રમુખ્યકૈઃ ॥ ૫૮॥

અતઃ પરં તૃતીયં તે સાધનં કથયામ્યહમ્ ।
યેન યોગીન્દ્રસેવ્યઃ સ ધ્રુવં ભવતિ માનવઃ ॥ ૫૯॥

ચિત્તશુદ્ધેશ્ચ કાર્યાર્થં કર્મ દ્વિવિધમુચ્યતે ।
શુદ્ધચિત્તો નરઃ પશ્ચાત્ સમ્પશ્યેદ્બ્રહ્મ શાશ્વતમ્ ॥ ૬૦॥

સર્વત્ર પૂર્ણભાવેન સંસ્થિતં પરમવ્યયમ્ ।
અવયવાદિભિર્હીનં તત્ર લીનો ભવેત્ સ્વયમ્ ॥ ૬૧॥

એતાવાન્ ફલાદાતાઽયં ક્રિયાયોગઃ પ્રકીર્તિતઃ ।
બાહ્યાન્તરાત્મકઃ પૂર્ણસ્તતોઽન્યત્ સાધનં ચરેત્ ॥ ૬૨॥

ચિત્તં રસયુતં કુત્ર જાયતે યોગિનઃ પરમ્ ।
તજ્જયેદ્બ્રહ્મભાવેન શમદમપરાયણઃ ॥ ૬૩॥

સ્વધર્મસંયુતો ભૂત્વા દેહનિર્વાહકં ચરેત્ ।
દેહસ્ય શમનં તચ્ચ જાયતે સ દમઃ સ્મૃતઃ ॥ ૬૪॥

વિષયાર્થં મનસ્તસ્ય સઙ્કલ્પં યત્ સમાચરેત્ ।
તન્નેચ્છેચ્ચિત્તમાગૃહ્ય કુર્યાદ્બ્રહ્મપરાયણમ્ ॥ ૬૫॥

અયં શમઃ સમાખ્યાતસ્તેન ચિત્તં ભવેત્ પરમ્ ।
સ્વાધીનં સર્વભાવં ચ ત્યક્ત્વા બ્રહ્મપરં ભવેત્ ॥ ૬૬॥

શનૈઃ શનૈરુપરમેદ્વિષયેભ્યો મહાત્મવાન્ ।
ધૃતિં યોગમયીં ધૃત્વા ભવેદ્યોગી સ માનવઃ ॥ ૬૭॥

કર્મમાર્ગં પરિત્યજ્ય દ્વિવિધં યોગિસત્તમઃ ।
ધ્યાનયોગપરો ભૂત્વા તિષ્ઠેન્નિત્યં વદામિ તમ્ ॥ ૬૮॥

મનોવાણીવિહીનં યદ્બ્રહ્મ તત્ર સમાચરેત્ ।
ધ્યાનં સઙ્કલ્પત્યાગાખ્યં વિષયેષુ નિરન્તરમ્ ॥ ૬૯॥

યો યશ્ચિત્તેન સઙ્કલ્પઃ ક્રિયતે વિષયેષુ ચ ।
તત્તત્સઙ્કલ્પહીનં સ કારયેદ્યોગતત્પરઃ ॥ ૭૦॥

એવં ચિત્તં નરસ્યૈવ સ્વાધીનં જાયતે સદા ।
યદા ધર્તું સ નો શક્તસ્તદાન્યદાચરેદ્બુધઃ ॥ ૭૧॥

દેહેન્દ્રિયાણિ સઙ્ગૃહ્ય તિષ્ઠેદ્ભુમૌ મહાયશાઃ ।
ન ચલેત્ સ્થાણુવત્ સોઽપિ ક્રિયાં નૈવ સમાચરેત્ ॥ ૭૨॥

તત્ર યન્મિલિતં ચાન્નં જલપાનાદિકં ચરેત્ ।
પરેચ્છયા સમાયુક્તઃ સદા તિષ્ઠેન્ મહાયશાઃ ॥ ૭૩॥

કેનાપિ જલપાનાદિ ન દત્તં તાદૃશો વસેત્ ।
ન તદર્થં શ્રમેત્ સોઽપિ નેચ્છેત્ પ્રારબ્ધધારકઃ ॥ ૭૪॥

સર્પવૃશ્ચિકવ્યાઘ્રાદ્યૈઃ પીડિતો યદિ માનવઃ ।
નાનાપ્રહારયોગૈશ્ચ માનવાદિભિરેવ વા ॥ ૭૫॥

તથાપિ ન ચલેત્ સોઽપિ સ્વસ્થાનાજ્જડવત્પરઃ ।
દેહપ્રારબ્ધમાશ્રિત્ય ન તેષુ ક્રોધમાચરેત્ ॥ ૭૬॥

પૂર્વજન્મકૃતં કર્મ મયા તેન પ્રબોધિતઃ ।
(Page ખં. ૯ અ. ૯ પાન ૩૫)
ઇમે સમ્પીડયન્ત્યેવમેષાં દોષો ન વિદ્યતે ॥ ૭૭॥

અથવા સાત્ત્વિકૈસ્તત્ર પૂજિતઃ સર્વભાવતઃ ।
નિત્યં નાનાજનૈઃ સોઽપિ સેવિતો ન ચલેત્તદા ॥ ૭૮॥

પૂર્વજન્મકૃતં કર્મ પ્રેરિતાસ્તેન માનવાઃ ।
મયા માં પૂજયન્ત્યેવ ગુણ એષાં ન વિદ્યતે ॥ ૭૯॥

એવં મનસિ સન્ધાર્ય તેષાં નેચ્છેચ્છુભં કદા ।
દ્વન્દ્વમેવં પરિગૃહ્ય તિષ્ઠેન્નિત્યં મહાયશાઃ ॥ ૮૦॥

અનેન વિધિના સોઽપિ સ્વલ્પકાલેન ભો વિધે ।
ચિત્તં જયેન્ન સન્દેહઃ શાન્તિં પૂર્ણામવાપ્નુયાત્ ॥ ૮૧॥

નાન્યત્ કિઞ્ચિચ્ચરેત્ કર્મ ન ધ્યાનાદિકમાદરાત્ ।
એવં શમદમૌ ધૃત્વા ભવેદ્યોગી સ માનવઃ ॥ ૮૨॥

વિચારં બ્રહ્મણસ્તત્ર કુર્યાન્નિત્યં વિશેષતઃ ।
કીદૃશં બ્રહ્મ હૃત્સ્થં મે વેદાદ્યૈઃ પ્રતિપાદિતમ્ ॥ ૮૩॥

પઞ્ચભૂમિમતિક્રમ્ય તિષ્ઠેત્ ક્રમેણ માનવઃ ।

નાનાબ્રહ્મણિ પશ્યન્ સન્નન્તે શાન્તિમવાપ્નુયાત્ ॥ ૮૪॥

શાન્તિયુક્તો નરઃ પશ્ચાત્ સન્ત્યજેત્તાં મહાદ્ભુતામ્ ।
જડાવસ્થાં પુનઃ સોઽપિ યથેચ્છાચારગો ભવેત્ ॥ ૮૫॥

હૃદિ ચિન્તામણિં દૃષ્ટ્વા પઞ્ચભૂમિપ્રચાલકમ્ ।
શાન્ત્યા યુક્તો ભવેન્નિત્યં સ્વાધીનહૃદયઃ પરઃ ॥ ૮૬॥

દૃષ્ટ્વા બ્રહ્મ સ્વયં યોગી રસહીનો ભવેન્ મુદા ।
સર્વત્ર નાત્ર સન્દેહઃ શાન્ત્યા સર્વં સમાચરેત્ ॥ ૮૭॥

અનેન વિધિના દક્ષ જ્ઞાની પાપપરાયણઃ ।
ક્રમેણ સાધયેદ્યોગં સ યોગી સમ્ભવેત્ પરઃ ॥ ૮૮॥

એવં કર્તુમશક્તશ્ચેત્તદા શ્રુત્વા મહામતિઃ ।
ઇમં યોગં સ્વયં તત્ર નિષ્ઠાયુક્તો ભવેત્ સદા ॥ ૮૯॥

સ્વધર્મનિરતો ભૂત્વા યોગમિચ્છેન્નિરન્તરમ્ ।
નિન્દ્યભોગાન્ પ્રભુઞ્જન્ સન્નન્તે સ્વાનન્દગો ભવેત્ ॥ ૯૦॥

ગણેશ્વરં તત્ર દૃષ્ટ્વા યોગયુક્તો ભવિષ્યતિ ।
જ્યોતિર્દેહધરો ભૂત્વા પ્રભજેદ્ગણનાયકમ્ ॥ ૯૧॥

બ્રહ્મ કલ્પમયં સ્થિત્વા કાલં તત્ર મહામતિઃ ।
તદ્દેહે લીનતાં પ્રાપ્ય બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૯૨॥

એવં કર્તુમશક્તશ્ચેત્તદા સ ધર્મસંયુતઃ ।
કર્માચરેત્ પ્રજાનાથ બ્રહ્માર્પણવિધાનતઃ ॥ ૯૩॥

તેનૈવ શુક્લગત્યા સ બ્રહ્મીભૂતો નરો ભવેત્ ।
નિઃકામયોગમાર્ગેણ સદા બ્રહ્મણિ તત્પરઃ ॥ ૯૪॥

એવં કર્તુમશક્તશ્ચેત્તદાઽહં બ્રહ્મભાવતઃ ।
ત્રિવિધં ફલમુત્સૃજ્ય કર્મજં યોગમાપ્નુયાત્ ॥ ૯૫॥

કર્મત્યાગબલેનૈવાહં બ્રહ્મ નિશ્ચયેન સઃ ।
ક્રમેણ કર્મસંયુક્તો ભવિષ્યત્યન્યજન્મનિ ॥ ૯૬॥

નિઃકામકર્મકર્તા સ પુનરન્યભવે નરઃ ।
યોગરસસમાયુક્તો ભવેદ્વિષયનિન્દકઃ ॥ ૯૭॥

એવં ક્રમેણ શાન્તિં સ લભેત્ પૂર્ણાં ન સંશયઃ ।
ક્રમાર્થં રચિતં સર્વં નાનામતસમન્વિતમ્ ॥ ૯૮॥

સુગમં સર્વભાવેષુ ગણેશભજનં પરમ્ ।
તેન યોગી ભવેન્નૂનં સર્વશાસ્ત્રેષુ સમ્મતમ્ ॥ ૯૯॥

યત્કિઞ્ચિદ્ ગણરાજસ્ય વ્રતપૂજાદિકં પ્રભોઃ ।
કીર્તનશ્રવણાદ્યં તુ બ્રહ્મીભૂતપ્રદાયકમ્ ॥ ૧૦૦॥

નાનાવિષયસંયુક્તો નરઃ સ્મરેદ્ગણાધિપમ્ ।
અહર્નિશં તદાસ્યાન્તે ગણેશસ્મરણં ભવેત્ ॥ ૧૦૧॥

તેન સ્વાનન્દગો ભૂત્વા યોગમભ્યસ્ય તન્મયઃ ।
બ્રહ્મકલ્પાન્તભાવે સ ભવિષ્યતિ ન સંશયઃ ॥ ૧૦૨॥

(Page ખં. ૯ અ. ૧૦ પાન ૩૬)
સ્મરણં ગણરાજસ્ય પ્રકુર્યાન્નિત્યમાદરાત્ ।
તસ્યાન્તે ગણરાજસ્ય સ્મૃતિં દદ્યાન્નરાય સઃ ॥ ૧૦૩॥

અતોઽહર્નિશમેકં તં સંસ્મરેન્ માનવઃ પરમ્ ।
નાનાયોગાદિકં સર્વં સાધ્ય યોગિસમો ભવેત્ ॥ ૧૦૪॥

આયાસેન વિહીનોઽપિ સદા વિષયલમ્પટઃ ।
ગણેશસ્મરણે સક્તઃ સઃ શુકસમતાં વ્રજેત્ ॥ ૧૦૫॥

શિવવિષ્ણુમુખાદીનાં નરો યઃ સ્મરણં ચરેત્ ।
અન્તે તેષાં સ્મૃતિં તસ્મૈ સ દદ્યાચ્ચિત્તગઃ પ્રભુઃ ॥ ૧૦૬॥

તેષાં લોકં સમાસાદ્ય ભુક્ત્વા ભોગાન્ મનોહરાન્ ।
પ્રપતેન્નાઽત્ર સન્દેહો મૃત્યુલોકે વિશેષતઃ ॥ ૧૦૭॥

પુરાણેષુ પ્રપઠ્યન્તે ત્રિગુણાનાં લયાઃ સદા ।
અતઃ સ જન્મમૃત્યુભ્યાં યુક્તો ભવતિ તદ્ગતઃ ॥ ૧૦૮॥

અતઃ સારં સમાખ્યાતં ગણેશભજનં પરમ્ ।
તેનાજ્ઞાનસમાયુક્તો નરો બ્રહ્મમયો ભવેત્ ॥ ૧૦૯॥

એતત્તે કથિતં દક્ષ યોગપ્રાપ્ત્યર્થમાદરાત્ ।
અજ્ઞાનસંયુતસ્યાપિ બ્રહ્મીભૂતપ્રદાયકમ્ ॥ ૧૧૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામતાર્થશાસ્ત્રે
અજ્ઞાનિનાં ક્રમયોગવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૯.૯
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ પઞ્ચમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૫

## ૯.૧૦ વિભૂતિયોગો નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
વિભૂતીર્વદ યોગીશ ગણેશસ્ય મહાત્મનઃ ।
યા જ્ઞાત્વા તાઃ સમારાધ્ય ગણેશજ્ઞો ભવેન્નરઃ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
અપારા ગણનાથસ્ય વિભૂતયો ન સંશયઃ ।
તા ન શક્તાઃ કથયિતું ભવન્તિ શઙ્કરાદયઃ ॥ ૨॥

ક્ષણે ક્ષણે ગણેશાનો નાનાખેલપરાયણઃ ।
વિભૂતિભિર્જગત્સર્વં ભાવયતિ પરાત્પરઃ ॥ ૩॥

લોકેષુ તત્ત્વમુખ્યેષુ જગત્સુ બ્રહ્મસુ પ્રભોઃ ।
યે શ્રેષ્ઠાસ્તસ્ય તે સર્વે વિભૂતિપદધારકાઃ ॥ ૪॥

કલ્પે કલ્પે વિભૂતીનામવતારા અસઙ્ખ્યકાઃ ।
ગણેશસ્ય તથા દક્ષ તાન્ વક્તું કઃ ક્ષમો ભવેત્ ॥ ૫॥

અતઃ સઙ્ક્ષેપતસ્તુભ્યં કથયિષ્યામિ તાઃ શ‌ૃણુ ।
વિભૂતીર્ગણનાથસ્ય નાનાસિદ્ધિપ્રદાયિનીઃ ॥ ૬॥

જગત્સુ બ્રહ્મસુ પ્રાજ્ઞ યોગરૂપો ગજાનનઃ ।
કથં ન ભિન્નભાવાખ્યં વર્તતે વર્ણયામ્યહમ્ ॥ ૭॥

માયાભ્યાં સંયુતઃ સોઽપિ નાનાવેષપ્રધારકઃ ।
અયોગિનામિદં હૃદ્યં સત્યં સમ્ભાસતે સદા ॥ ૮॥

માયાયુક્તપ્રભાવેણ કિં કિં ગજાનનસ્ય ચ ।
(Page ખં. ૯ અ. ૧૦ પાન ૩૭)
ન સમ્ભવેદહં માયાં સમાશ્રિત્ય વદામિ તાઃ ॥ ૯॥

કલાંશાઃ કલયા યુક્તાઃ કલાંશાંશાઃ કલાત્મકાઃ ।

તેષામંશધરા યે તે સર્વે વિભૂતિધારકાઃ ॥ ૧૦॥

એવમેવ ગણેશાનઃ પૃષ્ટશ્ચ નારદેન સઃ ।
જગાદ તાઃ શ‍ૃણુષ્વ ત્વં વિભૂતીઃ પરમાદ્ભુતાઃ ॥ ૧૧॥

શ્રીગણેશ ઉવાચ ।
પૂર્ણો યોગેષુ સર્વેષુ ચિત્તરોધમયઃ પરઃ ।
માયાહીનપ્રભાવાણામયોગોઽહં મહામુને ॥ ૧૨॥

સ્વાનન્દો નિજભૂતેષુ તુર્યેષ્વવ્યક્તસંજ્ઞિતઃ ।
આનન્દસમભાવેષુ જીવેષ્વાત્માહમઞ્જસા ॥ ૧૩॥

નાનાભેદેષુ બ્રહ્માહમસદ્રૂપપ્રધારકમ્ ।
સત્યેષુ સાઙ્ખ્યરૂપોઽહં બોધઃ ખેલકરેષુ ચ ॥ ૧૪॥

દેહાભિમાનયુક્તેષુ સદૈકોઽહં મહામતે ।
દેહેષુ બિન્દુરૂપોઽહં ચેતનાસુ ગુણેશ્વરઃ ॥ ૧૫॥

કોશેષ્વાનન્દકોશોઽહં વિજ્ઞાનં સૂક્ષ્મજાતિષુ ।
વિવેકેષુ મનશ્ચાહં ચાલકેષુ સમીરણઃ ॥ ૧૬॥

સ્થૂલેષ્વન્નસ્વરૂપોઽહં સમષ્ટિષુ તથેશ્વરઃ ।
વ્યષ્ટિષુ પ્રાજ્ઞરૂપોઽહમણુષુ ચ મહાવિરાટ્ ॥ ૧૭॥

ઇન્દ્રિયેષુ મનશ્ચાહં ભૂતેષ્વાકાશસંજ્ઞિતઃ ।
તન્માત્રાણામહં શબ્દો જ્ઞાતાહં દેવતાસુ ચ ॥ ૧૮॥

તત્ત્વેષુ વિવિધેષ્વેવ મહત્તત્ત્વમહં પરમ્ ।
ગુણેષુ ગુણપોઽહં તુ પાલકેષુ જનાર્દનઃ ॥ ૧૯॥

હરઃ સંહારકર્તૄણાં સ્રષ્ટૄણાં પ્રપિતામહઃ ।
કર્મણામર્યમાઽઽત્માઽહં મોહકાનાં ચ શક્તિકા ॥ ૨૦॥

દેવાનાં મઘવાઽહં તુ આદિત્યાનાં વિનાયકઃ ।
તેજસાં ભાનુરૂપોઽહમમૃતેષુ વિધુઃ પરઃ ॥ ૨૧॥

અગ્નિઃ પ્રતાપદેષ્વેવ ધર્મઃ સમપ્રવૃત્તિષુ ।
યમો યમવતાં ચાહં રક્ષસાં નિરૃતિઃ સ્વયમ્ ॥ ૨૨॥

જલેષુ વરુણોઽહં તુ બલવત્સુ સમીરણઃ ।
નિધીનાં ધનદાતાઽહં રુદ્રાણાં શઙ્કરઃ પ્રભુઃ ॥ ૨૩॥

કામો ધનુર્ધરાણાં ચ રતિર્ભોગેષુ ભોગદા ।
નાગેશાનામહં શેષઃ સર્પાણાં તક્ષકઃ સ્વયમ્ ॥ ૨૪॥

નાગાનાં વાસુકિર્નામ જમ્બુર્દ્વીપેષુ સર્વદઃ ।
સ્વાદૂદકઃ સમુદ્રાણાં પર્વતેષુ હિ મેરુકઃ ॥ ૨૫॥

પિતૃણાં યમરૂપોઽહં વૃક્ષેષુ શમિકા મતા ।
દેવવૃક્ષેષુ મન્દારસ્તરૂણાં કામદાયકઃ ॥ ૨૬॥

ધેનૂનાં કામધેનુર્યા દૂર્વા ચૌષધિષુ પ્રભુઃ ।
પક્ષિષુ તુ મયૂરોઽહં મૃગાણાં સિંહરૂપધૃક્ ॥ ૨૭॥

માસાનાં શ્રાવણશ્ચાહં ચૌરાણાં મૂષકાધિપઃ ।
વાહનેષ્વશ્વવાહોઽહં સિદ્ધિરૈશ્વર્યદેષુ ચ ॥ ૨૮॥

વિદ્યાસુ બુદ્ધિરૂપોઽહં ચિત્તં પ્રકાશકારિણામ્ ।
અહં મનશ્ચ વેગાનાં મોહદેષ્વભિમાનકઃ ॥ ૨૯॥

નરાધિપો નરાણાં તુ વર્ણેષુ બ્રાહ્મણોહ્યહમ્ ।
આશ્રમેષુ તુરીયોઽહં પોષકેષુ ગૃહસ્થકઃ ॥ ૩૦॥

ત્યાગિનામવધૂતોઽહં તિથીનાં ચ ચતુર્થિકા ।
પ્રજાપતિષુ દક્ષોઽહં બ્રહ્મર્ષિષુ ભૃગુસ્તથા ॥ ૩૧॥

નારદો દૈવતર્ષીણાં દત્તોઽવધૂતરૂપિણામ્ ।
કપિલસ્તત્ત્વવિજ્ઞાનાં યોગિનાં શુક એવ યઃ ॥ ૩૨॥

જનકોઽહં વિદેહાનાં નિઃસઙ્ગેષુ મહામુને ।
સનકાદય એવાઽહં જ્ઞાનિનાં બાદરાયણઃ ॥ ૩૩॥

વસિષ્ઠઃ કર્મકર્તૃણાં ગાણપત્યેષુ મુદ્ગલઃ ।
ભૃશુણ્ડી ચૈકનિષ્ઠેષુ બ્રહ્મિષ્ઠાનાં બૃહસ્પતિઃ ॥ ૩૪॥

અન્નાનાં તિલરૂપોઽહં ગવ્યાનાં ઘૃતમઞ્જસા ।
મધુ સર્વરસાનાં ચ મકરો જલજાત્મનામ્ ॥ ૩૫॥

કૌમણ્ડલી નદીનાં ચ તીર્થેષુ ગાણપં પરમ્ ।
ક્ષેત્રાણાં મયૂરક્ષેત્રં કાશિરાજઃ સુબુદ્ધિષુ ॥ ૩૬॥

મયૂરેશોઽવતારાણાં ગાર્ગ્ય ઉપાસકાત્મનામ્ ।

ધ્યાનનિષ્ઠેષુ સર્વેષુ ગૃત્સમદોઽહમેવ ચ ॥ ૩૭॥

સુબોધૌ દૈત્યજાતીનાં જ્ઞાનારિર્દ્વેષકારિણામ્ ।
દુર્જયેષુ મનશ્ચાહં વર્ણેષ્વોઙ્કાર એવ સઃ ॥ ૩૮॥

શુક્રોહં ભાવિકેષ્વેવ ત્રિશિરાઃ શુદ્ધચેતસામ્ ।
ઉપદેશપ્રદાતૃણાં યાજ્ઞવલ્ક્યઃ પ્રતાપવાન્ ॥ ૩૯॥

પૌરાણિકેષુ સૂતોઽહં શ્રોતૃણાં શૌનકો મુનિઃ ।
સેનાનીનામહં સ્કન્દો વિષ્ણુર્યશસ્વિનામહમ્ ॥ ૪૦॥

પાપેષ્વનૃતરૂપોઽહં કલહો ભેદધારિણામ્ ।
પ્રાપ્તિષુ લોભરૂપોઽહં મણીનાં ચિન્તિતાર્થદઃ ॥ ૪૧॥

જ્ઞાનં પવિત્રં ભાવાનાં સામગાયકધર્મિણામ્ ।
વેદેષ્વથર્વસંજ્ઞોઽહં શસ્ત્રેષુ પરશુઃ પરઃ ॥ ૪૨॥

નિર્લેપાનામહં સાક્ષી રાજશ્રીષુ ગજસ્તથા ।
વિષયો ભ્રાન્તિદાનાં ચ રમ્ભા હ્યપ્સરસામહમ્ ॥ ૪૩॥

ગન્ધર્વાણાં ચિત્રરથો વૈદ્યાનાં વૈદ્યનાયકઃ ।
ધન્વન્તરિસ્તુ ભિષજાં સમુદ્રઃ સરસાત્મનામ્ ॥ ૪૪॥

સ્રોતસાં જાહ્નવી વિપ્ર મન્ત્રાણામેકવર્ણજઃ ।
સૂક્તેષુ બ્રાહ્મણસ્પત્યં યજ્ઞેષુ જ્ઞાનરૂપધૃક્ ॥ ૪૫॥

પ્રાણેષુ તુ સમાનોઽહં શક્તિઃ શક્તિમતામહમ્ ।
બૃહદારણ્યકં વિદ્ધિ નાનોપનિષદાં પરમ્ ॥ ૪૬॥

શાસ્ત્રેષુ યોગશાસ્ત્રં ચ પુરાણેષુ ચ મૌદ્ગલમ્ ।
અરણ્યાનાં મહારણ્યં દણ્ડકાખ્યમહં પરમ્ ॥ ૪૭॥

નિયન્તૃણામહં દણ્ડો માયાઽહં ભાવકારિણામ્ ।
સ્મૃતીનાં યાજ્ઞવલ્ક્યસ્ય સ્મૃતિરેવ પરા મતા ॥ ૪૮॥

ગાયત્રી છન્દસાં વિપ્ર સ્વાનન્દો નગરાત્મનામ્ ।
વ્યાકરણમઙ્ગભૂતેષુ કલાસુ યોગદા હ્યહમ્ ॥ ૪૯॥

નીતિજ્ઞેષુ તથા કાવ્યો વૃષભો ભૂમિધારિણામ્ ।
નન્દિકેશો ગવાં ચાહં નગ્નો ભૈરવભાવિનામ્ ॥ ૫૦॥

એવં નાનાવિધાऽऽકારા વિભૂતીર્ગણપસ્ય યા ।
કથિતું નૈવ શક્યા સા સારા સઙ્કુથિતા મયા ॥ ૫૧॥

યદ્યચ્છ્રેષ્ઠતમં વિપ્ર સા વિભૂતિર્ન સંશયઃ ।
લોકેષુ ગણરાજસ્ય તાં ભાવય વિશેષતઃ ॥ ૫૨॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા ગણેશાનો વિરરામ પ્રજાપતે ।
નારદસ્તં પ્રણમ્યૈવ જગામ તાદૃશોऽભવત્ ॥ ૫૩॥

ય ઇમાં શ્રાવયેદ્દક્ષ શ‍ૃણુયાદ્વા પ્રયત્નતઃ ।
ન મોહં સ લભેત્ ક્વાપિ જ્ઞાત્વા સામર્થ્યજં મહઃ ॥ ૫૪॥

અપારમહિમાયુક્તા જીવાશ્ચ પરમેશ્વરાઃ ।
તે સર્વે વિઘ્નરાજસ્ય વિભૂતિપદધારકાઃ ॥ ૫૫॥

એવં જ્ઞાત્વા ગણેશાનં યે ભજન્તિ મનીષિણઃ ।
તે સર્વે બ્રહ્મભૂતાશ્ચ ભવિષ્યન્તિ પ્રજાપતે ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન વિભૂતિયોગો નામ દશમોऽધ્યાયઃ ॥ ૯.૧૦
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ ષષ્ઠોऽધ્યાયઃ ॥ ૯(દત્તગીતા).૬
(Page ખં. ૯ અ. ૧૧ પાન ૩૯)

## ૯.૧૧ તત્ત્વવિચારયોગો નામ એકાદશોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ત્વયા પ્રોક્તઃ પુરા વિપ્ર વિચારો બ્રહ્મણઃ પરઃ ।
તં કૃત્વા યોગમાપ્નોતિ તદ્વદસ્વ હિતાવહમ્ ॥ ૧॥

ક્રિયયા શુદ્ધચિત્તો યો નરો બ્રહ્મપરાયણઃ ।
સર્વત્ર બ્રહ્મરૂપં યદ્વિધિના કેન પશ્યતિ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
બાહ્યાન્તરાં ક્રિયાં કૃત્વા શુદ્ધચિત્તો નરોત્તમઃ ।

તત્ત્વવિચારમાર્ગેણ પશ્યતિ બ્રહ્મ શાશ્વતમ્ ॥ ૩॥

તત્તેઽહં કથયિષ્યામિ તત્ત્વજ્ઞાનં પ્રજાપતે ।
આદૌ યોગિજનાનાં યત્ સાધનં યોગદાયકમ્ ॥ ૪॥

પૃથ્વી જલં તથા તેજો વાયુરાકાશમેવ યત્ ।
પઞ્ચભૂતમયો દેહઃ પ્રકૃતિઃ સા ચ પઞ્ચધા ॥ ૫॥

ક્રિયારૂપા મહાભાગા નાનાભેદપરાયણા ।
વિભજ્યાત્માનમેવં સા ક્રીડતિ વિવિધે રતા ॥ ૬॥

ભૂતાનામેકભાવાખ્યા પઞ્ચાનાં જ્ઞાનરૂપિણી ।
પ્રકૃતિર્હૃદિ સંસ્થા સા જીવભાવધરા પરા ॥ ૭॥

તયા જ્ઞાનં ભવેત્ સર્વં નાનાવિવેકદાયકમ્ ।
તદાધારં જગત્ સર્વમેકરૂપા પ્રકીર્તિતા ॥ ૮॥

તયોર્યોગે પ્રજાનાથ બ્રહ્મૈવમભિધીયતે ।
ક્રિયાજ્ઞાનસ્વરૂપાખ્યં દ્વન્દ્વહીનં પરાત્પરમ્ ॥ ૯॥

તદેવ પઞ્ચધા જાતં શ‍ૃણુ તદ્યોગદાયકમ્ ।
સ્થૂલં સૂક્ષ્મં સમં ચાત્મપ્રતીતં બિન્દુસંજ્ઞિતમ્ ॥ ૧૦॥

સમષ્ટિવ્યષ્ટિભાવેન દ્વિવિધં બ્રહ્મ કથ્યતે ।
પૃથક્ત્વેન સ્વયં ભાતિ પઞ્ચસુ પઞ્ચભેદતઃ ॥ ૧૧॥

સ્થૂલં જાગૃન્મયં બ્રહ્મ તદેવ દ્વિવિધં મતમ્ ।
વિશ્વાખ્યં વ્યષ્ટિરૂપેણ વૈશ્વાનરં સમષ્ટિગમ્ ॥ ૧૨॥

અણ્ડેષુ વિવિધા રૂપા જન્તવો દૃષ્ટિગોચરાઃ ।
જાગૃદ્ભાવધરાઃ સર્વે વિશ્વાત્મકા ઉદાહૃતાઃ ॥ ૧૩॥

તસ્ય બોધં પ્રવક્ષ્યામિ સુગમાર્થપ્રકાશકમ્ ।
ક્રિયાત્મકેષુ દેહેષુ ક્રિયારૂપા ભવન્તિ તે ॥ ૧૪॥

જ્ઞાનાત્મકેષુ દેહેષુ જ્ઞાનરૂપધરા મતાઃ ।
ઉભયોર્યોગભાવેન વિશ્વાખ્યાસ્તે પ્રકીર્તિતાઃ ॥ ૧૫॥

બાહ્યદેહસ્ય ભો દક્ષ વિતસ્તિર્યાદૃશી ભવેત્ ।
તાવન્માનેન સર્વેષાં જ્ઞાનદેહો હૃદિ સ્થિતઃ ॥ ૧૬॥

વિરાટ્ જાગૃત્ સ્વરૂપસ્થો વૈશ્વાનર ઇતિ સ્મૃતઃ ।
વ્યાપકાત્મકદેહેન તિષ્ઠતિ વિશ્વભાવિષુ ॥ ૧૭॥

તસ્યાપિ દ્વિવિધો દેહઃ ક્રિયાજ્ઞાનપ્રભેદતઃ ।
તયોર્યોગે સમાખ્યાતો વૈશ્વાનરશ્ચ તન્મયઃ ॥ ૧૮॥

વિશ્વવૈશ્વાનરયોશ્ચ યોગે બ્રહ્મ પ્રકીર્તિતમ્ ।
જાગૃદ્ભાવધરં પૂર્ણં સ્થૂલભૂતપ્રકાશકમ્ ॥ ૧૯॥

એતત્ સ્થૂલસ્ય તત્ત્વં તે કથિતં તુ સમાસતઃ ।
તત્ર તત્ત્વવિધિં ભિન્નં શ‍ૃણુ યોગસમાધિદમ્ ॥ ૨૦॥

જન્મમૃત્યુયુતં યચ્ચ નાનાભાવપરાયણમ્ ।
ત્વમ્પદાખ્યં પ્રજાનાથ વિદ્ધિ તત્ સર્વભાવગમ્ ॥ ૨૧॥

જન્મમૃત્યુવિહીનં યદેકરૂપં પ્રકીર્તિતમ્ ।
તત્પદાખ્યં ચ તદ્વિદ્ધિ પરં સર્વાત્મધારકમ્ ॥ ૨૨॥

તયોર્યોગે ભવેત્તત્વં તદેવાસિપદં પરમ્ ।
દ્વન્દ્વભાવવિહીનં યદ્ દ્વન્દ્વરૂપપ્રકાશકમ્ ॥ ૨૩॥

ત્વમ્પદં ક્રિયયા યુક્તં જ્ઞાનાખ્યં તત્પદં ભવેત્ ।
તયોર્યોગે ભવેદ્વિશ્વં તત્ત્વરૂપં ન સંશયઃ ॥ ૨૪॥

એવં વૈશ્વાનરાખ્યં ત્વં જાનીહિ તત્ત્વસંજ્ઞિતમ્ ।
ક્રિયાજ્ઞાનસમાયોગે તયોઃ પ્રકાશકારકમ્ ॥ ૨૫॥

અથાન્યચ્છૃણુ દક્ષ ત્વં તત્ત્વરૂપં પુરાતનમ્ ।
વિશ્વાખ્યા જન્તવઃ સર્વે નાનાભાવાત્મકા બુધૈઃ ॥ ૨૬॥

જન્મમૃત્યુયુતાઃ પ્રોક્તાસ્ત્વમ્પદધારકા મતાઃ ।
વૈશ્વાનરસ્ત્વમ્પદશ્ચૈકરૂપાદ્વ્યાપકો મતઃ ॥ ૨૭॥

તયોરભેદભાવે યદ્બ્રાહ્મતત્ત્વં પ્રકીર્ત્યતે ।
જાગૃદ્ભાવધરં પૂર્ણં સ્થૂલભાવપરાયણમ્ ॥ ૨૮॥

એવં નાનાવિભાગેષુ જ્ઞાતવ્યં તત્ત્વરૂપકમ્ ।
સૂક્ષ્માદિષુ પ્રજાનાથ બ્રહ્મસૌખ્યપ્રદાયકમ્ ॥ ૨૯॥

અથ સૂક્ષ્મં પ્રવક્ષ્યામિ યોગમાર્ગપ્રસિદ્ધયે ।
શુદ્ધચિત્તપ્રભાવેણ તજ્જ્ઞાનં તન્મયં ભવેત્ ॥ ૩૦॥

બાહ્યં સ્થૂલં વિશેષેણ જાગૃદન્નમયં પરમ્ ।
આન્તરં સ્વપ્નભાવાખ્યં સૂક્ષ્મં જાનીહિ માનદ ॥ ૩૧॥

પ્રાણો દશવિધઃ પ્રોક્તઃ સૂક્ષ્મરૂપોઽતરે સ્થિતઃ ।
તસ્માત્ સૂક્ષ્મં મનઃ પ્રોક્તં પ્રાણાન્તઃ સંવ્યવસ્થિતમ્ ॥ ૩૨॥

તસ્માત્ સૂક્ષ્મં ચ વિજ્ઞાનં દેહદ્વન્દ્વજ્ઞમુત્તમમ્ ।
મનોઽતરે સ્થિતં પૂર્ણં તદન્તર્ન ચ વિદ્યતે ॥ ૩૩॥

ત્રિવિધં કોશસંયુક્તં સ્વપ્નં સૂક્ષ્મસ્વરૂપકમ્ ।
સર્વાન્તરે સ્થિતં બ્રહ્મ દ્વન્દ્વમાયાપ્રચાલકમ્ ॥ ૩૪॥

ક્રિયારૂપસ્તથા દેહઃ સૂક્ષ્મભૂતમયઃ સ્મૃતઃ ।
સર્વાન્તરે સમાસ્થાય કલ્પિતાભોગકારકઃ ॥ ૩૫॥

જ્ઞાનદેહઃ સમાખ્યાતઃ સદૈકભાવધારકઃ ।
પૂર્વવત્ સર્વં વિજ્ઞેયં સૂક્ષ્મમાયાપ્રકાશકમ્ ॥ ૩૬॥

ભિન્નભાવધરાઃ સર્વે જન્તવઃ સ્વપ્નગાઃ પરાઃ ।
તૈજસાસ્તે મતાઃ શાસ્ત્રે ક્રિયાજ્ઞાનપ્રકાશકાઃ ॥ ૩૭॥

વિરાટ્ તત્ર સમાખ્યાતો હિરણ્યગર્ભસંજ્ઞિતઃ ।
વ્યાપકઃ સ્વપ્નભાવેષુ નાનાજન્તુપ્રચાલકઃ ॥ ૩૮॥

તયોરભેદભાવે યદ્બ્રહ્મ સ્વપ્નાત્મકં પરમ્ ।
સૂક્ષ્મમાયાપ્રકાશત્વાત્ સૂક્ષ્મં તત્ કથ્યતે બુધૈઃ ॥ ૩૯॥

પૂર્વવત્તત્ત્વભાવશ્ચ વિજ્ઞેયઃ સૂક્ષ્મગઃ પરઃ ।
શુદ્ધચિત્તપ્રભાવેણ સાક્ષાત્કારં કરોતિ સઃ ॥ ૪૦॥

અતઃ પરં સમાખ્યં યદ્બ્રહ્મ સુષુપ્તિસંજ્ઞિતમ્ ।
કથયામિ મહાપ્રીત્યા લોકાનામુપકારકમ્ ॥ ૪૧॥

બાહ્યં જાગૃન્મયં દક્ષ વપુઃ સર્વત્ર પઠ્યતે ।
આન્તરં સ્વપ્નમિત્યુક્તં તયોર્યોગે સમાત્મકમ્ ॥ ૪૨॥

બાહ્યાન્તરૈકભાવાખ્યં બાહ્યાન્તરવિવર્જિતમ્ ।
આનન્દકોશગં સામ્યં કૃતં ભૂતૈર્ગુણાત્મકૈઃ ॥ ૪૩॥

જાગૃત્ત્યક્ત્વા નરો યસ્તુ સ્વપ્નં ગચ્છતિ તત્ર સઃ ।

તયોઃ સન્ધિં સમાશ્રિત્ય સુષુપ્તિર્જાયતે પરા ॥ ૪૪॥

તથા સ્વપ્નં પરિત્યજ્ય જાગૃતિં ગચ્છતિ સ્વયમ્ ।
તયોઃ સન્ધિં સમાસ્થાય તિષ્ઠતિ સા સુષુપ્તિકા ॥ ૪૫॥

યત્ર સુપ્તો નરો દક્ષ જ્ઞાનયુક્તો ભવત્યસૌ ।
ન જાનાતિ સ્વકં ચાન્યં સ્વપ્નં નૈવ પ્રપશ્યતિ ॥ ૪૬॥

સા સુષુપ્તિઃ સમાખ્યાતા નિદ્રાં સંશ્રિત્ય તિષ્ઠતિ ।
જાગૃતિસ્વપ્નબોધં યા કરોતિ સા સુષુપ્તિકા ॥ ૪૭॥

સા દ્વિધા માયયા યુક્તા પ્રાજ્ઞેશ્વરસ્વભાવતઃ ।
ભિન્નદેહધરાણાં તુ પ્રજ્ઞાખ્યા સા પ્રકીર્તિતા ॥ ૪૮॥

વિરાડ્રૂપધરા નિત્યા સેશ્વરાખ્યા પ્રકથ્યતે ।
બ્રહ્મરૂપા તયોર્યોગે તત્ત્વસંજ્ઞા યથા પુરા ॥ ૪૯॥

અથ તુરીયરૂપં તે કથયામિ સમાસતઃ ।
નાદરૂપધરં ભૂતતન્માત્રાભેદમઞ્જસા ॥ ૫૦॥

વ્યવસ્થાસંશ્રિતં પૂર્ણં ત્રિષુ સાક્ષિવદુચ્યતે ।
તસ્યાનુભવમાહાત્મ્યં કથયામિ હિતાય તે ॥ ૫૧॥

મયા જાગૃન્મયં ભુક્તં મયા સ્વપ્નં વિલોકિતમ્ ।
નિદ્રાયાં ન મયા કિઞ્ચિજ્જ્ઞાતં વદતિ યઃ સ વૈ ॥ ૫૨॥

(Page ખં. ૯ અ. ૧૧ પાન ૪૧)
યદા જાગર્તિ વિશ્વસ્થસ્તદા દ્વાભ્યાં વિવર્જિતઃ ।
યદા સ્વપિતિ સ દ્વાભ્યાં હીનસ્તિષ્ઠતિ નિશ્ચિતમ્ ॥ ૫૩॥

યદા સુષુપ્તિસંસ્થોઽયં તદા દ્વાભ્યાં વિવર્જિતઃ ।
એવં ભેદપ્રકારૈઃ સ વ્યવસ્થાસંયુતો મતઃ ॥ ૫૪॥

તસ્ય તત્ત્વં પ્રવક્ષ્યામિ વૈશ્વતૈજસપ્રાજ્ઞગઃ ।
ત્વમ્પદાખ્યઃ સમાખ્યાતો નાદરૂપધરઃ પ્રભુઃ ॥ ૫૫॥

ત્રિવિરાણ્મય એવાસૌ તત્પદાખ્યઃ પ્રકીર્ત્યતે ।
તયોરભેદભાવે સ તત્ત્વરૂપોઽસ્મિતામયઃ ॥ ૫૬॥

અવસ્થાનાં સમાયોગો નાદસ્તુરીયધારકઃ ।
સદૈકભાવસંયુક્તઃ સર્વત્રાઽસૌ વિરાજતિ ॥ ૫૭॥

ન બાહ્યો નાંઽઽતરસ્થોઽયં નોભયાત્મક ઉચ્યતે ।
અહમિત્યેવ કોશાત્માઽસ્મિતાખ્યઃ પરમેશ્વરઃ ॥ ૫૮॥

અતઃ પરં પ્રવક્ષ્યામિ બિન્દુતત્ત્વં સુસૌખ્યદમ્ ।
પઞ્ચમં બ્રહ્મસંજ્ઞં તત્ દેહાનાં દેહગં પરમ્ ॥ ૫૯॥

વ્યવસ્થામયસંસ્થં યત્ત્વમ્પદસ્થં પ્રકથ્યતે ।
તુરીયસંજ્ઞિતં દેહં તત્પદાખ્યં પ્રકીર્તિતમ્ ॥ ૬૦॥

તયોરભેદભાવે યત્તત્ત્વં યોગમયં પરમ્ ।
ચતુર્ષુ સંસ્થિતં પૂર્ણં ચતુર્ભિર્વર્જિતં સદા ॥ ૬૧॥

એવં તત્ત્વવિચારેણ શમદમપરાયણઃ ।
સઙ્કલ્પજાન્ સદા કામાંસ્ત્યક્ત્વા યોગમયો ભવેત્ ॥ ૬૨॥

સર્વત્ર બ્રહ્મસંસ્થં યત્ પશ્યેત્તન્નાત્ર સંશયઃ ।
તત્ત્વરૂપધરં પૂર્ણં તત્ત્વવિચારતઃ સદા ॥ ૬૩॥

અથાન્યત્તત્ત્વમાર્ગં તે કથયિષ્યામિ સર્વદમ્ ।
બિન્દુસ્ત્વમ્પદસંજ્ઞસ્થઃ સોઽહં તત્પદગં મતમ્ ॥ ૬૪॥

તયોર્યોગે પ્રજાનાથ બોધસ્તત્ત્વમયઃ સ્મૃતઃ ।
મનોવાણીવિહીનત્વાત્ દૃશ્યતે યોગિના પરઃ ॥ ૬૫॥

બોધસ્ત્વમ્પદરૂપશ્ચ વિબોધસ્તત્પદાત્મકઃ ।
તયોર્યોગે સ્વસંવેદ્યં તત્ત્વં વેદે પ્રકીર્તિતમ્ ॥ ૬૬॥

અસત્ત્વમ્પદરૂપં સત્તત્પદસ્થમુદુચ્યતે ।
તયોર્યોગે સમં બ્રહ્મ તત્ત્વં યોગપ્રદં મતમ્ ॥ ૬૭॥

સમં ત્વમ્પદસંજ્ઞસ્થમવ્યક્તં તત્પદસ્થિતમ્ ।
તયોર્યોગે તથા તત્ત્વં સ્વાનન્દાખ્યં પ્રકીર્તિતમ્ ॥ ૬૮॥

સ્વાનન્દસ્ત્વમ્પદાખ્યશ્ચાયોગસ્તત્પદમુચ્યતે ।
તયોર્યોગે પરં તત્ત્વં પૂર્ણયોગમયં મતમ્ ॥ ૬૯॥

સિદ્ધિસ્ત્વમ્પદગા પ્રોક્તા બુદ્ધિસ્તત્પદગા મતા ।
તયોર્યોગે ગણેશાનસ્તત્ત્વરૂપઃ પ્રકથ્યતે ॥ ૭૦॥

એવં નાનામતૈર્યુક્તા વેદાન્તાર્થવિચક્ષણાઃ ।

તત્ત્વં વદન્તિ દક્ષ ત્વં જાનીહિ નાત્ર સંશયઃ ॥ ૭૧॥

અનન્તભાવસંયુક્તં ત્વમ્પદં વિદ્ધિ સર્વદા ।
અકલ્પિતં તત્પદાખ્યં તયોર્યોગે પરં ભવેત્ ॥ ૭૨॥

ઇદં સારં રહસ્યં તે કથિતં યોગદં પરમ્ ।
યેન સર્વત્ર યોગં સ સમ્પશ્યેજ્જ્ઞાનચક્ષુષા ॥ ૭૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન તત્ત્વવિચારયોગો નામ એકાદશોઽધ્યાયઃ ॥ ૯.૧૧
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ સપ્તમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૭

## ૯.૧૨ શુક્લકૃષ્ણગતિયોગો નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
શુક્લાં કૃષ્ણાં ગતિં બ્રૂહિ યાભ્યાં મુક્તિમવાપ્નુયાત્ ।
સંસારં ચ તથા યોગિન્ દયયા સર્વતારક ॥ ૧॥

મુદ્ગલ ઉવાચ ।
કર્મત્વં ત્રિવિધં વિદ્ધિ કર્માકર્મવિકર્મગમ્ ।
સ્વધર્મવર્જિતં સર્વં કર્મ વિકર્મસંજ્ઞકમ્ ॥ ૨॥

સ્વધર્મસંયુતં કર્મ ભોગવાસનયા યુતમ્ ।
કર્મસંજ્ઞં વિજાનીહિ કૃષ્ણગતિપદપ્રદમ્ ॥ ૩॥

બ્રહ્માર્પણતયા કર્મ સ્વધર્મસ્થં ભવેત્ પરમ્ ।
શુક્લગતિમયં વિદ્ધિ મુક્તિદં તદકર્મકમ્ ॥ ૪॥

આગ્નેયં જ્યોતિરયનમુત્તરાખ્યં દિવા તથા ।
શુક્લગતિમયં સર્વં જાનીહિ મુક્તિદાયકમ્ ॥ ૫॥

ચાન્દ્રં જ્યોતિર્ધૂમરાત્રી દક્ષિણાયનમેવ યત્ ।
કૃષ્ણગતિસ્વરૂપં તજ્જાનીહિ જનિમૃત્યુદમ્ ॥ ૬॥

તયોર્ભેદં પ્રવક્ષ્યામિ લોકાનાં હિતકામ્યયા ।
યેન દ્વૈધં પરિત્યજ્ય બ્રહ્મણિ નિરતો ભવેત્ ॥ ૭॥

નિઃકામિકં કર્મ કૃત્વા મૃતો નરો યદા ભવેત્ ।
રાત્રૌ સ દક્ષિણાર્કે વા ન તં ગૃહ્ણન્તિ દેવતાઃ ॥ ૮॥

દેવભોગાંસ્તિરસ્કૃત્ય બ્રહ્માર્પણપરાયણમ્ ।
નરં તં કિં કરિષ્યન્તિ દેવાઃ સ્વર્ગસુખપ્રદાઃ ॥ ૯॥

અતો દાહે સ વૈ દક્ષ અગ્નિજ્યોતિઃસ્થગો ભવેત્ ।
દિવસે સમનુપ્રાપ્તે દિવા દૈવતગસ્તથા ॥ ૧૦॥

ઉત્તરાયણસમ્ભૂતે સ ગચ્છેદ્ભાનુમણ્ડલે ।
પ્રલયે મણ્ડલસ્યૈવ નાશે પુરુષગો ભવેત્ ॥ ૧૧॥

મહાપ્રલયવેલાયાં પ્રકૃતેઃ પુરુષસ્ય ચ ।
નાશે બ્રહ્મણિ ગચ્છેત્ સ બ્રહ્મભૂતો ભવેત્તતઃ ॥ ૧૨॥

સકામકં કર્મ કૃત્વા દિવસે ઉત્તરાયણે ।
મૃતં નરં ન તં ભાનુર્ગૃહ્ણાતિ કામનાયુતમ્ ॥ ૧૩॥

સદાઘે ધૂમસંસ્થશ્ચ યદા રાત્રિઃ સમાગતા ।
તદા તસ્યાં સમાશ્રિત્ય તથા તિષ્ઠેત્ પ્રજાપતે ॥ ૧૪॥

દક્ષિણાયનમાનન્દાદાગતં વીક્ષ્ય તત્ક્ષણાત્ ।
વિમાનવરમારુહ્ય ગચ્છેત્ સ્વર્ગં વિહાયસા ॥ ૧૫॥

ચાન્દ્રં જ્યોતિઃ સમાશ્રિત્ય ભોગાન્ ભુઙ્ક્તે સ્વકર્મજાન્ ।
કર્મપ્રમાણમાર્ગેણ નાનાસ્વર્ગપરાયણઃ ॥ ૧૬॥

વિધિં તત્ર પ્રવક્ષ્યામિ ચન્દ્રકલાસમુદ્ભવમ્ ।
અમૃતં દેવલોકેષુ સ્વર્ગેષુ ભોગદં પરમ્ ॥ ૧૭॥

ઇહ કર્મ કૃતં પૂર્ણં નરૈસ્તદમૃતાત્મકમ્ ।
ભવતિ ચન્દ્રગં સર્વં તેન કલાયુતો ભવેત્ ॥ ૧૮॥

શુક્લપક્ષે ક્રમેણાયમેકૈકકલયા પ્રભુઃ ।
વૃદ્ધિયુક્તઃ સ્વયમ્પૂર્ણઃ પૂર્ણિમાયાં પ્રદૃશ્યતે ॥ ૧૯॥

કૃષ્ણપક્ષે સુરાઃ સર્વે ક્રમેણામૃતભોજિનઃ ।
પિબન્તિ ચન્દ્રસંસ્થં તદમૃતં તૃપ્તિકારકમ્ ॥ ૨૦॥

તેન તૃપ્તિયુતાઃ સર્વે ભવન્તિ માસમાનતઃ ।
અમાયાં પતિતશ્ચન્દ્ર ઓષધીષુ ન સંશયઃ ॥ ૨૧॥

અત ઓષધયશ્છેદ્યા નરેણ નૈવ નિશ્ચિતમ્ ।
અમાયાં ચન્દ્રસંયોગયુક્તાઃ સુખપરાયણાઃ ॥ ૨૨॥

અતશ્ચન્દ્રભવં સર્વમમૃતં દેવભૂમિષુ ।
ચાન્દ્રઃ સ્વર્ગ ઇતિ પ્રોક્તસ્તેનૈવં વેદવાદિભિઃ ॥ ૨૩॥

દેવાનાં વિવિધાનાં સ કર્મ કૃત્વા સકામકમ્ ।
કર્માઙ્ગદેવમભ્યર્ચ્ય ગચ્છેત્ સમર્પ્ય તત્ક્રિયામ્ ॥ ૨૪॥

તત્તલ્લોકસુખં ભુક્ત્વા નાનાભોગસમન્વિતમ્ ।
ભોગાન્તે પુનરેવાઽસૌ મેઘમણ્ડલગો ભવેત્ ॥ ૨૫॥

તત્ર જલમયો ભૂત્વા પતેદ્ વૃષ્ટ્યા સ ભૂમિષુ ।
(Page ખં. ૯ અ. ૧૨ પાન ૪૩)
તત ઓષધિગો ભૂત્વા ભવેદન્નમયસ્તતઃ ॥ ૨૬॥

તતો વીર્યં સમાશ્રિત્ય ગચ્છેત્ સ જઠરે સ્ત્રિયઃ ।
તત્ર તત્ત્વાનિ તં દક્ષ આવિશન્તિ ન સંશયઃ ॥ ૨૭॥

ક્ષેત્રજ્ઞઃ સંસ્થિતસ્તત્ર તત્ત્વૈઃ ક્ષેત્રં વિનિર્મમે ।
વિધિં તસ્ય પ્રવક્ષ્યામિ ગર્ભોપનિષદિ ભવમ્ ॥ ૨૮॥

તત્રૈકદિવસેનૈવ સ્ત્રીવીર્યે રક્તસંશ્રિતે ।
તસ્મિન્ સમ્મિલનં કૃત્વા તદાકારો ભવેન્નરઃ ॥ ૨૯॥

તતસ્ત્રિદિવસૈઃ સોઽપિ ફેનરૂપો ભવેન્નરઃ ।
બુહુદઃ પઞ્ચદિવસૈઃ પેશી સપ્તદિનૈસ્તથા ॥ ૩૦॥

તતશ્ચતુર્દશૈઃ સોઽપિ દિવસૈઃ કુલ્લતાં ગતઃ ।
પઞ્ચવિંશતિભિસ્તત્ર માંસરૂપો ભવેત્ સ્વયમ્ ॥ ૩૧॥

માસેન કઠિનત્વં સ પ્રગચ્છેત્તત્ર સંસ્થિતઃ ।
દ્વિમાસાભ્યાં શિરો યુક્તો ભવેત્તત્ર પ્રજાપતે ॥ ૩૨॥

ત્રિમાસૈઃ કણ્ઠસંયુક્તશ્ચતુર્માસૈસ્ત્વચા યુતઃ ।
પઞ્ચમાસૈર્ભવેજ્જન્તુરિન્દ્રિયૈઃ સંયુતઃ ક્રમાત્ ॥ ૩૩॥

અવયવાદિસંયુક્તો નખરોમસમન્વિતઃ ।
ભવેન્ મુખેન સંયુક્તો માસૈઃ ષડ્ભિર્ન સંશયઃ ॥ ૩૪॥

તત ઇન્દ્રિયસમ્ભૂતં જ્ઞાનં ભવેત્ ક્રમેણ વૈ ।
ષણ્માસૈઃ પરિપૂર્ણૈશ્ચાઽઽકૃતિઃ પૂર્ણા ભવેત્ પરા ॥ ૩૫॥

પૂર્વકર્માનુસારેણ યાદૃશી યોનિરાભવેત્ ।
તાદૃશાકૃતિસંયુક્ત ઇન્દ્રિયૈશ્ચ સમન્વિતઃ ॥ ૩૬॥

સપ્તમાસૈર્ભવેજ્જન્તુશ્ચેતનયા સમન્વિતઃ ।
ઉદરે પ્રચરેત્ સોઽપિ માતુર્દુઃખસમન્વિતઃ ॥ ૩૭॥

અવકાશવિહીનઃ સ પીડિતો જન્તુભિઃ સદા ।
મૂર્ચ્છાં ગચ્છેત્ પુનઃ સંજ્ઞાં કોમલોઽતીવ માનવઃ ॥ ૩૮॥

અષ્ટમાસૈસ્તતસ્તત્ર બુદ્ધિયુક્તો ભવેન્નરઃ ।
સાઙ્ખ્યયોગપરો ભૂત્વા ધ્યાયેદ્બ્રહ્મ સનાતનમ્ ॥ ૩૯॥

અતિસઙ્કોચભાવેન પીડિતો જન્તુભિસ્તથા ।
માતુર્ભક્ષ્યાન્નદોષૈઃ સ વેદનાસંયુતો ભવેત્ ॥ ૪૦॥

ગર્ભદુઃખં સ વિજ્ઞાય તન્નિવૃત્ત્યર્થમાદરાત્ ।
સાઙ્ખ્યયોગપરો ભૂત્વા ભજેત્તં ગણનાયકમ્ ॥ ૪૧॥

તતસ્તત્ર ભવેત્તસ્ય જ્ઞાનં પરમસૌખ્યદમ્ ।
તેનાનન્તભવાનાં સ દૃષ્ટ્વા દુઃખં નિવૃત્તિગઃ ॥ ૪૨॥

અનન્યમનસા દેવં સ્તુયાત્ સ્તોત્રૈર્મહામતિઃ ।
ગર્ભવાસપ્રશાન્ત્યર્થં બ્રહ્મ ભૂયાર્થમાદરાત્ ॥ ૪૩॥

ગર્ભ ઉવાચ ।
નમસ્તે ગણનાથાય બ્રહ્મણે બ્રહ્મરૂપિણે ।
અનાથાનાં પ્રણાથાય વિઘ્નેશાય નમો નમઃ ॥ ૪૪॥

જ્યેષ્ઠરાજાય દેવાય દેવદેવેશમૂર્તયે ।
અનાદયે પરેશાય ચાદિપૂજ્યાય તે નમઃ ॥ ૪૫॥

સર્વપૂજ્યાય સર્વેષાં સર્વરૂપાય તે નમઃ ।
સર્વાદયે પરબ્રહ્મન્ સર્વેશાય નમો નમઃ ॥ ૪૬॥

ગજાકારસ્વરૂપાય ગજાકારમયાય તે ।
ગજમસ્તકધારાય ગજેશાય નમો નમઃ ॥ ૪૭॥

આદિમધ્યાન્તભાવાય સ્વાનન્દપતયે નમઃ ।

આદિમધ્યાન્તહીનાય ત્વાદિમધ્યાન્તગાય તે ॥ ૪૮॥

સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવિહારિણે ।
સિદ્ધિબુદ્ધિમયાયૈવ બ્રહ્મેશાય નમો નમઃ ॥ ૪૯॥

શિવાય શક્તયે ચૈવ વિષ્ણવે ભાનુરૂપિણે ।
માયિનાં માયયા નાથ મોહદાય નમો નમઃ ॥ ૫૦॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદાદયોઽપરે ।
યોગિનઃ શાન્તિમાપન્ના અતસ્ત્વાં પ્રણમામ્યહમ્ ॥ ૫૧॥

રક્ષ માં ગર્ભદુઃખાત્ત્વં ત્વામેવ શરણાગતમ્ ।
જન્મમૃત્યુવિહીનં વૈ કુરુષ્વ તે પદપ્રિયમ્ ॥ ૫૨॥

એવં સંસ્તુતવન્તં તં નવમાસાદનન્તરમ્ ।
પ્રસૂતિજો મહાવાયુર્બહિઃ કુર્યાન્નરં ક્ષણાત્ ॥ ૫૩॥

વાયુના ચાલિતઃ સોઽપિ મુમૂર્ચ્છ દુઃખસંયુતઃ ।
સઙ્કીર્ણાઙ્ગઃ પતેજ્જન્તુર્ધરણ્યાં યોનિમાર્ગતઃ ॥ ૫૪॥

ભવેત્ સ સાવધાનોઽત્ર વિસ્મૃતો જ્ઞાનમુત્તમમ્ ।
બાલભાવધરઃ કુર્યાદ્રોદનં ધરણીતલે ॥ ૫૫॥

ફલહીનં ભવેત્ સર્વં ગર્ભાગારકૃતં મહત્ ।
જ્ઞાનાદિકમતો ભૂમૌ સાધયેત્ સર્વમઞ્જસા ॥ ૫૬॥

ન સાધિતં નરેણાત્ર કર્મભૂમૌ પ્રજાપતે ।
જ્ઞાનાદિકં તદા સોઽપિ ગર્ભજં દુઃખમશ્નુતે ॥ ૫૭॥

એવં કૃષ્ણા ગતિશ્ચૈવ કથિતા તે વિશેષતઃ ।
જન્મમૃત્યુકરી જન્તોઃ સુખદુઃખપ્રદાયિની ॥ ૫૮॥

ઇદં ગર્ભકૃતં સ્તોત્રં યઃ પઠિષ્યતિ માનવઃ ।
સ ભુક્ત્વા સકલાન્ ભોગાનન્તે સ્વાનન્દગો ભવેત્ ॥ ૫૯॥

ન કદાચિલ્લભેત્ સોઽપિ ગર્ભવાસં પ્રજાપતે ।
અતો વિશેષતો જન્તુર્નિરન્તરમિદં જપેત્ ॥ ૬૦॥

અધુના કથયિષ્યામિ હ્યન્યમર્થં સુખપ્રદમ્ ।
શુક્લકૃષ્ણગતિસંસ્થં યેન જ્ઞાનં તયોર્ભવેત્ ॥ ૬૧॥

ભુક્તિમુક્તિપ્રલોભાર્થં નરઃ કુર્યાન્નિરન્તરમ્ ।
કર્મ સ્વધર્મસંયુક્તો નાનાદૈવં સ યોગવિત્ ॥ ૬૨॥

ઉત્તરાયણગે ભાનૌ દિવસે વા મૃતો ભવેત્ ।
સ ચાગ્નિલોકમાસાદ્ય તપોયુક્તો ભવેત્ સદા ॥ ૬૩॥

તત્ર ભોગેપ્સુતાં જ્વાલ્ય ગચ્છેચ્છક્તિં મહામતિઃ ।
તત્રાભિમાનમૃત્સૃજ્ય ગચ્છેત્ દિવં દિવાકરમ્ ॥ ૬૪॥

અતિધ્યાનેન સંયુક્તસ્તત્રાત્માનં સ ચિન્તયેત્ ।
અન્તરાત્માનમુત્સૃજ્ય ગચ્છેદ્વિકુણ્ઠમેવ ચ ॥ ૬૫॥

તત્રાનન્દં પરિત્યજ્ય શિવં ગચ્છેન્ન સંશયઃ ।
તત્ર સાક્ષિત્વમુત્સૃજ્ય ગચ્છેત્ સ્વાનન્દમઞ્જસા ॥ ૬૬॥

તત્ર ગણેશ્વરં દૃષ્ટ્વા બ્રહ્મીભૂતો નરો ભવેત્ ।
શુક્લગતિપ્રભાવેણ કથિતં તે પ્રજાપતે ॥ ૬૭॥

યદા દક્ષિણગે ભાનૌ રાત્રૌ વા સ મૃતો ભવેત્ ।
ભુક્તિમુક્તિપરઃ સોઽપિ ગચ્છેત્ સ્વર્ગં તતો નરઃ ॥ ૬૮॥

નાનાસ્વર્ગફલં ભુક્ત્વા સ્વકર્મનિર્મિતં નરઃ ।
પુનઃ પતેદ્વિધે ભૂમૌ તત્ર મોક્ષરુચિર્ભવેત્ ॥ ૬૯॥

તતઃ શુક્લાં સમાશ્રિત્ય મોક્ષં ગચ્છેત્ સ યોગવિત્ ।
એવં જાનીહિ ભો દક્ષ ગત્યોર્માર્ગં પુરાતનમ્ ॥ ૭૦॥

યદૈકદેવતાં શ્રિત્વા તદ્ભક્તસ્તત્પરઃ સદા ।
ઉપાસનાવિધાનેન સ્વધર્મસ્થો ભજેત્ સ તામ્ ॥ ૭૧॥

સ મૃતઃ સ્વેષ્ટદેવસ્ય લોકં ગચ્છેન્ન સંશયઃ ।
તત્ક્ષણાચ્ચન્દ્રસૂર્યાખ્યૌ માર્ગૌ નૈવ પ્રકીર્તિતૌ ॥ ૭૨॥

તત્ર ભોગાન્ પ્રભુઞ્જાનઃ સ પતેદિહ નિશ્ચિતમ્ ।
ત્રિગુણાત્મમયા દેવાસ્તેષાં નાશે પ્રજાપતે ॥ ૭૩॥

યદા ગણેશ્વરં સોઽપિ ભજેદત્રૈવ માનવઃ ।
અન્તે સ્વાનન્દગો ભૂત્વા બ્રહ્મીભૂતો ભવિષ્યતિ ॥ ૭૪॥

સ્વાનન્દો નાશહીનશ્ચ સદા બ્રહ્મસુખપ્રદઃ ।
અતઃ સ્વાનન્દમાશ્રિત્ય બ્રહ્મીભૂતો ભવિષ્યતિ ॥ ૭૫॥

મરણે દાઘહીનશ્ચેત્તેજસ્તત્ત્વં સમાશ્રિતઃ ।
અથવા ધૂમ્રતત્ત્વં સ શુક્લકૃષ્ણગતિશ્રિતઃ ॥ ૭૬॥

પૂર્વવત્ સર્વમાખ્યાતં તસ્ય સર્વં પ્રજાપતે ।
(Page ખં. ૯ અ. ૧૩ પાન ૪૫)
એવં વિસ્તરતો ગત્યોઃ કથિતં તે પ્રજાપતે ॥ ૭૭॥

અતો ગણેશ્વરં દક્ષ સમાશ્રય હિતપ્રદમ્ ।
યોગક્ષેમં સ તે કુર્યાદનન્યચેતસઃ સદા ॥ ૭૮॥

ન શુક્લા નૈવ કૃષ્ણા તે ભવિષ્યતિ ગતિઃ કદા ।
બ્રહ્મભૂયમયં ભાવં પ્રાપ્સ્યસે નાત્ર સંશયઃ ॥ ૭૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન શુક્લકૃષ્ણગતિયોગો નામ દ્વાદશોઽધ્યાયઃ ॥ ૯.૧૨
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ અષ્ટમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૮

## ૯.૧૩ ક્ષેત્રક્ષેત્રજ્ઞજ્ઞાનયોગો નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ક્ષેત્રં વદ મહાભાગ ક્ષેત્રજ્ઞં ચ તયોઃ પરમ્ ।
સર્વગં બ્રહ્મ યત્ પ્રોક્તં યેન જ્ઞાનં તયોર્ભવેત્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
દેહં ક્ષેત્રમયં વિદ્ધિ દેહી ક્ષેત્રજ્ઞમઞ્જસા ।
તયોર્યોગે મહદ્બ્રહ્મ સ્વત ઉત્થાનસંજ્ઞિતમ્ ॥ ૨॥

ભૂતાનિ પઞ્ચતન્માત્રાઃ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ તુ ।
કર્મેન્દ્રિયાણિ પઞ્ચૈવ વાયવઃ પઞ્ચ દેવતાઃ ॥ ૩॥

ઇન્દ્રિયાણાં દશૈવાઽપિ દ્વેષ ઇચ્છા ધૃતિસ્તથા ।
અવ્યક્તં ચેતના દુઃખં સુખં મોહનમેવ ચ ॥ ૪॥

ચિત્તં બુદ્ધિઃ સ્થૂલસૂક્ષ્મે કારણં ચ તુરીયકમ્ ।

એતેષાં યોગભાવે યત્ ક્ષેત્રં તત્ કથિતં બુધૈઃ ॥ ૫॥

સદૈકભાવરૂપશ્ચ ભેદૈઃ સંવર્જિતઃ પરઃ ।
ક્ષેત્રજ્ઞઃ ક્ષેત્રમાસ્થાય સર્વાન્તર્યામિતાં દધે ॥ ૬॥

તયોર્યોગે પરં બ્રહ્મ દૃશ્યાદૃશ્યવિવર્જિતમ્ ।
દૃશ્યાદૃશ્યમયં પૂર્ણં બોધરૂપં પ્રજાપતે ॥ ૭॥

સ્થૂલસૂક્ષ્મસમાત્માખ્યૈર્ભાવૈર્માયા વિશેષતઃ ।
ક્ષેત્રજ્ઞં મોહ્યસ્વાધીનં કરોતિ નિત્યમાદરાત્ ॥ ૮॥

ચતુર્ભેદૈર્વિશેષેણ મોહિતોઽત્યન્તમેવ સઃ ।
અહં દેહસ્વરૂપાખ્યો મન્યતે સતતં મુધા ॥ ૯॥

તતઃ ક્ષેત્રસ્ય ભોગાર્થં નાનાકર્મપરાયણઃ ।
ત્રિગુણેષુ ભ્રમેણૈવ ભ્રમતેઽહમ્મમાત્મકઃ ॥ ૧૦॥

તતસ્તમોગુણં ત્યક્ત્વા રાજસં ધારયેન્નરઃ ।
રાજસં ચ તતસ્ત્યક્ત્વા સાત્ત્વિકઃ સમ્ભવેત્ ક્રમાત્ ॥ ૧૧॥

તતસ્તુરીયમાશ્રિત્ય ગણેશં સ ભજેત્ પરમ્ ।
સર્વગં પઞ્ચમં સાધ્યં બ્રહ્મીભૂતો ભવેન્નરઃ ॥ ૧૨॥

ઇહ સૌખ્યપ્રદં યચ્ચ કર્મ સઞ્જાયતે સદા ।
પાપરૂપમયં તેન જ્ઞાયતે ન કદાચન ॥ ૧૩॥

દેહભોગકરં પૂર્ણં શિશ્નોદરપરાયણમ્ ।
તામસં તદ્વિજાનીહિ ચાન્તે નરકદં ભવેત્ ॥ ૧૪॥

તત્ર તામસસંયુક્તા ભુક્ત્વા દુઃખં મહાદ્ભુતમ્ ।
(Page ખં. ૯ અ. ૧૩ પાન ૪૬)
પુના રોગાદિસંયુક્તા ભવન્તિ નીચયોનિષુ ॥ ૧૫॥

કાણમૂકાદિદોષૈસ્તે સંયુક્તાઃ પાપચેતસઃ ।
દરિદ્રાદિસમાયુક્તા ભોગૈર્હીના ભવન્ત્યપિ ॥ ૧૬॥

પુનઃ પાપસમાચારા ભવન્તિ યદિ માનવાઃ ।
અન્તે યમસ્ય ગેહે તે નરકસ્થાઃ પુનઃ પુનઃ ॥ ૧૭॥

અતસ્તમોગુણસ્થં સ્વભાવં ત્યક્ત્વા ચ માનવાઃ ।
ધર્માર્થધૃતિસંયુક્તા યતન્તે દૈવયોગતઃ ॥ ૧૮॥

વિદ્ધિ રાજસગં ભાવં નરા ભુવિ સકામકમ્ ।
સતતં કર્મ કુર્વન્તિ ભોગદં ધર્મસંયુતાઃ ॥ ૧૯॥

વાસનાસંયુતં કર્મ સ્વધર્મસ્થં ભવેત્કિલ ।
તદેવ રાજસં વિદ્ધિ નાનાભાવગતં પરમ્ ॥ ૨૦॥

રાજસાઃ સર્વભોગં તુ ભુક્ત્વા પુનઃ પતન્ત્યપિ ।
ઇહ યે યાદૃશં કર્મ કુર્વતે તાદૃશં ફલમ્ ॥ ૨૧॥

અથવા સ્વલ્પભાવેન કૃતં રાજસસમ્ભવમ્ ।
કર્મ તેન નરા ભૂમૌ ભવન્તે તત્ક્ષણાત્ પુનઃ ॥ ૨૨॥

અથવા વિવિધાસ્તે તે યોનિષુ સમ્ભવન્ત્યપિ ।
નીચોચ્ચાસુ વિશેષેણ જન્મમૃત્યુપરાયણાઃ ॥ ૨૩॥

રાજસાનાં પ્રજાનાથ નરકો નૈવ વિદ્યતે ।
સ્થાવરં જઙ્ગમં શ્રિત્વા ભવન્તે જન્મસંયુતાઃ ॥ ૨૪॥

તત્ર દુઃખં સુખં નાના ભુઞ્જતે નાત્ર સંશયઃ ।
એવં રાજસગં સર્વં કથિતં તે સમાસતઃ ॥ ૨૫॥

અતઃ પરં પ્રવક્ષ્યામિ સાત્વિકં કામવર્જિતમ્ ।
સ્વધર્મસ્થા જના વિદ્ધિ તત્કુર્વન્તિ નિરન્તરમ્ ॥ ૨૬॥

બ્રહ્માર્પણતયા યદ્યદ્ભવતિ કર્મ ધર્મજમ્ ।
નાનાવિધં પરં તત્તત્ સ્વાત્ત્વિકં વિદ્ધિ માનદ ॥ ૨૭॥

તેન શુક્લગતિં શ્રિત્ય ગચ્છન્તિ મોક્ષમઞ્જસા ।
અતઃ સત્ત્વગુણેનૈવ યુક્તા ભવન્તિ માનવાઃ ॥ ૨૮॥

અતઃ પરં તુરીયં તે કથયામિ સમાસતઃ ।
રસહીનસ્વભાવેન ચિત્તં દેહસમન્વિતમ્ ॥ ૨૯॥

તદા ભવતિ ચેત્તુર્યં કર્મ સઞ્જાયતે પરમ્ ।
નાનાવિધં જગત્ સર્વં બ્રહ્માકારં ન સંશયઃ ॥ ૩૦॥

યદ્યત્તેન કૃતં કર્મ તદેવ બ્રહ્મદં ભવેત્ ।
સ્તુતિનિન્દાદિકં કિઞ્ચિન્નૈવ તત્ર પ્રકીર્તિતમ્ ॥ ૩૧॥

દેવભક્તાદિકં દક્ષ નૈવ તુર્યે પ્રતિષ્ઠિતમ્ ।

બ્રહ્મણિ સમભાવેન વર્તતે સર્વદા સ્વયમ્ ॥ ૩૨॥

અન્તરે સર્વભાવેષુ પશ્યતિ વિશ્વરૂપિણમ્ ।
તદા તુરીયગં કર્મ ક્વચિદ્ભવતિ નાન્યથા ॥ ૩૩॥

એવં સર્વસમત્વેન યદ્ભવેત્તત્તુરીયકમ્ ।
કર્મ પ્રારબ્ધયોગેન બ્રહ્મણો રસભાવતઃ ॥ ૩૪॥

અન્તેઽસ્મિતામયે તેન લીનો ભવતિ માનવઃ ।
મહાકારણભાવેન ભવેત્ ત્રિગુણચાલકઃ ॥ ૩૫॥

અતઃ પરમહં કર્મ કૈવલ્યં કથયામિ તે ।
નિષેધવિધિહીનં યદ્ભવતે કર્મ સ્વેચ્છયા ॥ ૩૬॥

બ્રહ્મભૂયમયં વિદ્ધિ પઞ્ચમં યોગિસમ્મતમ્ ।
કર્તા દેહો ન સન્દેહસ્તુરીયં પ્રેરકં મતમ્ ॥ ૩૭॥

કુતસ્તત્ર વ્યવસ્થાખ્યં તુરીયં વર્તતે પરે ।
ચતુર્વિધં યેન સૃષ્ટમિદં સર્વં સ્વલીલયા ॥ ૩૮॥

સ એવ કર્તૃભાવેન કારયિતૃપ્રભાવતઃ ।
તત્ર તિષ્ઠતિ કોઽહં તુ કુતો બ્રહ્મવિચારતઃ ॥ ૩૯॥

નાહં નરો ન વૈ બ્રહ્મ મયા સાધ્યં નિરન્તરમ્ ।
ભ્રાન્ત્યા સર્વં ન સન્દેહો દૃશ્યતે માયયા મયિ ॥ ૪૦॥

સ્વેચ્છયા ખેલતિ બ્રહ્મ ચતુર્ભેદમયં પરમ્ ।
શુભાશુભં તસ્ય નાસ્તિ વૃથાઽહન્તાં ત્યજેન્નરઃ ॥ ૪૧॥

(Page ખં. ૯ અ. ૧૩ પાન ૪૭)
અનેનાનુભવેનૈવ શાન્ત્યા સંવર્તતે નરઃ ।
રસં સર્વત્ર સન્ત્યજ્ય બ્રહ્મણો રસધારકઃ ॥ ૪૨॥

એવં ચતુર્વિધે ભાવે સ્થિતં દેહિસ્વરૂપકમ્ ।
દેહભ્રાન્તિવિહીનં તત્કૃત્વા સોઽહમ્પરો ભવેત્ ॥ ૪૩॥

એવં ક્રમેણ યોગીન્દ્રો ભવેદ્યોગાન્નરોત્તમઃ ।
કથિતં વિસ્તરાત્ સર્વં ક્ષેત્રક્ષેત્રજ્ઞસાધનમ્ ॥ ૪૪॥

અથ વર્ણાશ્રમાચારં શ ृણુ સર્વસુખપ્રદમ્ ।
યેન ધર્માર્થકામાંશ્ચ લભેન્ મોક્ષં નરોત્તમઃ ॥ ૪૫॥

ચિત્તેન્દ્રિયાણિ વશ્યાનિ ક્ષમાર્જવતપાંસિ ચ ।
શૌચં શ્રુતિસ્મૃતીનાં વૈ જ્ઞાનં યત્ર પ્રતિષ્ઠતિ ॥ ૪૬॥

વેદાધારવિહીનં યન્ન કરોતિ કદાચન ।
સદા બ્રહ્મપરો યસ્માદ્બ્રાહ્મણઃ સ ચ સંસ્મૃતઃ ॥ ૪૭॥

શૌર્યં દાક્ષ્યં તથા દાર્ઢ્યં યુદ્ધે સમ્મુખતા સદા ।
શરણ્યરક્ષણં નિત્યં પ્રભુત્વં દણ્ડધારણમ્ ॥ ૪૮॥

ધૃતિઃ ક્ષાત્રં સદા તેજશ્ચિત્તમૌદાર્યસંયુતમ્ ।
સુનીત્યા પાલનં પઞ્ચ કર્મયુક્તઃ સ બાહુજઃ ॥ ૪૯॥

ક્રયવિક્રયકૌ નિત્યં વસ્તૂનાં ભૂમિકર્ષણમ્ ।
ગવાં પાલનકં ત્રેધા કર્મયુક્તઃ સ વૈશ્યકઃ ॥ ૫૦॥

ત્રિવર્ણસેવનં દાનં નામમન્ત્રં જપેત્ પરમ્ ।
પુરાણશ્રવણં શૌદ્રં કર્મ પૌરાણિકં દ્વિજાત્ ॥ ૫૧॥

અન્ત્યજાનાં પુરાણોક્તં કર્મ વિપ્રમુખોદ્ગતમ્ ।
નૈવ શૂદ્રસમં ચાન્યદસ્પર્શત્વં દ્વિજાદિષુ ॥ ૫૨॥

કૃતોપવીતકો વિપ્રઃ ક્ષત્રિયો વૈશ્ય એવ યઃ ।
વેદાદિકં સમભ્યસ્યન્ બ્રહ્મચર્યયુતો ભવેત્ ॥ ૫૩॥

ભિક્ષાશનો ભવેન્નિત્યં ગુરોરાજ્ઞાવશાનુગઃ ।
ગાયત્રીં સઞ્જપેન્નિત્યં ત્રિકાલેષુ ચ રોમધૃક્ ॥ ૫૪॥

સાયં પ્રાતશ્ચ જુહુયાત્ હવિર્નિત્યં જિતેન્દ્રિયઃ ।
ષોડશાબ્દં દ્વાદશાબ્દં બ્રહ્મચર્યં ચરેત્ પરમ્ ॥ ૫૫॥

પઞ્ચયજ્ઞપરો નિત્યં નૈમિત્તં સ સમાચરેત્ ।
કૃતદારઃ પ્રજાર્થં સ ઋતુગામી ભવેદ્ ગૃહી ॥ ૫૬॥

સ્ત્રીસઙ્ગં સમ્પરિત્યજ્ય સ્ત્રિયા યુક્તો વસેદ્વનમ્ ।
વન્યેન સર્વકર્માણિ કુર્યાન્નિત્યં તપઃ પરમ્ ॥ ૫૭॥

નખલોમયુતશ્ચૈવ ન ગ્રામેષુ પ્રવેશયેત્ ।
કુર્યાદેવં વાનપ્રસ્થો વાયુભક્ષ્યાદિકં ચરેત્ ॥ ૫૮॥

મનસાઽપિ સ્મરેન્નૈવ સ્ત્રીસઙ્ગં ન્યાસસંયુતઃ ।

ચિત્તનિગ્રહસંયુક્તો ભિક્ષાશી સતતં નરઃ ॥ ૫૯॥

કપર્દિકાદિકં કિઞ્ચિન્ન સ્પૃશેત્ સ કદાચન ।
બ્રહ્મણિ બ્રહ્મભૂતત્વં તદર્થં શ્રમયેત્ સદા ॥ ૬૦॥

સાક્ષિવદ્ દેહસંસ્થોઽપિ મૌનાદિદણ્ડધારકઃ ।
અથવા દણ્ડહીનઃ સ જ્ઞાનદણ્ડધરો ભવેત્ ॥ ૬૧॥

એવં સંન્યાસકં કૃત્વા સદા તિષ્ઠેદ્ધતાત્મવાન્ ।
મુક્તિમાર્ગમયં શાસ્ત્રં સ્પૃશેન્નાન્યદ્ભિનિશ્ચિતમ્ ॥ ૬૨॥

વર્ણાશ્રમવિહીનશ્ચેદ્યોગી પઞ્ચમગઃ સ્મૃતઃ ।
વિધિનિષેધહીનઃ સ યથા વિનાયકો ભવેત્ ॥ ૬૩॥

એતત્તે સર્વમાખ્યાતં સ્વધર્માચરણાદિકમ્ ।
યેનૈવ પ્રાપ્યતે યોગો નરેણ બ્રહ્મદાયકઃ ॥ ૬૪॥

દક્ષ ઉવાચ ।
ધર્માર્થકામમોક્ષાણાં સ્વરૂપં વદ માનદ ।
બ્રહ્મીભૂતસ્ય ભિન્નં મે ભ્રમનાશકરં પરમ્ ॥ ૬૫॥

કેચિદ્ધર્મં મહાશ્રેષ્ઠમર્થં કામં તુ મોક્ષકમ્ ।
પરાત્પરં વદન્ત્યેવ બ્રહ્મભૂયં તથાઽપરે ॥ ૬૬॥

મુદ્ગલ ઉવાચ ।
ધર્મેણ બ્રહ્મલોકશ્ચ લભ્યતે માનવૈઃ પરઃ ।
બ્રહ્મા સર્વસમાનશ્ચ સ્વધર્માખ્યઃ પ્રકીર્તિતઃ ॥ ૬૭॥

અર્થઃ સમર્થભાવાખ્ય ઈશલોકપ્રદાયકઃ ।
ઈશ્વરાન્ન સમર્થોઽન્યઃ પશ્ય બ્રહ્માણ્ડમણ્ડલે ॥ ૬૮॥

કામો ભોગાત્મકઃ પ્રોક્તો વિષ્ણુલોકપ્રદાયકઃ ।
સ લક્ષ્મીપતિરાખ્યાતો નાનાકામપ્રદઃ પ્રભુઃ ॥ ૬૯॥

મુક્તિઃ સૌરાત્મિકા પ્રોક્તા સૂર્યઃ પુરુષ ઉચ્યતે ।
શુક્લમાર્ગધરઃ પૂર્ણઃ સાક્ષાત્ સાક્ષી વિભાવસુઃ ॥ ૭૦॥

બ્રહ્મીભૂતમયઃ પ્રોક્તઃ સ્વાનન્દઃ પૂર્ણયોગદઃ ।
વદન્તિ ન પરં લોકં સ્વાનન્દાદ્ભેદવાદિનઃ ॥ ૭૧॥

અન્યચ્છૃણુ પ્રજાનાથ પઞ્ચૈતે યોગદાયકાઃ ।

યોગાર્થવાચકાઃ સર્વે તત્ર ભેદં વદામ્યહમ્ ॥ ૭૨॥

યોગધર્મેણ યોગશ્ચ લભ્યતે માનવૈઃ પરઃ ।
ન યોગાદપરઃ શ્રેષ્ઠસ્તેનાર્થોઽયં પ્રકીર્ત્યતે ॥ ૭૩॥

યોગકામેન યોગોઽયં લભ્યતે સર્વભાવતઃ ।
માયાયા વરણં ત્યક્ત્વા મોક્ષયોગઃ પ્રકીર્ત્યતે ॥ ૭૪॥

બ્રહ્મ બ્રહ્મણિ વેદેષુ કથિતં નાત્ર સંશયઃ ।
તત્ર યોગેન યોગી યો બ્રહ્મીભૂતઃ સ વૈ સ્મૃતઃ ॥ ૭૫॥

ધર્માર્થકામમોક્ષાખ્યા યોગશાસ્ત્રે વિશેષતઃ ।
ભિન્ના માયામયાઃ પ્રોક્તા બ્રહ્મીભૂતસ્તુ પઞ્ચમઃ ॥ ૭૬॥

બ્રહ્મણિ બ્રહ્મભૂતો યો યોગી એવ સ ઉચ્યતે ।
ન ભિન્નઃ સર્વથા તસ્માદ્બ્રહ્મણો બ્રહ્મગઃ પરઃ ॥ ૭૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન ક્ષેત્રક્ષેત્રજ્ઞજ્ઞાનયોગો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૯.૧૩
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ નવમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૯

## ૯.૧૪ નાનામતૈક્યયોગો નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વક્ષ્યામિ ભાવનાં ચૈકાં વેદશાસ્ત્રાર્થસંયુતામ્ ।
નાનામતભયં ત્યક્ત્વા તયા યોગી ભવેન્નરઃ ॥ ૧॥

ચૈતન્યં ન્યાયશાસ્ત્રજ્ઞા વદન્તિ બ્રહ્મમુખ્યકમ્ ।
ચૈતન્યેન યુતાઃ સર્વે સ્વસ્વકાર્યપરાયણાઃ ॥ ૨॥

સર્વપ્રકાશકત્વાત્તચ્ચૈતન્યં બ્રહ્મસંજ્ઞિતમ્ ।
ચૈતન્યેન યદા ત્યક્તં તદા નાશમુપૈષ્યતિ ॥ ૩॥

પઞ્ચચિત્તાત્મયોગેન ચૈતન્યં બ્રહ્મસંજ્ઞિતમ્ ।
ભવત્યત્ર ન સન્દેહઃ શબ્દાર્થાનામનેકતઃ ॥ ૪॥

તાર્કિકાઃ પ્રવદન્ત્યેવ સર્વાભેદં પરં મતમ્ ।

બ્રહ્મવેદાન્તવાદેષુ વિદ્યતે શાસ્ત્રસમ્મતૌ ॥ ૫॥

પઞ્ચચિત્તમયા ભેદા અભેદા યોગિના કૃતાઃ ।
યોગ એકાર્થભાવાખ્યો ભવત્યર્થપ્રમાણતઃ ॥ ૬॥

ધર્મશાસ્ત્રવિદઃ સર્વે બોધાન્નૈવ પરં પદમ્ ।
(Page ખં. ૯ અ. ૧૪ પાન ૪૯)
બ્રહ્મ બોધમયં મુખ્યં ભાવાભાવવિવર્જિતમ્ ॥ ૭॥

પઞ્ચચિત્તગતો ધર્મસ્ત્યક્તવ્યસ્તેન યોગકઃ ।
ધર્મો ભવેન્ન સન્દેહો બ્રહ્મધર્મધરઃ પ્રભુઃ ॥ ૮॥

સાઙ્ખ્યા વદન્તિ સાઙ્ખ્યં યદ્બ્રહ્મ સઙ્ખ્યાવિવર્જિતમ્ ।
વિબોધાન્ન પરં બ્રહ્મ ખેલહીનપ્રભાવતઃ ॥ ૯॥

તત્ર પઞ્ચવિધં ચિત્તં પરં યોગેન સઙ્ખ્યયા ।
હીનં તદેવ ભવતિ યોગાખ્યં શબ્દમાનતઃ ॥ ૧૦॥

મીમાંસકા વદન્ત્યેવ સ્વસંવેદ્યં પરં મતમ્ ।
કારણં બ્રહ્મ તત્રાન્યન્નાસ્તિ બ્રહ્મણિ સંસ્થિતમ્ ॥ ૧૧॥

પઞ્ચચિત્તં પરિત્યજ્ય બ્રહ્મરૂપં કરોતિ તત્ ।
મીમાંસયા સ્વયં યોગી યોગવાચ્યં ભવેત્ પરમ્ ॥ ૧૨॥

એવં નાનામતૈર્યુક્તા વદન્તિ શાસ્ત્રભેદતઃ ।
બ્રહ્મ નાનાવિધં દક્ષ તદેવં યોગગં ભવેત્ ॥ ૧૩॥

શક્તિર્બ્રહ્મેતિ શાક્તા વૈ તે વદન્તિ ન તત્પરમ્ ।
સંયોગો દ્વન્દ્વયોર્યત્ર તદેવં યોગગં ભવેત્ ॥ ૧૪॥

શક્તિઃ પઞ્ચમચિત્તઙ્ગા સા બ્રહ્મણિ સમાગતા ।
પરિગૃહ્ય નિરોધાખ્યં ચિત્તં દેવી તતઃ સ્મૃતા ॥ ૧૫॥

સૌરં બ્રહ્મેતિ સૌરાશ્ચ વદન્તિ તુ પરાત્પરમ્ ।
તસ્માત્પરં ન વિદ્યેત સર્વાધારપ્રમાણતઃ ॥ ૧૬॥

ભેદાત્મકં સ સઞ્જીવ્ય નિત્યં તિષ્ઠતિ ચાદરાત્ ।
તેન યોગમયઃ સૂર્યો ભવત્યત્ર ન સંશયઃ ॥ ૧૭॥

વદન્તિ વિષ્ણુર્બ્રહ્મેતિ મુખ્યં યદ્વૈષ્ણવા જનાઃ ।
તસ્માત્ પરં પદં નાસ્તિ સદાનન્દપ્રમાણતઃ ॥ ૧૮॥

ચિત્તં યત્ પઞ્ચમં તત્ર મોહં ત્યક્ત્વા તદાત્મકમ્ ।
બ્રહ્મયોગે ભવેદ્યોગ આનન્દો નાત્ર સંશયઃ ॥ ૧૯॥

શૈવાઃ શૈવં પરં બ્રહ્મ વદન્તિ મુખ્યભાવતઃ ।
વેદે તસ્માત્ પરં નાસ્તિ કિઞ્ચિન્ મોહવિહીનકમ્ ॥ ૨૦॥

નિરોધં ત્રિવિધં દક્ષ પરાધીનં ન સંશયઃ ।
તત્રસ્થં યોગરૂપાખ્યં સ્વાધીનં યોગગં ભવેત્ ॥ ૨૧॥

એવં નાનામતૈર્યુક્તા સ્વસ્વદેવપરાયણાઃ ।
વદન્તિ તત્ પ્રમાણં વૈ શબ્દાનામર્થભાવતઃ ॥ ૨૨॥

અનેકાર્થમયાઃ શબ્દાસ્તેષુ કિં કિં ન સમ્ભવેત્ ।
સર્વે યોગાર્થવાચ્યા વૈ જાયન્તે યોગિનઃ ક્રમાત્ ॥ ૨૩॥

અન્નપ્રાણાદિકાઃ શબ્દા એવં બ્રહ્મપ્રવાચકાઃ ।
તે સર્વે યોગદા દક્ષ ભવન્તિ બ્રહ્મધારણાત્ ॥ ૨૪॥

વેદાન્તમથ વક્ષ્યામિ સર્વમાન્યં વિશેષતઃ ।
શાસ્ત્રાણિ ચ તદઙ્ગાનિ તત્પ્રમાણાનિ સર્વદા ॥ ૨૫॥

યઃ સર્વં સર્વભાવેષુ યુતો જાનાતિ માયયા ।
(Page ખં. ૯ અ. ૧૪ પાન ૫૦)
માયાહીનપ્રભાવેણ યોગસ્તિષ્ઠતિ નિત્યદા ॥ ૨૬॥

તદેવ બ્રહ્મમુખ્યં તુ સર્વેભ્યો નાત્ર સંશયઃ ।
બ્રહ્મભ્ય ઋગ્જગાદૈવ પ્રજ્ઞાનં યોગગં સ્મૃતમ્ ॥ ૨૭॥

પઞ્ચચિત્તભવં સર્વં યો જાનાતિ તદેવ સઃ ।
યોગસ્તદ્ગતભાવૈઃ સંવર્જિતો ભવતિ પ્રભુઃ ॥ ૨૮॥

અહં બ્રહ્મેતિ યદ્બ્રહ્મ સર્વદોષવિવર્જિતમ્ ।
સદૈવં યજુષા પ્રોક્તં મુખ્યં વૈ પરતઃ પરમ્ ॥ ૨૯॥

પઞ્ચચિત્તભવા ભેદાસ્તેષ્વેવં ભેદવર્જિતમ્ ।
યોગં વિદ્ધિ પ્રજાનાથ યોગશાસ્ત્રપ્રમાણતઃ ॥ ૩૦॥

માયામોહયુતં યચ્ચ માયામોહવિવર્જિતમ્ ।
તયોર્યોગે પરં બ્રહ્મ સામ્ના સઙ્કથિતં કિલ ॥ ૩૧॥

માયામોહયુતં બ્રહ્મ સ્વાનન્દાખ્યં તતઃ પરમ્ ।
અયોગં માયયા હીનં તયોર્યોગે તુ યોગગમ્ ॥ ૩૨॥

બ્રહ્મ બ્રહ્મણિ સંસ્થં યન્મનોવાણીમયં ન તત્ ।
મનોવાણીવિહીનં નાથર્વવેદો જગાદ હ ॥ ૩૩॥

મનોવાણીમયઃ પ્રોક્તઃ સમ્પ્રજ્ઞાતો ન સંશયઃ ।
અસમ્પ્રજ્ઞાતકસ્તાભ્યાં હીનો યોગસ્તયોઃ પરઃ ॥ ૩૪॥

એવં વેદાર્થયુક્તાનિ મહાવાક્યાનિ માનદ ।
યોગાખ્યાનિ વિશેષેણ જાનીયા યોગસેવયા ॥ ૩૫॥

કર્માદયઃ સમાખ્યાતાઃ શબ્દા બ્રહ્મમયા બુધૈઃ ।
ભવન્તિ યોગસંજ્ઞસ્થાસ્તે સર્વે યોગિનાં મતે ॥ ૩૬॥

સર્વશાસ્ત્રમતૈક્યં તે કથિતં શબ્દધારણાત્ ।
તજ્જ્ઞાત્વા મોહહીનઃ સ સદા ભવતિ માનવઃ ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન નાનામતૈક્યયોગો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૯.૧૪
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ દશમોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૧૦

## ૯.૧૫ ગણેશરહસ્યયોગો નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અથો લયં પ્રવક્ષ્યામિ યેન ચિત્તં લયં વ્રજેત્ ।
બ્રહ્મણ્યાસ્થાય યોગં ચ જ્ઞાત્વા યોગં પ્રજાપતે ॥ ૧॥

લયશ્ચતુર્વિધઃ પ્રોક્તો નિત્યો નૈમિત્તિકઃ પરઃ ।
તૃતીયઃ પ્રાકૃતો વિપ્રૈઃ સારસ્વતશ્ચતુર્થકઃ ॥ ૨॥

કર્માકર્મવિકર્માખ્યો નિત્યઃ પ્રોક્તો બુધૈઃ પુરા ।
કર્માનુકૂલભાવેન જનાનાં જનનાદિકમ્ ॥ ૩॥

ક્ષણક્રમાદિમારભ્યાયુષામન્તઃ સમાસ્થિતઃ ।
ગર્ભાધાનાદ્યવસ્થાનાં પ્રકાશશ્ચ પ્રકથ્યતે ॥ ૪॥

બ્રહ્મણો દિવસાન્તે સ કુણ્ઠિતો નાત્ર સંશયઃ ।
નૈમિત્તિકલયેનૈવ ત્રિલોકલયકારિણા ॥ ૫॥

શુભાશુભયુતાઃ સર્વે જન્તવો લયમાયયુઃ ।
શુભાશુભફલૈર્હીના બભૂવુઃ કર્મકુણ્ઠનાત્ ॥ ૬॥

સ્વર્ગમણ્ડલપર્યન્તં ત્રૈલોક્યં પ્રલયં ગતમ્ ।
તાવતા સ પ્રમાણેન નિત્યઃ સઙ્કુથિતો બુધૈઃ ॥ ૭॥

અથો નૈમિત્તિકં દક્ષ કથયામિ સમાસતઃ ।
ચતુર્યુગસહસ્રાણિ બ્રહ્મણો દિનમુચ્યતે ॥ ૮॥

નૈમિત્તિકો દિનાન્તો યસ્તદાઽયં વર્તતે લયઃ ।
તેન નૈમિત્તિકઃ પ્રોક્તો નામ્ના સર્વાર્થકોવિદૈઃ ॥ ૯॥

અધુના પ્રાકૃતં વચ્મિ વ્યવસ્થાભિર્યુતં લયમ્ ।
મહાકારણગં ચેદં સ પ્રાકૃત ઉદાહૃતઃ ॥ ૧૦॥

તત્ત્વાનામેકભાવેઽયં સ્થૂલસૂક્ષ્મસમાત્મનામ્ ।
પ્રાકૃતઃ પ્રકૃતિસ્થત્વાત્ કથ્યતે વિબુધૈઃ પરઃ ॥ ૧૧॥

સારસ્વતં પરં પૂર્ણં શ◌ૃણુ યોગપ્રદં પ્રભો ।
નિરોધચિત્તભાવેન પઞ્ચચિત્તલયાત્મકમ્ ॥ ૧૨॥

મનોવાણીમયં સર્વં વિશ્વં નાનાસ્વભાવગમ્ ।
(Page ખં. ૯ અ. ૧૫ પાન ૫૧)
મનોવાણીવિહીનં ત્વસમ્પ્રજ્ઞાતં વિદુર્બુધાઃ ॥ ૧૩॥

વાણ્યા સઙ્કુથ્યતે ભાવો મનસ્તત્ર પ્રગચ્છતિ ।
નાનાપદાર્થભિન્નત્વાત્ સર્વેષાં પ્રાણિનાં પ્રભો ॥ ૧૪॥

વાણ્યા વાણીવિહીનં યત્ કથિતં બ્રહ્મ હૃદ્ગતમ્ ।
ચિત્તં સમાધિના તત્ર સદા તિષ્ઠતિ તાદૃશમ્ ॥ ૧૫॥

વાણી સા દ્વિવિધા પ્રોક્તા બ્રહ્માકારા જગન્મયી ।
તયોર્નાશે લયઃ પ્રોક્તઃ પરઃ સારસ્વતો બુધૈઃ ॥ ૧૬॥

સરસ્વતીલયં યત્ર યોગભાવાત્ પ્રગચ્છતિ ।
મહાવાક્યાદિસંયુક્તા સ સારસ્વત ઉચ્યતે ॥ ૧૭॥

સારસ્વતલયેનૈવ ચિત્તં પઞ્ચવિધં પ્રભો ।

ચિન્તામણૌ લયં કૃત્વા તિષ્ઠ ત્વં યોગિસમ્મતઃ ॥ ૧૮॥

એતત્ સર્વં સમાખ્યાતં યોગદં તે સમાસતઃ ।
ગોપયૈનં મહાયોગં તતો યોગી ભવિષ્યસિ ॥ ૧૯॥

મા યોગં કથયસ્વ ત્વમિમં કસ્મૈ પ્રજાપતે ।
પાત્રહીનપ્રભાવેણ ભ્રંશદસ્તે ભવિષ્યતિ ॥ ૨૦॥

વાસનાહીનભાવેન ગણેશજ્ઞાનલાલસાન્ ।
તાન્ બોધય વિશેષેણ તદાઽયં શુભદો ભવેત્ ॥ ૨૧॥

અત્ર તે કારણં દક્ષ કથયામિ સમાસતઃ ।
તસ્ય શ્રવણમાત્રેણ સંશયસ્તુ લયં વ્રજેત્ ॥ ૨૨॥

યોગાકારો ગણેશાનો યદા ખેલપરોઽભવત્ ।
તદા તં વચનં માયે સિદ્ધિબુદ્ધી સમૂચતુઃ ॥ ૨૩॥

સિદ્ધિબુદ્ધી ઊચતુઃ ।
યદિ ખેલં કરોષિ ત્વમાવાભ્યાં ગણનાયક ।
આવાં ત્વાં છાદયિષ્યાવો નાનાભાવપ્રદર્શનાત્ ॥ ૨૪॥

વેદાદિભિસ્તત્ર વાણીમયી ગાથા ગજાનન ।
સ્વરૂપં તે યથાતથ્યં કથયિષ્યતિ માનવાન્ ॥ ૨૫॥

તેન ત્વાં બ્રહ્મણાં નાથં જ્ઞાસ્યન્તે માનવાદયઃ ।
ત્વદુપાસનમાત્રેણ ભવેયુર્બ્રહ્મભૂતકાઃ ॥ ૨૬॥

ન ત્વાં છાદયિતું શક્તે વાણીસ્થં ગણનાયક ।
અતસ્તદર્થમાનન્દાત્ કુરુ કિઞ્ચિદ્ગજાનન ॥ ૨૭॥

એવં તયોર્વચઃ શ્રુત્વા તે જગાદ ગજાનનઃ ।
મા ખેદં કુરુતં દેવ્યૌ વાણીં સમ્મોહયામ્યહમ્ ॥ ૨૮॥

મોહિતા સા મયા વાણી વર્ણનં ભ્રાન્તિદં ચ મે ।
કરિષ્યતિ પ્રગૂઢાર્થયુતં સત્યાર્થભાષિતમ્ ॥ ૨૯॥

ગૂઢાર્થં નૈવ દેવેશા યોગીશાસ્તત્ત્વદર્શિનઃ ।
જ્ઞાસ્યન્તિ તેન માં સર્વે ન ભજિષ્યન્તિ ભાવતઃ ॥ ૩૦॥

સિદ્ધિબુદ્ધિયુતં બ્રહ્મ વાણી પ્રકટયિષ્યતિ ।
ન ગણેશમયીં ગાથાં કથયિષ્યતિ યોગદામ્ ॥ ૩૧॥

સિદ્ધિબુદ્ધિમયં સર્વં જગદ્બ્રહ્મ પ્રસેવ્ય યઃ ।
યદા શુદ્ધો નરો ભાવી તદા માં જ્ઞાસ્યતિ પ્રિયે ॥ ૩૨॥

પરં સિદ્ધિયુતં બ્રહ્મ કથિતં સિદ્ધિદાયકમ્ ।
સ એવ ગણનાથોઽયં પતિઃ સિદ્ધેઃ પ્રમાણતઃ ॥ ૩૩॥

પરં બુદ્ધિયુતં બ્રહ્મ પરં બુદ્ધેઃ પ્રકથ્યતે ।
ગણેશ એવ સમ્પ્રોક્તઃ પતિર્બુદ્ધેઃ પ્રમાણતઃ ॥ ૩૪॥

એવં ત્રૈવિધ્યગં વાણી વદિષ્યતિ સદા તુ મામ્ ।
સિદ્ધિદં બુદ્ધિગં બ્રહ્મ શાસ્ત્રેષ્વેતત્ ત્રયં મતમ્ ॥ ૩૫॥

એવમુક્ત્વા ગણેશાનઃ પુનસ્તૂષ્ણીં બભૂવ તમ્ ।
ઉવાચ પ્રણનામાદૌ ભક્તિઃ પરમદુઃખિતા ॥ ૩૬॥

ભક્તિરુવાચ ।
વરો દત્તસ્ત્વયા નાથ સિદ્ધ્યૈ બુદ્ધ્યૈ ગજાનન ।
તેન ભક્તિવિહીનાશ્ચ ભવિષ્યન્તિ સદા નરાઃ ॥ ૩૭॥

(Page ખં. ૨ અ. ૧૫ પાન ૫૨)
અતોઽહં દુઃખસંયુક્તા ચરિષ્યામિ નિરન્તરમ્ ।
માં પાલય ગણાધ્યક્ષ ભક્તિયુક્તાન્ જનાન્ કુરુ ॥ ૩૮॥

એવમુક્તો ગણાધ્યક્ષસ્તામુવાચ સુદુઃખિતામ્ ।
ભક્તિં ભક્તિપ્રિયઃ પૂર્ણઃ સ્મયમાનઃ પ્રજાપતે ॥ ૩૯॥

શ્રીગણેશ ઉવાચ ।
મા શોકં કુરુ કલ્યાણિ નરા મદ્ભક્તિકારકાઃ ।
દેવનાગાસુરાદ્યાશ્ચ ભવિષ્યન્તિ ન સંશયઃ ॥ ૪૦॥

નાનાદેવપરા યે તુ ભક્ત્યા જન્મનિ જન્મનિ ।
સન્તુષ્ટા અમરાસ્તેભ્યો દાસ્યન્ત્યગ્નિરુચિં મુદા ॥ ૪૧॥

તતસ્તેઽગ્નિં સમારાધ્ય ભક્તિયુક્તા નિરન્તરમ્ ।
તુષ્ટં તં વૈ કરિષ્યન્તિ નાનાયજ્ઞપરાયણાઃ ॥ ૪૨॥

તતસ્તસ્ય કૃપાયોગાત્ દેવીભક્તિયુતા નરાઃ ।
ભવિષ્યન્તિ ચ તે સર્વે તાં ભજિષ્યન્તિ સંયતાઃ ॥ ૪૩॥

એવં બહૌ ગતે કાલે સન્તુષ્ટા સા પ્રદાસ્યતિ ।
તેભ્યઃ સૌરીં મહાભક્તિં ભજિષ્યન્તિ તયા રવિમ્ ॥ ૪૪॥

તતો બહૌ ગતે કાલે સૂર્યસ્તોષસમન્વિતઃ ।
ઉગ્રાં દાસ્યતિ ભક્તિં તુ વૈષ્ણવીં તેભ્ય આદરાત્ ॥ ૪૫॥

તયા યુક્તા ભજિષ્યન્તિ વિષ્ણું ભાવસમન્વિતાઃ ।
નરાસ્તતઃ સ સન્તુષ્ટો બહુકાલે ભવિષ્યતિ ॥ ૪૬॥

તુષ્ટો વિષ્ણુઃ સ્વયં તેભ્યો દાતા સ્યાદ્ભક્તિમુત્તમામ્ ।
શૈવીં તયા તતસ્તે તં ભજિષ્યન્તિ સદાશિવમ્ ॥ ૪૭॥

તતો બહૌ ગતે કાલે તુષ્ટઃ શમ્ભુઃ પ્રદાસ્યતિ ।
ભક્તિં ગાણેશ્વરીં તેભ્યો ભજિષ્યન્તિ તયા ચ મામ્ ॥ ૪૮॥

નરાઃ શાન્તિં સમાલભ્ય મત્તો યોગપરાયણાઃ ।
બ્રહ્મીભૂતા ભવિષ્યન્તિ ભજિષ્યન્તિ તથાઽપિ તે ॥ ૪૯॥

એવં ક્રમેણ મદ્ભક્તા ભવિષ્યન્તિ નરાદયઃ ।
ત્વદ્યુક્તા માં ભજિષ્યન્તિ તેષાં વશ્યો ભવામ્યહમ્ ॥ ૫૦॥

ન ભક્તે તે સમં મે વૈ પ્રિયં કિઞ્ચિદ્ભવિષ્યતિ ।
યત્ર ભક્તિર્ગતા તત્ર યથા સ્થાસ્યામિ કિઙ્કરઃ ॥ ૫૧॥

સ્વાનન્દં લક્ષલાભૌ ચ સિદ્ધિં બુદ્ધિં મદીયકમ્ ।
સર્વં તેભ્યઃ પ્રદાસ્યામિ ભક્તેભ્યો નાત્ર સંશયઃ ॥ ૫૨॥

અયં મદીયદેહશ્ચ ભક્ત્યધીનો ભવિષ્યતિ ।
ભક્તાગ્રે ભક્તરૂપેણ સદા સ્થાસ્યામિ દાસવત્ ॥ ૫૩॥

કર્મભ્યશ્ચાધિકં ભક્તે તપઃ પરમદુશ્ચરમ્ ।
તપોભ્યશ્ચાધિકં જ્ઞાનં નિઃસઙ્ગપદદાયકમ્ ॥ ૫૪॥

જ્ઞાનાદ્યોગઃ સમાખ્યાતોઽધિકઃ શાન્તિપ્રદાયકઃ ।
તસ્માચ્ચ ત્વં મહાભક્તે ભવિષ્યસ્યધિકા પ્રિયા ॥ ૫૫॥

ભક્તેઃ પરં ન કિઞ્ચિન્ મે હ્યધિકં શાસ્ત્રસમ્મતમ્ ।
ભવિષ્યતિ મહાભાગે મા ચિન્તાં કુરુ સર્વથા ॥ ૫૬॥

અન્યદ્વાણી મદીયં યદ્ ગૂઢં રૂપં વદિષ્યતિ ।
તદર્થં તે પ્રિયં ભક્તે કરોમિ શ ૃણુ મે વચઃ ॥ ૫૭॥

મદીયભુજસંસ્થોઽયં મુદ્ગલઃ સર્વદર્પહા ।
સ એવ બ્રાહ્મણો ભૂત્વા ચરિષ્યતિ નિરન્તરમ્ ॥ ૫૮॥

કૃતં તેન મદીયં વૈ પુરાણં વેદબૃંહિતમ્ ।
ગૂઢાર્થદ્યોતનં ભાવિ સર્વેભ્યો ભક્તિદાયકમ્ ॥ ૫૯॥

સ્વરૂપં તત્ર મે ભક્તે પ્રકટં પશ્યતાં નૃણામ્ ।
શ્ૃણ્વતાં તત્તદા પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૬૦॥

તથાપિ દુર્લભા ભક્તિર્મદીયા ત્વં ભવિષ્યસિ ।
અતોઽલ્પજ્ઞા ન માં દેવિ ભજિષ્યન્તિ કદાચન ॥ ૬૧॥

(Page ખં. ૯ અ. ૧૬ પાન ૫૩)
વિઘ્નં મૌદ્ગલશાસ્ત્રેઽહં કરિષ્યામિ ભ્રમપ્રદમ્ ।
અશ્રદ્ધં તેન નષ્ટં તદ્ભવિષ્યતિ કદા કદા ॥ ૬૨॥

તવ ભાવસ્ય રક્ષાર્થં મૌદ્ગલં નિર્મિતં મયા ।
અતઃ પરં મહાભક્તે વદ કિં તે કરોમ્યહમ્ ॥ ૬૩॥

એવં તસ્ય વચઃ શ્રુત્વા હર્ષિતા સા નનામ તમ્ ।
ગણેશં ભાવગમ્ભીરા ન કિઞ્ચિત્ પુનરબ્રવીત્ ॥ ૬૪॥

એતત્તે કથિતં દક્ષ ગુહ્યં વિઘ્નેશ્વરસ્ય યત્ ।
અતો ગુપ્તં પ્રકર્ષેણ શાસ્ત્રં કુરુ મદીયકમ્ ॥ ૬૫॥

ત્વં દક્ષઃ સર્વભાવેષુ દક્ષાદક્ષો ન વિદ્યતે ।
અતસ્તુભ્યં મયા સર્વં કથિતં શાસ્ત્રમુત્તમમ્ ॥ ૬૬॥

હૃદિસ્થેન ગણેશેન પ્રેરિતોઽહં પ્રજાપતે ।
તદાજ્ઞયા હૃદિસ્થં મે કથિતં શાસ્ત્રમુત્તમમ્ ॥ ૬૭॥

અનેન વિધિના દક્ષ ભજ ત્વં ગણનાયકમ્ ।
તેનેપ્સિતં સમાસાદ્ય ગાણપત્યો ભવિષ્યસિ ॥ ૬૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન ગણેશરહસ્યયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૯.૧૫
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ એકાદશોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૧૧

## ૯.૧૬ ભક્તિરહસ્યવર્ણનયોગો નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
ધન્યોઽહં કૃતકૃત્યોઽહં કૃતસ્ત્વદ્ય મહામતે ।
ત્વદાજ્ઞાવશગઃ સ્વામિન્ ગુપ્તં ગ્રન્થં કરોમિ તે ॥ ૧॥

અધુના વદ મે ભક્તિં ગણેશસ્ય તયા પરમ્ ।
ભજિષ્યામિ વિશેષેણ સદા ભક્તિપરાયણઃ ॥ ૨॥

મુદ્ગલ ઉવાચ ।
સાઙ્ખ્યયોગૌ પ્રજાનાથ શૃણુ તે કથયામ્યહમ્ ।
તાભ્યાં યુક્તસ્તતો ભક્તિં કરિષ્યસિ પરાં મુદા ॥ ૩॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં પઞ્ચસઙ્ખ્યાવિવર્જિતમ્ ।
કુરુ ચિન્તામણૌ લીનભાવેન ત્વં સુયોગતઃ ॥ ૪॥

એતત્ સાઙ્ખ્યં સમાખ્યાતં ગણેશાભેદદાયકમ્ ।
તેન યોગી ભવેત્ સદ્યઃ શાન્તિયુક્તો વિશેષતઃ ॥ ૫॥

પઞ્ચચિત્તોદ્ભવેષુ ત્વં ભોગેષ્વસિ સુસંસ્થિતઃ ।
બિમ્બરૂપેણ તાન્ ભુઙ્ક્ષ્વ શાન્ત્યા રસસમન્વિતઃ ॥ ૬॥

ચિત્તેષુ ચિત્તભૂતેષુ કર્મ જ્ઞાનાદિકં ભવેત્ ।
તદ્ગણેશાર્પણં સર્વં કુરુ ત્વં નિત્યમાદરાત્ ॥ ૭॥

સ્વધર્મસંસ્થિતં દેહં ચિત્તં શાન્તિસમન્વિતમ્ ।
કુરુષ્વ સતતં દક્ષ બ્રહ્મભાવપરાયણઃ ॥ ૮॥

અયં યોગઃ સમાખ્યાતઃ શાસ્ત્રે વૈ સર્વસમ્મતઃ ।
વેદેષુ ચ પુરાણેષુ બ્રહ્મભૂયપ્રદાયકઃ ॥ ૯॥

સાઙ્ખ્યયોગૌ સમારાધ્ય ભજસ્વ ગણનાયકમ્ ।
યોગાકારં સમાધ્યાય તન્નિષ્ઠસ્તત્પરાયણઃ ॥ ૧૦॥

શ્રવણં ગણનાથસ્ય ગુણાનાં નિત્યમાદરાત્ ।
કીર્તનં તસ્ય તદ્વત્ત્વં કુરુષ્વૈતદ્રસૈર્યુતમ્ ॥ ૧૧॥

(Page ખં. ૯ અ. ૧૬ પાન ૫૪)

ગણેશસ્ય ચ ભાવસ્ય વિસ્મૃતિં મા કુરુ પ્રભો ।
ગણેશપાદજં મોહં ધારયેઃ સત્યભાવતઃ ॥ ૧૨॥

સાઙ્ગં ગણેશ્વરસ્યૈવ કુરુ સર્વં વિશેષતઃ ।
ગણેશાન્ન પરં શ્રેષ્ઠં તસ્માત્તન્નિષ્ઠકો ભવ ॥ ૧૩॥

ગાણપત્યસ્ય માર્ગસ્ય સેવનં કુરુ સર્વદા ।
સાક્ષિરૂપં ગણેશાનં જ્ઞાત્વા હૃત્સ્થં ભજસ્વ ચ ॥ ૧૪॥

ગણેશાન્નૈવ ભિન્નોઽહં ભાવયસ્વ નિરન્તરમ્ ।
એવં નવપ્રકારૈસ્તં ભજ ત્વં ભક્તિસંયુતઃ ॥ ૧૫॥

બાહ્યાન્તરં ગણેશાર્થં કુરુ ત્વં કર્મ ચાદરાત્ ।
નવધા ખણ્ડભાવેન પૂર્ણભક્તો ભવિષ્યસિ ॥ ૧૬॥

અથો ચતુર્વિધાં ભક્તિં કથયામિ શૃણુષ્વ તામ્ ।
કાયિકાં વાચિકાં પૂર્ણાં માનસીં નિત્યદા કુરુ ॥ ૧૭॥

તથા સાંસર્ગિકિં દક્ષ તસ્યાશ્ચિહ્નં વદામ્યહમ્ ।
ગણેશાર્થં સદા દેહશ્રમં કુરુ મહામતે ॥ ૧૮॥

ગણેશભાવહીનાં યાં વાચં મા ત્વં વદસ્વ તામ્ ।
ગણેશચિન્તનં તદ્વદ્ગણેશે ભાવકસ્ય વા ॥ ૧૯॥

ગણેશભક્તિયુક્તાનાં સઙ્ગતિં કુરુ સર્વદા ।
એવં ભજસ્વ ભક્ત્યા ત્વં ભક્તરાજો ભવિષ્યસિ ॥ ૨૦॥

ભક્તિઃ સા દ્વિવિધા દક્ષ માનવૈઃ ક્રિયતે પરા ।
પાખણ્ડસંયુતા પૂર્ણા દેવપ્રીત્યર્થમેવ વા ॥ ૨૧॥

દેહે વિષયભોગાર્થં ભજનં સમ્પ્રવર્તતે ।
પાખણ્ડિનાં સદા દક્ષ લોકમોહકરં પરમ્ ॥ ૨૨॥

પાખણ્ડભજનસ્યૈવ ચિહ્નં મુખ્યં વદામ્યહમ્ ।
તચ્છૃણુ ત્વં હિતાર્થાય લોકાનાં લોકતારક ॥ ૨૩॥

સર્વાહઙ્કારનિર્મુક્તઃ પાખણ્ડી દૃશ્યતે જનૈઃ ।
જના મોહયુતા યેન ભવન્તિ ભજનં યતઃ ॥ ૨૪॥

યત્ર યેષાં રુચિર્દક્ષ યાદૃશી તાદૃશં સદા ।
કરોતિ તત્ર યત્નેન સર્વભાવં પ્રદર્શયન્ ॥ ૨૫॥

યેનૈવ વિષયાણાં ચ પ્રાપ્તિઃ સઞ્જાયતે પરા ।
તાદૃશં ભજનં તસ્ય પરં ભવતિ સર્વદા ॥ ૨૬॥

અથવા ચૈકનિષ્ઠઃ સ ભવતિ દેવતત્પરઃ ।
સ્વદેવભક્તાન્ સમ્મોહ્ય ભુઙ્ક્તે દુષ્ટોઽર્થલાલસઃ ॥ ૨૭॥

સ્વદેવભજને સક્તા જનાઃ સ્વલ્પમતો બહુ ।
તેષાં રુચિપ્રમાણેન ભવતિ ભજનં યતઃ ॥ ૨૮॥

જનાનાં મોહદા ભક્તિઃ કથિતા તે પ્રજાપતે ।
પાખણ્ડિભિઃ સદા પૂર્ણા સેવ્યતે સા રુચિપ્રદા ॥ ૨૯॥

પાખણ્ડસંયુતા નિત્યં ભક્તિં કુર્વન્તિ શાશ્વતીમ્ ।
ચાણ્ડાલાસ્તે મતાઃ શાસ્ત્રે દેવાનાં દુઃખદાયકાઃ ॥ ૩૦॥

સત્યસઙ્કલ્પસિદ્ધ્યા તે સંયુતં દેવમુત્તમમ્ ।
સઙ્ગૃહ્ય ભિક્ષુકં દુષ્ટાઃ કુર્વતેઽધઃ પ્રગામિનઃ ॥ ૩૧॥

અથ દેવપ્રિયાં ભક્તિં શ‌ૃણુષ્વ સુસમાહિતઃ ।
વિચાર્ય હૃદયે ભક્તિં કુરુતે દેવતુષ્ટયે ॥ ૩૨॥

સદા દેવપરો ભૂત્વા ભજતેઽનન્યમાનસઃ ।
લોકાનાં તત્ર સમ્ભૂયાદ્રુચિર્વા હ્યરુચિઃ કદા ॥ ૩૩॥

લોકા નિન્દન્તિ તં ભક્તમુત્તમાશ્ચ સ્તુવન્તિ વા ।
તાનનાદૃત્ય દેવસ્ય પ્રીત્યર્થં ભજતે સદા ॥ ૩૪॥

સ્વકીયે હૃદયે સોઽપિ વિચાર્ય કુરુતે સદા ।
ભક્તિં યાં તાં પ્રજાનાતિ દેવસ્તસ્ય હૃદિ સ્થિતઃ ॥ ૩૫॥

યદા દૈવસ્ય માર્ગસ્યાપમાનં વા હ્યનાદરમ્ ।
કુર્વન્તિ તાન્ પરિત્યજ્ય તદા ભજતિ સર્વદા ॥ ૩૬॥

લોકાનાં રુચિદં તસ્ય ભજનં જાયતે કદા ।
કદા તેષાં વિરુદ્ધં વા ભક્ત્યા તદ્દેવતુષ્ટિદમ્ ॥ ૩૭॥

(Page ખં. ૯ અ. ૧૬ પાન ૫૫)
અનેન વિધિના દક્ષ ભજસ્વ ગણનાયકમ્ ।
ગાણપત્યો ન સન્દેહો ભવિષ્યસિ પરાત્ પરઃ ॥ ૩૮॥

પઞ્ચ ચિત્તેષુ યજ્જ્ઞાનં તદ્વિદ્ધિ વિષયાત્મકમ્ ।
તત્ર રુચિવિહીનસ્ત્વં ભજસ્વ ગણનાયકમ્ ॥ ૩૯ ॥

સદા ગણેશ્વરે દક્ષ રસોત્પત્તિઃ પ્રજાયતે ।
ચિત્તસ્ય નાન્યભાવેષુ યસ્ય ભક્તઃ સ ઉચ્યતે ॥ ૪૦ ॥

એતદ્ભક્તિરહસ્યં તે કથિતં ભક્તિદાયકમ્ ।
સમાસેન ભજસ્વૈવ ગણેશં બ્રહ્મનાયકમ્ ॥ ૪૧ ॥

ઇમં યોગં નરો યસ્તુ શ‍ૃણુયાચ્છ્રાવયેત્ પરમ્ ।
યોગિભ્યો વાઽન્યજન્તુભ્યઃ સ ઇપ્સિતમવાપ્નુયાત્ ॥ ૪૨ ॥

નાનેન સદૃશં કિઞ્ચિદ્યોગદં શાસ્ત્રસમ્મતમ્ ।
અસ્ય શ્રવણમાત્રેણ બ્રહ્મીભૂતો ભવેન્નરઃ ॥ ૪૩ ॥

મહાપાપોપપાપેભ્યો મુચ્યતે પઠનાત્ કિલ ।
શ્રવણાદસ્ય યોગસ્યાન્તે બ્રહ્મ પ્રાપ્નુયાત્ પરમ્ ॥ ૪૪ ॥

પુત્રપૌત્રાદિસંયુક્તો ધનધાન્યસમન્વિતઃ ।
આરોગ્યાદિસમાયુક્તો લભેદન્તે પરં પદમ્ ॥ ૪૫ ॥

સકામકો લભેદ્ભોગાન્ પઠનાદસ્ય નિશ્ચિતમ્ ।
અન્તે બ્રહ્મમયો ભાવી શ્રવણાન્નાત્ર સંશયઃ ॥ ૪૬ ॥

યોગગીતાં પઠેદ્યસ્તુ નિષ્કામઃ શ‍ૃણુયાદથો ।
સ વિઘ્નહીનતાં પ્રાપ્ય બ્રહ્મીભૂતો ભવિષ્યતિ ॥ ૪૭ ॥

યોગગીતાં પઠેદ્યસ્તુ સ ભવેત્ શાન્તિસંયુતઃ ।
શ‍ૃણુયાદ્બ્રહ્મભૂતશ્ચ જ્ઞાનવાન્ સ્થિતિસંયુતઃ ॥ ૪૮ ॥

કર્મનિષ્ઠૈરિયં સેવ્યા તપોનિષ્ઠૈઃ પ્રજાપતે ।
તત્તત્સિદ્ધિસમાયુક્તૈરિહાન્તે બ્રહ્મ ચાપ્યતે ॥ ૪૯ ॥

નિત્યં પઠેદિમાં ગીતાં સ ગણેશો ધરાતલે ।
દર્શનાત્ પાવનો નૃણાં સર્વસિદ્ધિપ્રદાયકઃ ॥ ૫૦ ॥

એકકાલં દ્વિકાલં વા ત્રિકાલં યઃ પઠેદિમામ્ ।
કૃત્વાઽવશ્યં ગણેશાનં સ ભવેત્ સર્વદાયકઃ ॥ ૫૧ ॥

શુક્લકૃષ્ણચતુર્થ્યોસ્તુ પેઠદેતાં નરોત્તમઃ ।
સ ભુક્ત્વા સકલાન્ ભોગાનન્તે બ્રહ્મ લભેત્ પરમ્ ॥ ૫૨ ॥

અથવા શુક્લજાયાં સ ચતુર્થ્યાં ભાદ્રમાઘયોઃ ।
જ્યેષ્ઠે માઘે ચ કૃષ્ણાયાં પઠેદીપ્સિતમાપ્નુયાત્ ॥ ૫૩॥

અથવા ગણરાજસ્ય તીર્થક્ષેત્રાદિકે ગતઃ ।
પઠેદિમાં સુભાવેન સ ઇપ્સિતમવાપ્નુયાત્ ॥ ૫૪॥

વેદશાસ્ત્રપુરાણેષુ યત્ સારં સમુદાહૃતમ્ ।
યોગગીતામયં તુભ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે મુદ્ગલદક્ષસંવાદે યોગામૃતાર્થશાસ્ત્રે
ચિત્તભૂમિનિરોધેન ભક્તિરહસ્યવર્ણનયોગો નામ ષોડશોઽધ્યાયઃ ॥ ૯.૧૬
॥ ઇતિ યોગગીતાસૂપનિષત્સુ સુગમાસુ દ્વાદશોઽધ્યાયઃ ॥ ૯(દત્તગીતા).૧૨
॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ ગીતાશ્લોકસઙ્ખ્યા ॥ ૯૯૮॥

## ૯.૧૭ દક્ષસિદ્ધિપ્રાપ્તિવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એતત્તે કથિતં સર્વં રહસ્યં પરમં મયા ।
ગણેશસ્ય પ્રજાનાથ સમાસેન શુભપ્રદમ્ ॥ ૧॥

અતો ભજ ગણાધ્યક્ષં સર્વેપ્સિતમવાપ્સ્યસિ ।
મા શોકં કુરુ દક્ષ ત્વં યજ્ઞધ્વંસભવં પરમ્ ॥ ૨॥

સૂત ઉવાચ ।
એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં પરમ્ ।
વિધિયુક્તં વિધાનેન મુનિર્દક્ષાય મુદ્ગલઃ ॥ ૩॥

તેન સમ્પૂજિતો યોગી હ્યભવદ્ગન્તુમુદ્યતઃ ।
તસ્મિન્ કાલે ગણાધ્યક્ષઃ પ્રકટોઽભૂચ્છુભપ્રદઃ ॥ ૪॥

મૂષકોપરિસંસ્થં તં સિદ્ધિબુદ્ધિસમન્વિતમ્ ।
પાશાઙ્કુશરદૈર્યુક્તમભયં ધારકં પ્રભુમ્ ॥ ૫॥

ગજાસ્યં રક્તવસ્ત્રૈઃ સઞ્છાદિતં ભૂષણૈર્યુતમ્ ।
નાભિશેષં ગણૈર્યુક્તં પ્રમોદાદ્યૈઃ સુસેવિતમ્ ॥ ૬॥

ત્રિનેત્રમેકદન્તં ચ મહાકુક્ષિં પરાત્પરમ્ ।
દૃષ્ટ્વા સમાગતં દક્ષો મુદ્ગલો હર્ષિતોઽભવત્ ॥ ૭॥

ઉત્થાય સર્વસંયુક્તો નનામ દ્વિરદાનનમ્ ।
દક્ષશ્ચ મુદ્ગલો વિપ્રો દણ્ડવત્ પૃથિવીતલે ॥ ૮॥

તતોઽતિહર્ષસંયુક્તો દક્ષસ્તં પ્રજગાદ હ ।
ગણેશં ભક્તિસંયુક્તઃ સરોમાઞ્ચોઽશ્રુસંયુતઃ ॥ ૯॥

દક્ષ ઉવાચ ।
ધન્યોઽહં સર્વભાવૈશ્ચ દર્શનાત્તે ગજાનન ।
વેદાન્તાગોચરોઽસિ ત્વં બ્રહ્મરૂપઃ સમાગતઃ ॥ ૧૦॥

ધન્યોઽયં મુદ્ગલો યોગી પુરાણં ધન્યમુત્તમમ્ ।
મૌદ્ગલં યેન વિઘ્નેશો મયા પ્રાપ્તઃ પરાત્પરઃ ॥ ૧૧॥

મુદ્ગલેન સમાખ્યાતં ભક્ત્યાધીનો ગજાનનઃ ।
તદદ્ય સત્યરૂપં યન્ મયા જ્ઞાતં પ્રમાણતઃ ॥ ૧૨॥

મુદ્ગલસ્યૈવ ભક્ત્યા ત્વં મોહિતઃ સહસાઽઽગતઃ ।
ત્વત્તઃ શ્રેષ્ઠો ગણેશાન મુદ્ગલો નાત્ર સંશયઃ ॥ ૧૩॥

એવં પ્રવદતસ્તસ્ય દક્ષસ્યાસીન્ મહાત્મનઃ ।
ભક્તે રસઃ સમુત્પન્નો નનર્ત સ હિ વિહ્વલઃ ॥ ૧૪॥

ભ્રાન્તસ્તન્ન સ્મ જાનાતિ કૃત્યં વિઘ્નેશ્વરાય સઃ ।
જય હેરમ્બ વિઘ્નેશ ગણેશ મૂષકધ્વજ ॥ ૧૫॥

ગજાનન પરેશાન જય લમ્બોદર પ્રભો ।
ઉચ્ચરન્ સાસ્રનેત્રશ્ચ દેહાતીત ઇવાઽભવત્ ॥ ૧૬॥

એતસ્મિન્નન્તરે સર્વે સમાજગ્મુઃ સુરેશ્વરાઃ ।
શિવવિષ્ણુમુખાસ્તત્રાગતં જ્ઞાત્વા ગજાનનમ્ ॥ ૧૭॥

મુનયો ભૃગુમુખ્યાશ્ચ નારદાદ્યાઃ સુરર્ષયઃ ।
શુકાદ્યાઃ સનકાદ્યાશ્ચ કપિલાદ્યા મહામુને ॥ ૧૮॥

વસવઃ સાધ્યરુદ્રાશ્ચ ગન્ધર્વાપ્સરસસ્તથા ।

અશ્વિનૌ શેષમુખ્યાશ્ચ નાગાઃ પર્વતનાયકાઃ ॥ ૧૯॥

સિદ્ધાશ્ચારણમુખ્યાદ્યા અસુરા ધર્મપાલકાઃ ।
વિદ્યાધરાઃ કામદુધા ગાવો વિપ્રા અનેકશઃ ॥ ૨૦॥

પ્રણેમુર્ગણરાજં તે હર્ષયુક્તાઃ પ્રતુષ્ટુવુઃ ।
ભક્તિયુક્તા વિશેષેણાત્માનં ધન્યં ચ મેનિરે ॥ ૨૧॥

તતઃ સ મુદ્ગલો યોગી વિસ્મિતઃ પ્રબભૂવ હ ।
પુરાણશ્રવણસ્યૈતત્ દૃષ્ટ્વા ફલમનન્તકમ્ ॥ ૨૨॥

બોધયામાસ દક્ષં સ તતો દક્ષોઽતિહર્ષિતઃ ।
હર્ષં નિયમ્ય વિઘ્નેશં યથાવિધિ પુપૂજ હ ॥ ૨૩॥

તતો દેવેશ્વરાન્ દેવાન્ વિપ્રાદીન્ યોગિમુખ્યકાન્ ।
પૂજયિત્વા પુનઃ સોઽપિ પ્રણનામ ગજાનનમ્ ॥ ૨૪॥

સાશ્રુનેત્રઃ પ્રતુષ્ટાવ ભક્તિનમ્રાત્મકન્ધરઃ ।
અનુ તં દેવવિપ્રાદ્યાસ્તુષ્ટુવુસ્તં પરેશ્વરમ્ ॥ ૨૫॥

સદેવર્ષિર્દક્ષ ઉવાચ ।
નમસ્તે ગણેશાય સર્વાત્મને તે સદા ભક્તિમોહેન મોહાત્મકાય ।
(Page ખં. ૯ અ. ૧૭ પાન ૫૭)
મહેશાદિદેવૈઃ શુકાદ્યૈઃ સ્તુતાય હ્યયોગાય સંયોગધારિન્નમસ્તે ॥ ૨૬॥

ગજાનનાય વૈ તુભ્યં નમઃ પરશુપાણયે ।
ગદાધરાય શઙ્ખં વૈ ધારિણે તે નમો નમઃ ॥ ૨૭॥

વિઘ્નેશાય પરેશાય મહાવિઘ્નવિદારિણે ।
અનાથાય સનાથાય હેરમ્બાય નમો નમઃ ॥ ૨૮॥

નમો નમસ્તેઽસ્તુ મહોદરાય સ્વભક્તસંરક્ષણતત્પરાય ।
અભક્તકામાન્ વિનિહન્તૃકાય સદા સુશાન્તિપ્રદ તે નમો વૈ ॥ ૨૯॥

બ્રહ્મેશાય નમસ્તુભ્યં સદા સ્વાનન્દવાસિને ।
સિદ્ધિબુદ્ધિવરાયૈવ મૂષકધ્વજિને નમઃ ॥ ૩૦॥

દૈત્યમસ્તકધારાય દિતિપુત્રાય તે નમઃ ।
કણ્ઠાધો દેવકાયાય નમો સુરસુરાય તે ॥ ૩૧॥

યોગાય સર્વાત્મકસર્વપૂજ્ય માયાવિનાં મોહકરાય તુભ્યમ્ ।

માયાપ્રચાલાય સુસિદ્ધિદાય ધર્મસ્થપાલાય તુ શૂલપાણે ॥ ૩૨॥

અનન્તલીલયા નાથ સ્વયં ખેલસિ માયયા ।
તત્ર કિં વર્ણયામ્યેવાઽતો બ્રવીમિ નમો નમઃ ॥ ૩૩॥

સદા યોગસ્વરૂપાય ભક્તિભાવપ્રદાય તે ।
ભક્તિપ્રિયાય પૂર્ણાય ભક્તવત્સલ તે નમઃ ॥ ૩૪॥

પ્રસીદ પાહિ વિઘ્નેશ દાસં તે ભક્તિલાલસમ્ ।
માં મુદ્ગલસ્ય શિષ્યં વૈ ભક્તરાજસ્ય માનદ ॥ ૩૫॥

એવમુક્ત્વા ગણેશાનં પ્રણનામ પ્રજાપતિઃ ।
અનુ તં દેવવિપ્રાદ્યાઃ પ્રણેમુસ્તં પરાત્પરમ્ ॥ ૩૬॥

તમુત્થાપ્ય ગણાધીશો જગાદ વચ ઉત્તમમ્ ।
દક્ષં મુદ્ગલમાલોક્ય સ્વભક્તં ભક્તપાલકઃ ॥ ૩૭॥

શ્રીગણેશ ઉવાચ ।
વરાન્ વૃણુ પ્રજાનાથ દાસ્યે તે તુષ્ટિમાગતઃ ।
શ્રવણેન પુરાણસ્ય સ્તોત્રેણ મનસીપ્સિતાન્ ॥ ૩૮॥

ત્વયા કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ॥ ૩૯॥

બ્રહ્મપ્રદં સુશાન્તેશ્ચ દાયકં ભક્તિવર્ધનમ્ ।
ભવિષ્યતિ મહાપ્રાજ્ઞ પરં મત્પ્રીતિવર્ધનમ્ ॥ ૪૦॥

ગણેશવચનં શ્રુત્વા દક્ષો હર્ષસમન્વિતઃ ।
પ્રણમ્ય તં જગાદાઽથ ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૪૧॥

દક્ષ ઉવાચ ।
વરદોઽસિ ગણાધ્યક્ષ તદા તે ભક્તિમુત્તમામ્ ।
દેહિ મે યચ્ચ કૃત્યં તદાદિશેઃ કરવાણિ કિમ્ ॥ ૪૨॥

તચ્છ્રુત્વા ગણનાથસ્તં જગાદ વચ ઉત્તમમ્ ।
જ્ઞાત્વા ભક્તિપ્રિયં દક્ષં હૃષ્ટરોમા મહામુને ॥ ૪૩॥

શ્રીગણેશ ઉવાચ ।
મદીયાં ભક્તિમત્યન્તં કરિષ્યસિ મહામતે ।
દક્ષાઽદ્યપ્રભૃતિ પ્રાજ્ઞો ભવિષ્યસિ યથાર્થગઃ ॥ ૪૪॥

યજ્ઞં કુરુ મહેશેન મયા ધ્વસ્તં સમન્વિતઃ ।
કિઞ્ચિત્ કૃષ્ટં પ્રદત્તં તે શાપૈઃ શૈવૈઃ સુખી ભવ ॥ ૪૫॥

યોગશાન્તિયુતો નિત્યં માં ભજિષ્યસિ સર્વદા ।
સર્વમાન્યઃ સર્વમુખ્યો ભવિષ્યસિ પ્રજાપતિઃ ॥ ૪૬॥

એવમુક્ત્વા ગણેશાનો વિરરામ ચ શૌનક ।
દક્ષો હૃષ્ટમના ભૂત્વા સ ચક્રે યજ્ઞમુત્તમમ્ ॥ ૪૭॥

સમ્પૂજ્યાદૌ ગણાધ્યક્ષં તતઃ શમ્ભુમુખાન્ સુરાન્ ।
મુનીન્નાગાદિકાન્ સર્વાન્ વિસસર્જ સુહર્ષિતઃ ॥ ૪૮॥

તતો મુદ્ગલવિપ્રેશં પૂજયન્ ભક્તિસંયુતઃ ।
ઉવાચ તં સરોમાઞ્ચો દક્ષો દક્ષગણાગ્રણીઃ ॥ ૪૯॥

દક્ષ ઉવાચ ।
કિં દદામિ મહાયોગિન્ શિષ્યોઽહં તે નમામ્યતઃ ।
શરીરં પાદપદ્મે તે સમર્પિતમિદં પ્રભો ॥ ૫૦॥

તતો દક્ષં સમાનન્દ્ય મુદ્ગલઃ પ્રયયૌ મુને ।
સ્વાશ્રમં ગાણપત્યૈઃ સંસેવિતં ગણપપ્રિયઃ ॥ ૫૧॥

ઇદં દક્ષસ્ય માહાત્મ્યં કથિતં તે સમાસતઃ ।
મુદ્ગલસ્ય તથા શ્રેષ્ઠં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૨॥

પુરાણં મૌદ્ગલં પૂર્ણં કથિતં યોગભાવિતમ્ ।
સર્વમાન્યં વિશેષેણ સર્વસંશયનાશનમ્ ॥ ૫૩॥

પુરાણશ્રવણસ્યાપિ ફલં પ્રોક્તં મયા પરમ્ ।
શ્રવણેન પ્રજાનાથો દક્ષો દક્ષો બભૂવ હ ॥ ૫૪॥

અધુનાઽહં ગમિષ્યાપિ સ્વાશ્રમં વિપ્રનાયક ।
ત્વદાજ્ઞયા વદ સ્વામિન્ કિં કરોમિ હિતં પુનઃ ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે દક્ષસિદ્ધિપ્રાપ્તિવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૯.૧૭

# ૯.૧૮ ગણેશસ્વરૂપક્રમવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ધન્યોઽસિ સૂત સર્વેભ્યો ભવાન્ જ્ઞાનાધિકો મતઃ ।
સમસ્ત્રિભુવને નૈવ સંશયાનાં વિનાશકઃ ॥ ૧॥

સર્વસંશયહીનોઽહં ધન્યશ્ચાદ્ય ત્વયા કૃતઃ ।
અધુના કૃતકૃત્યશ્ચ જાતો મુનિસમન્વિતઃ ॥ ૨॥

ન મુદ્ગલસમં કિઞ્ચિન્ મયા જ્ઞાતં પરાત્પરમ્ ।
તેનોક્તં મૌદ્ગલં સૂત મુદ્ગલેન સદૃક્ પરમ્ ॥ ૩॥

વેદશાસ્ત્રપુરાણાનાં નાનામતનિકૃન્તનમ્ ।
મૌદ્ગલં મુદ્ગલાકારં સર્વસારપ્રકાશકમ્ ॥ ૪॥

ત્રૈલોક્યે મુદ્ગલો યોગી માન્યઃ સર્વૈઃ પ્રકીર્તિતઃ ।
સર્વાભિમાનહીનત્વાદ્યથાર્થકરણાત્ કિલ ॥ ૫॥

મુદ્ગલેન કૃતં યદ્વૈ પુરાણં મુદ્ગલાકૃતિ ।
તસ્યાપમાનભાવેન નારકી જાયતે નરઃ ॥ ૬॥

યામા મુદ્ગરહસ્તાસ્તં મારયિષ્યન્તિ નિશ્ચિતમ્ ।
ન વક્તા કુત્ર યોગીન્દ્રો મુદ્ગલેન સદૃક્ ભવેત્ ॥ ૭॥

ન ભૂતો નાધુના કુત્ર વર્તતે સૂત નિશ્ચિતમ્ ।
નિરંહકારસંયુક્તં ભાષણં મુદ્ગલસ્ય ચ ॥ ૮॥

પુરાણાનિ ચ સર્વાણિ સ્વસ્વબ્રહ્મપરાણિ વૈ ।
અભિમાનેન સઙ્ગોપ્ય સ્વદોષં પ્રવદન્તિ હિ ॥ ૯॥

યથાર્થભાષણં સર્વં પુરાણાનાં ન સંશયઃ ।
મુનીનાં દેવતાદીનાં સ્થિતસ્તત્રાપ્યહં કિલ ॥ ૧૦॥

તેન ભિન્નમતાદીનાં પ્રકાશસ્તેષુ જાયતે ।
મૌદ્ગલં સર્વમાન્યં વૈ નિરહઙ્કારભાવતઃ ॥ ૧૧॥

અભિમાનો મહાઘોરો હ્યજેયો દેવયોગિભિઃ ।
મુદ્ગલેન સમાચૂર્ણ્ય કૃતો જીવવિવર્જિતઃ ॥ ૧૨॥

અતોઽયં મુદ્ગલઃ પ્રોક્ત એક એવ મહર્ષિભિઃ ।
તત્ર ચિત્રં ન વૈ સૂત સર્વમાન્યં વદેત્ પરમ્ ॥ ૧૩॥

અહો ગણેશહસ્તસ્થો મુદ્ગલઃ પતિતો ભુવિ ।
નરાકારસ્વરૂપેણાઙ્ગિરસેન પ્રપાલિતઃ ॥ ૧૪॥

સ એવ મુદ્ગલો યોગી યોગરૂપપ્રકાશકઃ ।
તત્ર કિં ચિત્રકં મન્યેઽભિમાનૈર્વર્જિતાત્મકમ્ ॥ ૧૫॥

મુદ્ગલસ્ય ચ દક્ષસ્ય સંવાદેન યુતં પરમ્ ।
પુરાણં ચાઙ્ગિરઃપ્રોક્તં શ્રુતં શાન્તિપ્રદં મયા ॥ ૧૬॥

અધુના વદ સૂત ત્વં પુરાણસ્ય પ્રવિસ્તરાત્ ।
(Page ખં. ૯ અ. ૧૮ પાન ૫૯)
માહાત્મ્યં શ્રવણં ચાસ્ય કીદૃશં ક્રિયતે જનૈઃ ॥ ૧૭॥

વિધિના કેન કર્તવ્યં શ્રવણં કૈઃ પુરા કૃતમ્ ।
કે કે સિદ્ધિયુતા જાતાઃ શ્રવણાદસ્ય માનદ ॥ ૧૮॥

પારાયણં પુરાણસ્ય કર્તવ્યં કીદૃશૈઃ પરમ્ ।
શ્રવણં ભિન્નખણ્ડસ્ય કૈઃ કૃતં તદ્વદસ્વ મે ॥ ૧૯॥

ગણેશસ્ય પુરાણાનિ ચત્વારિ કથિતાનિ તુ ।
તેષાં શ્રવણમાત્રેણ ફલં કિં નુ લભેત્ સમમ્ ॥ ૨૦॥

અથવા ભિન્નભાવાખ્યં ફલં ભવતિ તદ્વદ ।
યેન સંશયહીના વૈ ભજિષ્યામો ગજાનનમ્ ॥ ૨૧॥

સૂત ઉવાચ ।
એકવિંશતિભેદૈઃ સ ગણેશો બ્રહ્મનાયકઃ ।
ક્રીડતિ પ્રણવાકારો બ્રહ્માણ્ડસ્થે પુરાણકે ॥ ૨૨॥

બ્રાહ્મે દ્વાદશભેદૈઃ સ ક્રીડતે બુદ્ધિચાલકઃ ।
નિર્ગુણઃ સગુણાધારઃ પ્રણવસ્ય પ્રચાલકઃ ॥ ૨૩॥

ગાણેશે મૂર્તિમાન્ મુખ્યઃ ક્રીડતિ દ્વન્દ્વભાવતઃ ।
બુદ્ધિસ્થઃ પ્રણવસ્થઃ સ તયોર્યોગાત્મકા કૃતિઃ ॥ ૨૪॥

પ્રણવાત્મકભાવસ્યોપાસનાકાણ્ડ ઉચ્યતે ।
હૃદિ ખેલકરસ્યૈવ ક્રીડાકાણ્ડઃ પ્રકીર્તિતઃ ॥ ૨૫॥

મૌદ્ગલેઽષ્ટવિધઃ સોઽપિ વર્ણિતો યોગધારકઃ ।
સંયોગાયોગયોર્યોગાકારઃ પૂર્ણઃ સુશાન્તિગઃ ॥ ૨૬॥

તેષાં ફલં પ્રવક્ષ્યામિ ગણેશજ્ઞાનકારકમ્ ।
તચ્છ્રુત્વા મુનયઃ સર્વે સંશયેન વિવર્જિતાઃ ॥ ૨૭॥

ત્રિગુણમયકાયાશ્ચ દેવાઃ પઞ્ચ પ્રકીર્તિતાઃ ।
બ્રહ્મા વિષ્ણુઃ શિવઃ સૂર્યઃ શક્તિઃ સર્વત્ર પઠ્યતે ॥ ૨૮॥

અપૂજ્યો વિધિરેકે તુ વદન્તે શાસ્ત્રસમ્મતૌ ।
મધ્યસ્થા યે નરા વિપ્ર બ્રહ્મણો લોકગામિનઃ ॥ ૨૯॥

ચતુર્ણાં ભજને સક્તાઃ શિવાદીનાં નરાદયઃ ।
યે તે તેષાં તુ લોકેષુ ભક્ત્યા ગચ્છન્તિ સંયુતાઃ ॥ ૩૦॥

સગુણોપાસકા યેઽત્ર શિવાદીનાં ગુણાત્મનામ્ ।
તે તેષાં લોકમાસાદ્ય ભુઞ્જતે ભોગકાન્ પરાન્ ॥ ૩૧॥

પુનઃ પતન્તિ ભૂમૌ તે જન્મ ભાગ્યસમન્વિતાઃ ।
ભવન્તિ કૃપયા તેષાં પ્રણવે રુચિસંયુતાઃ ॥ ૩૨॥

તતસ્તે પ્રણવાકારં ભજન્તે ગણરાજકમ્ ।
બ્રહ્મપ્રાપ્ત્યર્થમાનન્દાદ્યત્નવન્તો ન સંશયઃ ॥ ૩૩॥

તતસ્તત્કૃપયા યુક્તા ભવન્તિ જ્ઞાનસંયુતાઃ ।
ત્યક્ત્વા પ્રણવસંસ્થં તે ભજન્તે બુદ્ધિધારકમ્ ॥ ૩૪॥

હૃદિ બુદ્ધિપતિં પૂર્ણં ભજન્તે યત્નસંયુતાઃ ।
શમે દમે પરા નિત્યં નાનાભાવૈર્વિવર્જિતમ્ ॥ ૩૫॥

બુદ્ધિસ્થં તં સમારાધ્ય તત્કૃપાયુક્તચેતસઃ ।
ભજન્તે ગણનાથં વૈ શુણ્ડાદણ્ડવિરાજિતમ્ ॥ ૩૬॥

એકનિષ્ઠસ્વભાવેન તત્પરા નિત્યમાદરાત્ ।
યોગપ્રાપ્ત્યર્થમાનન્દાચ્છમદમપરાયણાઃ ॥ ૩૭॥

ગણેશોપાસનાયુક્તા મન્ત્રધ્યાનપરાયણાઃ ।
ગાણપત્યાભિમાનસ્ય ધારકાઃ સમ્ભવન્તિ તે ॥ ૩૮॥

ન ગણેશાત્ પરં ભાવં માનયન્તિ કદાચન ।
વેદશાસ્ત્રપુરાણેષુ વિચાર્ય મનુજોત્તમાઃ ॥ ૩૯॥

તતસ્તસ્ય કૃપાયોગાન્ મૌદ્ગલસ્થં ભજન્તિ તે ।
યોગશાન્તિપરા ભૂત્વા યોગીશાઃ સમ્ભવન્તિ વૈ ॥ ૪૦॥

એવં ક્રમેણ વિપ્રેન્દ્ર ભવન્તિ ગણપપ્રિયાઃ ।
વિભિન્નફલસંયુક્તાઃ પુરાણોપાસકા મતાઃ ॥ ૪૧॥

પ્રણવોપાસકા યે વૈ પરં તે દેહધારિણમ્ ।
સર્વસામાન્યભાવેન માનયન્તિ ગજાનનમ્ ॥ ૪૨॥

સત્યં પ્રણવરૂપં યત્તત્ર દેહધરઃ કથમ્ ।
તિષ્ઠેત્તુ ગણનાથોઽવયવાદિભિરયં યુતઃ ॥ ૪૩॥

સર્વમોઙ્કાર એવેદં ન ભિન્નં તત્ર વર્તતે ।
અનેન વિધિના તેષાં ભજનં તસ્ય જાયતે ॥ ૪૪॥

તતઃ પરં બુદ્ધિસંસ્થં યે ભજન્તિ મહામુને ।
ગણેશાનં સર્વસમં ભાવયન્તિ ન સંશયઃ ॥ ૪૫॥

બુદ્ધેઃ પરં બુદ્ધિસંસ્થં બુદ્ધેઃ પ્રાકાશ્યદાયકમ્ ।
બ્રહ્મ તત્ર કુતો ભાતિ પ્રણવો હ્યર્થસંયુતઃ ॥ ૪૬॥

મનોવાણીવિહીનં યદ્બ્રહ્મ બ્રહ્મણિગં પરમ્ ।
ગણેશ્વરોઽન્યે તુ તત્ર તિષ્ઠન્તિ ભ્રાન્તિજાઃ કુતઃ ॥ ૪૭॥

એવં ભજન્તિ વિઘ્નેશં પરં પ્રણવવર્જિતમ્ ।
બ્રાહ્મે પુરાણે સંસ્થં તે જાનીહિ મુનિસત્તમ ॥ ૪૮॥

તતઃ પરં ગણેશાનં ગાણેશસ્થં ભજન્તિ યે ।
ગણેશાર્થરહસ્યં તે જ્ઞાત્વા વિશ્વાસસંયુતાઃ ॥ ૪૯॥

પ્રણવઃ પ્રણવાકારો ગણેશઃ સગુણઃ સ્મૃતઃ ।
ઓઙ્કારવર્જિતોઽયં તુ બુદ્ધિસ્થો નિર્ગુણઃ સ્મૃતઃ ॥ ૫૦॥

પ્રણવો બુદ્ધિસંસ્થસ્તુ તત્પરો બ્રહ્મદો ભવેત્ ।
તયોઃ પ્રીત્યર્થમાનન્દાદ્દેહધારી બભૂવ હ ॥ ૫૧॥

ગકારઃ પ્રણવાકારો ણકારો બુદ્ધિચાલકઃ ।
તયોઃ સ્વામી ગણેશોઽયં ગજવક્ત્રાદિચિહ્નિતઃ ॥ ૫૨॥

ગાણપત્યસ્વભાવેન ભજન્તે તં નિરન્તરમ્ ।

એકનિષ્ઠતયા ભક્ત્યા ભવન્તે વિપ્રયોગિનઃ ॥ ૫૩॥

તતસ્તે મૌદ્ગલે પૂર્ણં સેવન્તે ભક્તિસંયુતાઃ ।
ત્રયાણાં દ્યોતકં પૂર્ણં તેષાં યોગે ગજાનનમ્ ॥ ૫૪॥

યોગરૂપો ગણેશોઽયં ત્રિરૂપધારકોઽભવત્ ।
કાર્યાર્થં ખેલસંયુક્તો માયાભ્યાં નાત્ર સંશયઃ ॥ ૫૫॥

પ્રણવો જગદાકારશ્ચિદાકારો હિ ધીસ્થિતઃ ।
તયોરાત્મા તતશ્ચાયં ગજવક્ત્રાદિચિહ્નિતઃ ॥ ૫૬॥

એવં જ્ઞાત્વા ગણેશાનં ભજન્તે ત્રિષુ સંસ્થિતમ્ ।
મૌદ્ગલસ્થા સદા વિપ્ર યોગજ્ઞા યોગરૂપિણમ્ ॥ ૫૭॥

તત્ર તે ભજનં મુખ્યં પઞ્ચધા કથયામ્યહમ્ ।
યેન ભક્ત્યેન્દ્ર ભૂપસ્ત્વં ભવિષ્યસિ મહામતે ॥ ૫૮॥

મૂર્તિસંસ્થં ગણેશાનં ભજેત્ પૂજાદિમાર્ગતઃ ।
મન્ત્રસ્તવનકાદ્યૈશ્ચ દેહધારિસુખપ્રદૈઃ ॥ ૫૯॥

પ્રણવં જગદાકારં તત્ર જીવમયં પ્રભુમ્ ।
ભજેત્ સર્વત્ર સંસ્થં તં સર્વેષાં હિતમાચરન્ ॥ ૬૦॥

કસ્યચિત્ત્વશુભં વિપ્ર ન કુર્યાત્ સ નરોત્તમઃ ।
અનેન વિધિના સોઽપિ તોષયેદ્ ગણનાયકમ્ ॥ ૬૧॥

દ્વન્દ્વભાવં સમાલોક્ય સાક્ષિવદ્ભાવવર્જિતઃ ।
બુદ્ધિસ્થં તોષયેત્ દેવં વિઘ્નેશં ભક્તિવત્સલમ્ ॥ ૬૨॥

ધર્માધર્માદિકં સર્વં ભ્રમં ત્યક્ત્વા મહામતિઃ ।
બુદ્ધિભાવં પરિત્યજ્ય નિઃસઙ્ગઃ સ ભવેત્ સદા ॥ ૬૩॥

નાહં કર્તા કારયિતા ન દેહસ્થો ન નિશ્ચિતમ્ ।
ન બુદ્ધિસ્થોઽહમાનન્દાદ્બ્રહ્માઽહં નિર્મલઃ સદા ॥ ૬૪॥

નિર્લિમલિમહીના યા ભક્તિઃ સા પરિકીર્તિતા ।
તયા ગણેશ્વરઃ પ્રીતો ભવેદાત્મા સદાઽમલઃ ॥ ૬૫॥

ન ગણેશાદહં ભિન્નો દેહધર્મઃ પ્રવર્તતે ।
ગણેશભક્તિસંયુક્તો મૌદ્ગલસ્થો ભજેત્ પરમ્ ॥ ૬૬॥

સ્વયં ગણેશ્વરો ભૂત્વા ત્રિવિધસ્થં ગજાનનમ્ ।
ત્રિભિર્માર્ગૈર્ભજેન્નિત્યં શાન્ત્યા ભક્તિસમન્વિતઃ ॥ ૬૭ ॥

ત્રયાણાં યોગભાવે યો ગણેશસ્ત્રિવિધો મતઃ ।
(Page ખં. ૯ અ. ૧૮ પાન ૬૧)
સ્વયં ત્રિવિધકં પશ્યન્ ભજેચ્ચાનન્યચેતસઃ ॥ ૬૮ ॥

ત્રિભિર્ભાવૈઃ સમાયુક્તો ભજેદ્યોગી મહાયશાઃ ।
ગણેશં ગણપાકારો મૌદ્ગલજ્ઞો વિચક્ષણઃ ॥ ૬૯ ॥

એવં ગણેશ્વરસ્યૈવ ભજનં કુરુ માનદ ।
તેન યોગીન્દ્રવન્દ્યસ્ત્વં ગાણપત્યો ભવિષ્યસિ ॥ ૭૦ ॥

આદૌ દેહધરાન્ શમ્ભુમુખ્યાન્ સંસેવ્ય વૈ નરઃ ।
તતો જીવસ્વરૂપસ્થાન્ પ્રણવાકૃતિધારકાન્ ॥ ૭૧ ॥

તતો બુદ્ધિગતાન્ વિપ્ર તતો ભક્તિં લભેત્ પરામ્ ।
ગણેશં દેહગં સોઽપિ સેવતેઽનન્યભાવતઃ ॥ ૭૨ ॥

તતો મૌદ્ગલકં જ્ઞાત્વા યોગી યોગપરાયણઃ ।
ભજતે ત્રિવિધે સંસ્થં ગણેશં ગણપપ્રિયઃ ॥ ૭૩ ॥

એતત્તે કથિતં સર્વં ભજનં ગણપસ્ય ચ ।
સ્વરૂપં ત્રિવિધં પૂર્ણં ત્રિમાર્ગદ્યોતનં મુને ॥ ૭૪ ॥

શૌનક ઉવાચ ।
અષ્ટાદશ પુરાણાનિ કથિતાનિ વિશેષતઃ ।
અન્યાન્યુપપુરાણાનિ વ્યાસેનામિતબુદ્ધિના ॥ ૭૫ ॥

યથા વેદાસ્તથા સૂત ઉપવેદાઃ પ્રકીર્તિતાઃ ।
નહિ વેદસમા વિપ્રૈર્મન્યન્તે વૈ વિશેષતઃ ॥ ૭૬ ॥

તથૈવોપપુરાણાનિ તેષુ ગાણેશ્વરં પરમ્ ।
મૌદ્ગલં કથિતં વિપ્રૈઃ કથં તત્રાધિકં ભવેત્ ॥ ૭૭ ॥

સૂત ઉવાચ ।
યથા દેવપતિઃ પ્રોક્ત ઇન્દ્રઃ સર્વત્ર વિપ્રપૈઃ ।
ઉપેન્દ્રો વિષ્ણુરાદ્યો વૈ કથ્યતે ચ વિનાયકઃ ॥ ૭૮ ॥

ઇન્દ્રાદધિકભાવેન મતૌ વિષ્ણુવિનાયકૌ ।

તથૈવોપપુરાણાનિ બ્રહ્મસાયુજ્યદાનિ તુ ॥ ૭૯॥

આદૌ શ્રુત્વા પુરાણાનિ તતઃ સાધનસંયુતઃ ।
સાધયિત્વા ભવેદ્વિપ્ર પાત્રં ચોપપુરાણકે ॥ ૮૦॥

એવં જાનીહિ સર્વત્ર પુરાણેષુ વિશેષતઃ ।
વેદોપવેદવચ્ચાત્ર નૈવ બ્રહ્મવિનિશ્ચયાત્ ॥ ૮૧॥

મોહનાર્થં જનાનાં વૈ ભ્રાન્તિભાવપ્રકાશનાત્ ।
ગણેશસ્ય સ્વરૂપં યદ્વર્ણ્યતે ગૂઢકં પરમ્ ॥ ૮૨॥

અતો ગણેશ્વરસ્યૈવ મતા ભક્તિઃ સુદુર્લભા ।
પૂર્ણપુણ્યબલેનાઢ્યૈર્લભ્યતે યોગિભિઃ પરા ॥ ૮૩॥

મૌદ્ગલેન ગણેશસ્ય સ્વરૂપં જ્ઞાયતે જનૈઃ ।
પરિપૂર્ણં ન સન્દેહોઽન્યથા ભ્રાન્તિર્ભવિષ્યતિ ॥ ૮૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
યોગામતાર્થશાસ્ત્રે નવમે ખણ્ડે દક્ષમુદ્ગલસંવાદે
ગણેશસ્વરૂપક્રમવર્ણનં નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૯.૧૮

## ૯.૧૯ પુરાણશ્રવણાદિવિધિવર્ણનં નામ એકોનવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
શુચિઃ સ્વધર્મનિષ્ઠઃ સ એકભુક્તપરાયણઃ ।
બ્રહ્મચર્યસમાયુક્તો રાત્રૌ સુપ્યાત્તથા ભુવિ ॥ ૧॥

અનૃતાદિકમેવં સન્ત્યજેત્ સર્વં સમાહિતઃ ।
હવિષ્યાન્નં ચ ભુક્ત્વા તુ શ‍ૃણુયાદિદમુત્તમમ્ ॥ ૨॥

ગણેશસન્નિધાને વૈ વને વા સ્વગૃહે સ્થિતઃ ।
શ‍ૃણુયાન્ મૌદ્ગલં પૂર્ણં યોગભક્તિપરાયણઃ ॥ ૩॥

અથવા કામનાયુક્તો નિઃકામો વા ભવેન્નરઃ ।
શ‍ૃણુયાન્નિયમે સંસ્થઃ સ સદ્યશ્ચ ફલં લભેત્ ॥ ૪॥

યત્ર વક્તા ભવેદસ્ય તત્ર ગત્વા મહામતિઃ ।
શ‍ૃણુયાદથવા વિપ્ર પુરાણમિદમુત્તમમ્ ॥ ૫॥

બ્રાહ્મણઃ ક્ષત્રિયો વાઽપિ વૈશ્યો વા શ‍ૃણુયાદિદમ્ ।
શૂદ્રશ્ચેત્ બ્રાહ્મણં કઞ્ચિત્ પુરસ્કૃત્ય સમાહિતઃ ॥ ૬॥

ભાદ્રશુક્લપ્રતિપદમારભ્ય ચ ચતુર્દિનમ્ ।
પારાયણં મૌદ્ગલસ્ય શ્રોતવ્યં તૈરુપોષિતૈઃ ॥ ૭॥

માઘસંજ્ઞે તથા માસે તથા જ્યેષ્ઠે પ્રકીર્તિતમ્ ।
પારાયણં મૌદ્ગલસ્ય શ્રોતવ્યં સર્વસિદ્ધયે ॥ ૮॥

અથવા ભાદ્રમાસસ્ય પ્રતિપત્તઃ સમારભેત્ ।
આશ્વિન્યાં પૂર્ણિમાયાં તત્ પુરાણં ચ સમાપયેત્ ॥ ૯॥

એવં માઘે તયા જ્યેષ્ઠે સાર્ધમાસૈકમાનતઃ ।
શ્રોતવ્યં મૌદ્ગલં પૂર્ણં સર્વભાવપરાયણૈઃ ॥ ૧૦॥

અથવા ભાદ્રમાસે ચ પ્રતિપત્તઃ સમારભેત્ ।
પુરાણં મૌદ્ગલં વિપ્ર શ‍ૃણુયાદ્વર્ષમાત્રતઃ ॥ ૧૧॥

પુનર્ભાદ્રપદં પ્રાપ્ય ચૈકભુક્તપરાયણઃ ।
પ્રતિપદ્યાં નિરાહારો ભવેદ્યાવચ્ચતુર્થિકા ॥ ૧૨॥

પઞ્ચમ્યાં મૌદ્ગલં પૂર્ણં સમાપયતુ તન્નરઃ ।
એવં શ્રુત્વા ફલં સદ્યો લભેદીપ્સિતમઞ્જસા ॥ ૧૩॥

વિધિં તત્ર પ્રવક્ષ્યામિ મણ્ડપં કારયેન્નરઃ ।
તોરણાદિસમાયુક્તં નાનાશોભાસમન્વિતમ્ ॥ ૧૪॥

આદૌ ગણેશ્વરં તત્ર પૂજયેત્ પુસ્તકં તતઃ ।
તતો મુદ્ગલવિપ્રેન્દ્રં શુકં યોગવિશારદમ્ ॥ ૧૫॥

પઠતે મૌદ્ગલં તત્ર સંસ્થિતૌ શુકમુદ્ગલૌ ।
તતઃ પૌરાણિકં શાન્તં પૂજયેદ્ભાવસંયુતઃ ॥ ૧૬॥

તતઃ શ્રોતૃગણાન્ પૂજ્ય પ્રાર્થયેત્ સ્નેહસંયુતઃ ।
પૌરાણિકં તતઃ પુણ્યં શ‍ૃણુયાદિદમુત્તમમ્ ॥ ૧૭॥

અર્થેન સંયુતં સર્વં મૌદ્ગલં શ‍ૃણુયાન્નરઃ ।
સર્વાર્થનિપુણસ્તેન સર્વસિદ્ધિયુતો ભવેત્ ॥ ૧૮॥

યદા ચતુર્દિનૈઃ શ્રાવ્યં તદાર્થપરિવર્જિતમ્ ।
પારાયણં સમાખ્યાતં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૯॥

નિત્યમુત્સવસંયુક્તો ભવેદ્ધર્મપરાયણઃ ।
નાનાદાનરતો ભૂત્વા બ્રાહ્મણાદીંશ્ચ ભોજયેત્ ॥ ૨૦॥

ગણેશપ્રીતયે સર્વં કુર્યાદ્ધીમાન્નિરન્તરમ્ ।
વિદિત્વા ધન્યમાત્માનં શ‍ૃણુયાદિદમુત્તમમ્ ॥ ૨૧॥

અન્તે ગણેશ્વરં સોઽપિ પુરાણં પૂજયેત્ પરૈઃ ।
રાજોપચારકાદ્યૈસ્તુ ભક્તિભાવસમન્વિતઃ ॥ ૨૨॥

તતઃ પૌરાણિકં પૂજ્ય તોષયેત્તં ધનાદિભિઃ ।
રત્નાદ્યૈર્હર્ષસંયુક્તઃ પ્રાર્થયેન્નમ્રકન્ધરઃ ॥ ૨૩॥

તારિતોઽહં ત્વયા નાથ પુરાણશ્રાવકેન વૈ ।
અધુના કૃતકૃત્યોઽહં જાતસ્તે પાદદર્શનાત્ ॥ ૨૪॥

એવં પ્રાર્થ્ય નમસ્કૃત્ય તતઃ સર્વાન્ સમાગતાન્ ।
દક્ષિણાદ્યૈઃ સમાતોષ્ય તતસ્તં સ વિસર્જયેત્ ॥ ૨૫॥

પૌરાણિકં તતો ભૂયઃ સમાનીય મહાયશાઃ ।
(Page ખં. ૯ અ. ૨૦ પાન ६૩)
શ્રોતૄનન્યાન્ દ્વિજાદીંશ્ચ ભોજયેન્ મોદકાદિભિઃ ॥ ૨૬॥

તતસ્તાન્ સ નમસ્કૃત્ય પારણં યઃ સમાચરેત્ ।
એવમીપ્સિતકં પ્રાપ્યેહાન્તે બ્રહ્મમયો ભવેત્ ॥ ૨૭॥

અથવા મૌદ્ગલં વિપ્ર શ‍ૃણુયાન્નિત્યમાદરાત્ ।
યથેચ્છયા સમાયુક્તઃ સ્વેચ્છાભોજનકારકઃ ॥ ૨૮॥

બ્રહ્મચર્યાદિહીનઃ સ ભક્તિભાવસમન્વિતઃ ।
ગણેશપ્રીતયે હર્ષાત્ સર્વસિદ્ધિં લભેત્ પરામ્ ॥ ૨૯॥

અકિઞ્ચનોઽપિ વિપ્રેશ શ‍ૃણુયાદ્ભક્તિસંયુતઃ ।
યથાશક્તિવિધાનેન સ પૂજાદિકમાચરેત્ ॥ ૩૦॥

શમીમન્દારદૂર્વાદ્યૈરથવા યઃ સમર્ચયેત્ ।
ફલં સર્વં લભેત્ સોઽપિ પૂજાદાનાદિજં પરમ્ ॥ ૩૧॥

યાદૃશો વિભવઃ સ્વસ્ય તાદૃશં સ સમાચરેત્ ।
તેન વિઘ્નેશ્વરઃ પ્રીતો ભવેત્ સર્વપ્રદાયકઃ ॥ ૩૨॥

શ્લોકાર્ધં શ્લોકપાદં વા પદં શ્લોકસ્થમેવ વા ।
શ‍ૃણુયાન્મૌદ્ગલસ્યાપિ સ ધન્યો નાત્ર સંશયઃ ॥ ૩૩॥

કિં પુનઃ શ્રદ્ધયા યુક્તઃ પુરાણં શ‍ૃણુયાત્ પરમ્ ।
સમ્પૂર્ણં તસ્ય વિપ્રેશ સફલં જનનં ભવેત્ ॥ ૩૪॥

નિત્યં યઃ શ‍ૃણુયાદ્ભક્ત્યા સર્વમાપ્ય સ વિપ્રપ ।
દર્શનાત્ સર્વજન્તૂનાં તારકો ભવતિ પ્રભુઃ ॥ ૩૫॥

યથા ગણેશ્વરો દેવસ્તથાઽસૌ નાત્ર સંશયઃ ।
બ્રહ્મીભૂત ઇવ પ્રાજ્ઞસ્તિષ્ઠેદ્વૈ ભૂમિમણ્ડલે ॥ ૩૬॥

એતત્તે સર્વમાખ્યાતં સવિધિશ્રવણં પરમ્ ।
પઠનં તુ પુરાણસ્ય મૌદ્ગલસ્ય સમાસતઃ ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે પુરાણશ્રવણાદિવિધિવર્ણનં નામ એકોનવિંશોઽધ્યાયઃ ॥ ૯.૧૯

## ૯.૨૦ પુરાણપ્રશસ્તિમાહાત્મ્યવર્ણનં નામ વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
શ્રુત્વા મૌદ્ગલકં પૂર્ણં કે કે સિદ્ધિં પ્રલેભિરે ।
તેષાં ચરિત્રમેવં મે બ્રૂહિ સૂત સમાસતઃ ॥ ૧॥

સૂત ઉવાચ ।
આદૌ મુદ્ગલયોગીશાચ્છ્રુત્વા દક્ષો મહામતિઃ ।
સ સર્વદોષહીનશ્ચ બભૂવે શાન્તિધારકઃ ॥ ૨॥

તતો દક્ષેણ વિઘ્નેશ નિયમઃ સ કૃતો ભવેત્ ।
મૌદ્ગલં નિત્યમેવેદં પઠનીયં નિરન્તરમ્ ॥ ૩॥

અવકાશાનુસારેણ અજપન્નિત્યમાદરાત્ ।
અધ્યાયાદેસ્તથા તત્ર નિયમં ન ચકાર હ ॥ ૪॥

ભાદ્રશુક્લપ્રતિપદિ પ્રારભ્યોપોષણાન્વિતઃ ।
ચતુર્થ્યાં તત્ સમાપ્તં પારાયણં સ ચકાર હ ॥ ૫॥

એવં માઘે તથા પારાયણં જ્યેષ્ઠે મહામતિઃ ।

ચકાર દેવવિપ્રાદ્યૈઃ સંયુતો વાર્ષિકં પરમ્ ॥ ૬॥

એવં ક્રમેણ ભક્ત્યા સ ગજાનનપરાયણઃ ।
મૌદ્ગલં સેવતેઽદ્યાપિ ગાણપત્યસ્વભાવવાન્ ॥ ૭॥

તેનૈવ બોધિતાઃ સર્વે વસિષ્ઠાદ્યા મહામુને ।
સેવન્તે મૌદ્ગલં નિત્યં પ્રજાપતય આદરાત્ ॥ ૮॥

તૈશ્ચાન્યે બોધિતા વિપ્રા યોગમાર્ગપરાયણાઃ ।
નાનાભાવસમાયુક્તા અસેવન્નિદમુત્તમમ્ ॥ ૯॥

(Page  ખં. ૯ અ. ૨૦ પાન ૫૦)
એવં પરમ્પરાપ્રાપ્તં વિદુઃ સર્વે ચ જન્તવઃ ।
નાનાભાવસમાયુક્તા અસેવન્ મૌદ્ગલં પરમ્ ॥ ૧૦॥

દક્ષયજ્ઞે સમાયાતૈઃ શિવવિષ્ણુમુખામરૈઃ ।
તૈર્જ્ઞાતં મૌદ્ગલં પૂર્ણં યોગદં સર્વસિદ્ધિદમ્ ॥ ૧૧॥

યજ્ઞં સમાપ્ય સર્વે તે સ્વં સ્વં ધામ યયુર્મુદા ।
તતઃ શિવેન યોગીશઃ પ્રાર્થિતસ્તત્ર મુદ્ગલઃ ॥ ૧૨॥

પુરાણશ્રવણાર્થં સ પ્રણમ્યાપૂજ્ય ભક્તિતઃ ।
તુષ્ટસ્તેન સમાયુક્તો જગામ શિવમન્દિરમ્ ॥ ૧૩॥

તતઃ પુરાણમાહાત્મ્યં જ્ઞાત્વા વિષ્ણુમુખાઽમરાઃ ।
આયયુઃ શ્રવણાર્થં તે કૈલાસં પર્વતેશ્વરમ્ ॥ ૧૪॥

શિવેન સંયુતાઃ સર્વે બ્રહ્માદ્યાઃ શુશ્રુવુઃ પરમ્ ।
પુરાણં મૌદ્ગલં પૂર્ણં મુદ્ગલાદ્યોગિસાગરાત્ ॥ ૧૫॥

વર્ષેણૈકેન તે શ્રુત્વા પુપૂજુસ્તં શિવાદયઃ ।
વિસૃજ્ય મેનિરે સર્વે સસ્ત્રીકાઃ કૃતકૃત્યતામ્ ॥ ૧૬॥

ગણેશ્વરસ્ય તત્રાંશઃ શિવપુત્રઃ સ્થિતોઽભવત્ ।
સ એવ મૌદ્ગલં નિત્યં જજાપ ગણપપ્રિયઃ ॥ ૧૭॥

મૂર્તિસ્થં ગણનાથં સ પૂજ્ય નિત્યં મહાયશાઃ ।
તત્સન્નિધાનગો ભૂત્વા જજાપ ત્વિદમુત્તમમ્ ॥ ૧૮॥

વિશ્વનાથઃ શિવઃ સાક્ષાત્ કાશ્યાં નિત્યં મહામુને ।
જજાપ નિયમે સંસ્થો ઢુણ્ઢિરાજસ્ય સન્નિધૌ ॥ ૧૯॥

માઘે શુક્લપ્રતિપદિ પ્રારભ્યોપોષણાન્વિતઃ ।
ચતુર્થ્યાં તત્ સમાપ્તં પારાયણં સ ચકાર હ ॥ ૨૦॥

તથા ભાદ્રપદે માસિ મુદ્ગલઃ શુકસંયુતઃ ।
મયૂરેશસ્ય સાન્નિધ્યે ચક્રે પારાયણં મુદા ॥ ૨૧॥

નિત્યં જજાપ ભાવેન ગાણપત્યૈઃ સમન્વિતઃ ।
મહાભક્તશ્ચ સર્વેષાં તારકસ્તારકાકૃતિઃ ॥ ૨૨॥

જ્યેષ્ઠે માસિ સ્વયં પારાયણં શેષશ્ચકાર હ ।
મૂષકસ્થસ્ય સાન્નિધ્યે નાગાસુરસમન્વિતઃ ॥ ૨૩॥

જજાપ નિત્યમેવં સ સર્વભાવસમન્વિતઃ ।
ભક્તિયુક્તો મહાભક્તઃ સર્વેષાં હિતકારકઃ ॥ ૨૪॥

તથા દત્તઃ સ્વયં સાક્ષાજ્જ્ઞાનેશસ્ય પ્રતુષ્ટયે ।
જ્યેષ્ઠે પરાયણં પૂર્ણં ચક્રેઽસૌ ભક્તિસંયુતઃ ॥ ૨૫॥

નિત્યં જપપરો ભૂત્વા જજાપ ત્વિદમુત્તમમ્ ।
નાનાયોગિસમાયુક્તઃ શઙ્કરેણ સમન્વિતઃ ॥ ૨૬॥

વિષ્ણુર્ભાનુર્વિધિઃ શક્તિરિન્દ્રશ્ચાગ્નિમુખાઽમરાઃ ।
નિત્યં સ્વસ્વગૃહે સંસ્થાઃ સેવન્તે મૌદ્ગલં પરમ્ ॥ ૨૭॥

કશ્યપાદ્યા મુનીન્દ્રાશ્ચ મુનયઃ સિદ્ધમુખ્યકાઃ ।
કપિલાદ્યા ઇદં નિત્યં સેવન્તે ભક્તિસંયુતાઃ ॥ ૨૮॥

સનકાદ્યાશ્ચ સંવર્તો યોગિનો નવ એવ ચ ।
નિત્યં જપપરાઃ પૂર્ણં સેવન્તે મૌદ્ગલં મુદા ॥ ૨૯॥

નારદો ગાનસંયુક્તશ્ચચાર ભુવનેષુ ચ ।
ગાયન્નિત્યમિદં વિપ્ર મૌદ્ગલં યોગશાન્તિદમ્ ॥ ૩૦॥

એવં નાના જનાઃ સર્વે મનવશ્ચ મહર્ષયઃ ।
સેવન્તે નિત્યમેવેદં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૩૧॥

વ્યાસઃ સ્વયં મહાભાગઃ સેવતે નિત્યમાદરાત્ ।
ગાણેશં મૌદ્ગલં ચૈવ ભક્તિભાવસમન્વિતઃ ॥ ૩૨॥

એવં મયા ન શક્યં તત્ કથિતું મુનિસત્તમ ।

ભાગ્યવન્તો વિશેષજ્ઞાઃ સેવન્તે મૌદ્ગલં સદા ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
પુરાણપ્રશસ્તિમાહાત્મ્યવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૯.૨૦
(Page ખં. ૯ અ. ૨૧ પાન ૬૫)

## ૯.૨૧ પારાયણવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
અથ કામયુતાનાં યત્ પુરાણશ્રવણે ફલમ્ ।
કથયામિ સમાસેન સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧॥

અત્રિગોત્રોદ્ભવઃ કશ્ચિદ્વિપ્રઃ સર્વાર્થકોવિદઃ ।
ત્યક્ત્વા સ્વધર્મજં કર્મ પાપકર્મપરોઽભવત્ ॥ ૨॥

તં જ્ઞાત્વા પિતરૌ તસ્ય દુઃખયુક્તૌ બભૂવતુઃ ।
સુશીલા સુમુખૌ નામ્ના સુમતિં વીક્ષ્ય દુર્મતિમ્ ॥ ૩॥

સુમતિં વીક્ષ્ય પુત્રં તૌ શિક્ષયન્તૌ નિરન્તરમ્ ।
સ તયોર્વચનં દુષ્ટો ન ચકાર કદાચન ॥ ૪॥

તતસ્તૌ દુઃખસંયુક્તૌ સ્થિતૌ સ્વસ્યાશ્રમે કદા ।
સાક્ષાન્ મુનિવરસ્તત્ર ભરદ્વાજઃ સમાયયૌ ॥ ૫॥

સમ્પૂજ્ય મુનિશાર્દૂલં દુઃખવન્તાવપૃચ્છતામ્ ।
પુત્રં સુશીલં કર્તારમુપાયં સુખદાયકમ્ ॥ ૬॥

તતઃ સ કરુણાવિષ્ટસ્તૌ જગાદ મહામતિઃ ।
પુત્રસ્તે મૌદ્ગલં શ્રુત્વા સુશીલોઽયં ભવિષ્યતિ ॥ ૭॥

એવમુક્ત્વા યયૌ સ્થાનં ભરદ્વાજો મહામુનિઃ ।
સુમુખઃ પુત્રસંયુક્તઃ સ્ત્રિયાઽત્રિં પ્રજગામ હ ॥ ૮॥

તં પ્રણમ્ય મહાભાગં યોગીન્દ્રં યોગદાયકમ્ ।
પપ્રચ્છ મૌદ્ગલં કુત્ર લભ્યતે તદ્વદસ્વ મે ॥ ૯॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષયુક્તો મહામુનિઃ ।

અત્રિઃ સમ્માન્ય વિપ્રેશં જગાદ વચનં હિતમ્ ॥ ૧૦॥

અત્રિરુવાચ ।
મા ચિન્તાં કુરુ પુત્ર ત્વં સ્થીયતામાશ્રમે મમ ।
પારાયણં કરિષ્યામિ ભાદ્રમાસેઽહમાદરાત્ ॥ ૧૧॥

તત્ર ત્વં મૌદ્ગલં શ્રુત્વા ગચ્છ પશ્ચાત્ સ્વમાશ્રમમ્ ।
તથેતિ સુમુખો હર્ષાત્તં પ્રણમ્ય ચકાર હ ॥ ૧૨॥

અથ સ્વલ્પેન કાલેન ભાદ્રનામા સમાયયૌ ।
માસો મુનિગણાસ્તત્ર શ્રવણાર્થં સમાયયુઃ ॥ ૧૩॥

ક્ષત્રિયાન્ વૈશ્યકાન્ શૂદ્રાંસ્તાન્ દૃષ્ટ્વા હર્ષસંયુતઃ ।
સુમુખો વિધિવત્તત્ર શુશ્રુવે વિધિસંયુતઃ ॥ ૧૪॥

ઉપોષણપરો ભૂત્વા પઞ્ચમ્યાં બ્રાહ્મણૈઃ સહ ।
ચકાર પારણં સોઽપિ ભક્તિયુક્તેન ચેતસા ॥ ૧૫॥

તતસ્તસ્ય સુતઃ સોઽપિ સુમતિઃ શીલસંયુતઃ ।
બભૂવ ધર્મસંયુક્તઃ સ્વાચારસ્થો મહામતિઃ ॥ ૧૬॥

તત્ દૃષ્ટ્વા પરમાશ્ચર્યં સસ્ત્રીકઃ પુત્રસંયુતઃ ।
ગણેશભજને સક્તો યોગિવન્દ્યો બભૂવ હ ॥ ૧૭॥

અન્તે ગણેશ્વરં પ્રાપ્ય બ્રહ્મીભૂતોઽભવત્ દ્વિજઃ ।
એતત્તે કથિતં વિપ્ર શ◌ૃણ્વન્યચ્ચિત્રમુત્તમમ્ ॥ ૧૮॥

તત્ર પારાયણે કશ્ચિદ્ વૃષભો દુઃખસંયુતઃ ।
અશક્તત્વાત્ સ્થિતો દૂરં શુશ્રુવે કિઞ્ચિદાદરાત્ ॥ ૧૯॥

મમાર તત્ર તં નેતું ગાણપત્યાઃ સમાયયુઃ ।
તાન્ દૃષ્ટ્વા વિસ્મિતાઃ સર્વે પ્રપચ્છુઃ પરિપૂજ્ય વૈ ॥ ૨૦॥

વિપ્રાદ્યા ઊચુઃ ।
કેન પુણ્યેન યુષ્માભિર્વૃષભો નીયતેઽમરાઃ ।
વદન્તુ ગાણપવરાઃ સ્વાનન્દે ચિત્રમુત્તમમ્ ॥ ૨૧॥

ગાણેશા ઊચુઃ ।
અયં ભવત્સન્નિધાને પતિતો દુઃખસંયુતઃ ।
શુશ્રાવ મૌદ્ગલં પારાયણમેવ મહર્ષયઃ ॥ ૨૨॥

મધ્યે મમાર દુઃખેન પીડિતોઽતિતરાં વૃષઃ ।
અધુના બ્રહ્મભૂતં તં કરિષ્યામો ન સંશયઃ ॥ ૨૩॥

મૌદ્ગલસ્ય પદં શ્રુત્વા લોકસ્થશ્ચેન્ મૃતો ભવેત્ ।
ન તસ્ય પુનરાવૃત્તિર્ભવિષ્યતિ ન સંશયઃ ॥ ૨૪॥

તેષાં તદ્વચનં શ્રુત્વા હર્ષયુક્તા મહર્ષયઃ ।
પપ્રચ્છુસ્તાન્ પુનશ્ચિત્રં સંશયેન સમન્વિતાઃ ॥ ૨૫॥

(Page ખં. ૯ અ. ૨૨ પાન ૬૬)
વિપ્રા ઊચુઃ ।
અયં વૃષભયોનિસ્થો વયં માનવદેહજાઃ ।
અસ્માભિઃ કથિતં સર્વં જ્ઞાયતે વૃષભેણ ન ॥ ૨૬॥

વૃષભેણ યદુક્તં તદ્વચનં માનવૈઃ કદા ।
જ્ઞાયતે ન વિશેષેણ યોનિભિન્નપ્રભાવતઃ ॥ ૨૭॥

અયં વૃષભયોનિસ્થઃ પરં પારાયણં કથમ્ ।
શ્રુત્વા સ તસ્ય માહાત્મ્યં ફલભોક્તા ભવેત્ પરાઃ ॥ ૨૮॥

ગાણેશા ઊચુઃ ।
શ્રવણં વૃષભેણૈવ કૃતં જ્ઞાનવિવર્જિતમ્ ।
અન્યચ્છબ્દપ્રમાતૃત્વં શ્રદ્ધાહીનેન નિશ્ચિતમ્ ॥ ૨૯॥

જ્ઞાનતોઽજ્ઞાનતો વાઽપિ યથા વહ્નિકણો દહેત્ ।
સમ્પૃષ્ટશ્ચેન્ મહાભાગા મૌદ્ગલં તુ તથા સ્મૃતમ્ ॥ ૩૦॥

યોગામૃતમયં પૂર્ણં મૌદ્ગલં સર્વસમ્મતમ્ ।
સર્વસિદ્ધિપ્રદં પ્રોક્તં બ્રહ્મીભૂતકરં તથા ॥ ૩૧॥

એવમુક્ત્વા યયુઃ સર્વે ગાણેશા ગણપાલયમ્ ।
વૃષભં ગૃહ્ય તે ચિત્રં બ્રાહ્મણા વિસ્મિતા જગુઃ ॥ ૩૨॥

એવં મૌદ્ગલજં ચિત્રં માહાત્મ્યં મુનિસત્તમ ।
તસ્ય પ્રભાવજં તેજો વર્ણિતું કઃ ક્ષમો ભવેત્ ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગમૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
પારાયણવર્ણનં નામૈકવિંશતિતમોઽધ્યાયઃ ॥ ૯.૨૧

## ૯.૨૨ માઘપારાયણચરિતવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ક્ષત્રિયો માધવઃ કશ્ચિન્ માલવે સમ્બભૂવ હ ।
અવન્તીનગરીપાલઃ સ્વધર્મનિરતઃ સદા ॥ ૧॥

કામ્બોજઃ કર્ણકો રાજા તત્ર યુદ્ધાર્થમાયયૌ ।
જિત્વા ભૂપમવન્ત્યાં વૈ રાજ્યં ચક્રે સ હર્ષિતઃ ॥ ૨॥

સસ્ત્રીકઃ પુત્રસંયુક્તઃ પ્રધાનૈર્વીરમુખ્યકૈઃ ।
બભ્રામ સ વને રાજા યત્ર તત્ર સુદુઃખિતઃ ॥ ૩॥

તતો મહાવનં વીરો દદર્શ વ્યાઘ્રસંયુતમ્ ।
નાનાપશુયુતં તત્ર પ્રવિવેશ સુદુઃખિતઃ ॥ ૪॥

દૃષ્ટ્વા મુનિવરં તત્ર કશ્યપં સર્વદાયકમ્ ।
પ્રણનામ સ સાષ્ટાઙ્ગં સ રુરોદ હિ વિહ્વલઃ ॥ ૫॥

તં તથા દુઃખસંયુક્તં દૃષ્ટ્વા પપ્રચ્છ કશ્યપઃ ।
જગાદ સ યથાપૂર્વં વૃત્તાન્તં શોકસઙ્કુલઃ ॥ ૬॥

તતસ્તં કશ્યપઃ પ્રાહ મા કુરુ ત્વં મહીપતે ।
ચિન્તાં શ‍ૃણુ સ્વરાજ્યસ્ય પ્રાપકં તત્ કુરુષ્વ ચ ॥ ૭॥

સમીપે માઘમાસઃ સમાગતશ્ચ શ‍ૃણુષ્વ તત્ ।
મૌદ્ગલં સિદ્ધિદં પારાયણં પૂર્ણં કરોમ્યહમ્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા હર્ષયુક્તશ્ચ માધવઃ ।
સર્વૈઃ સાકં સ્થિતસ્તત્ર પુરાણશ્રવણાય સઃ ॥ ૯॥

તથા મુનિગણાદ્યાંશ્ચ શ્રવણાર્થં સમાગતાન્ ।
ક્ષત્રિયાદ્યાન્ સ તાન્ દૃષ્ટ્વા હર્ષયુક્તો બભૂવ હ ॥ ૧૦॥

વિનાયકં પ્રતિપદિ તદા પૂજ્ય મહામુનિઃ ।
ઉપોષણસમાયુક્તઃ શુક્લે સ્ત્રીભિઃ સમારભત્ ॥ ૧૧॥

પારાયણં મૌદ્ગલસ્ય મણ્ડપે વિધિસંયુતઃ ।
(Page ખં. ૯ અ. ૨૨ પાન ૬૭)

ભક્તિયુક્તો મહાયોગી કશ્યપઃ સર્વતત્ત્વવિત્ ॥ ૧૨॥

તત્ર ચિત્રં સમુત્પન્નં તચ્છૃણુષ્વ મહામુને ।
નકુલો ભૂમિસંસ્થશ્ચ શુશ્રાવ ભયસઙ્કુલઃ ॥ ૧૩॥

અકસ્માદ્ દુઃખસંયુક્તો મમાર સ ચ ગાણપાઃ ।
આયયુસ્તાન્ સમાલોક્ય મુનિઃ પપ્રચ્છ કશ્યપઃ ॥ ૧૪॥

કશ્યપ ઉવાચ ।
કિમર્થમાગતા નાથાઃ કાર્યં વદત ચોત્તમમ્ ।
વયં દાસા ગણેશસ્ય કરિષ્યામો જવાન્વિતાઃ ॥ ૧૫॥

કશ્યપસ્ય વચઃ શ્રુત્વા જગુસ્તં ગણપપ્રિયાઃ ।
નકુલં ભૂમિસંસ્થં તુ મૃતં નેતું સમાગતાઃ ॥ ૧૬॥

પારાયણસ્ય વિપ્રેશ મૌદ્ગલસ્યાધુના દ્વિજ ।
અધ્યાયઃ સંશ્રુતઃ પૂર્ણોઽજ્ઞાનતો નકુલેન વૈ ॥ ૧૭॥

દ્વિતીયેઽત્ર સમારબ્ધે જ્વરેણ બહુપીડિતઃ ।
મૃતોઽધુના બ્રહ્મભૂતં કરિષ્યામો વયં કિલ ॥ ૧૮॥

મૌદ્ગલં સિદ્ધિદં પૂર્ણં શ્રુતં તેન મહાત્મના ।
અન્તે તેન પ્રભાવેણ જાનીહિ મુનિસત્તમ ॥ ૧૯॥

તેષાં વચનમાકર્ણ્ય કશ્યપઃ સર્વસંયુતઃ ।
વિસ્મિતસ્તાન્ પ્રણમ્યૈવ પારાયણપરોઽભવત્ ॥ ૨૦॥

ગાણેશા નકુલં ગૃહ્ય યયુઃ સ્વાનન્દકં પુરમ્ ।
ગણેશ્વરં તત્ર દૃષ્ટ્વા બ્રહ્મભૂતો બભૂવ સઃ ॥ ૨૧॥

ચતુર્ભિર્દિવસૈઃ પારાયણં યોગી મહામતિઃ ।
કૃત્વા સમાપ્તં વિઘ્નેશં પૂજયામાસ યત્નતઃ ॥ ૨૨॥

તતઃ સ પારણં ચક્રે પઞ્ચમ્યાં સર્વસંયુતઃ ।
ષષ્ઠ્યાં સ્વં સ્વં સ્થલં જગ્મુર્બ્રાહ્મણાદ્યા મહામુને ॥ ૨૩॥

માધવસ્તં પ્રણમ્યાદૌ પ્રધાનાદિભિરાવૃતઃ ।
નિર્જગામ તતઃ સોઽપિ મહારાષ્ટ્રે સમાયયૌ ॥ ૨૪॥

તત્ર તસ્ય સખા રાજા ભદ્રકો બલસંયુતઃ ।
રાજ્યં ચકાર દેશસ્ય સ્વકીયસ્ય મહાબલઃ ॥ ૨૫॥

તેન સાર્ધં પુનઃ સોઽપિ માધવઃ શસ્ત્રધારકઃ ।
સૈન્યેન સંયુતઃ ક્રુદ્ધઃ સઙ્ગ્રામાય સમાયયૌ ॥ ૨૬॥

ગણેશં મનસિ સ્મૃત્વા કશ્યપં સ્વગુરું પરમ્ ।
જિગ્યે કામ્બોજરાજં તં યુદ્ધં કૃત્વા સુદારુણમ્ ॥ ૨૭॥

પપાલ ભયસંયુક્તોઽભવત્ કર્ણઃ પરાજિતઃ ।
માધવઃ સ્વસ્ય રાજ્યં તુ ચકાર સ સુહૃદ્ગણઃ ॥ ૨૮॥

ભોગાન્નાનાવિધાન્ રાજા બુભુજે પુત્રપૌત્રવાન્ ।
ગણેશમભજન્નિત્યં મૌદ્ગલં તત્તથાઽશ‍ૃણોત્ ॥ ૨૯॥

અન્તે જગામ વિઘ્નેશં બ્રહ્મીભૂતો બભૂવ હ ।
પારાયણસ્ય સંશ્રાવમાહાત્મ્યાત્ સ નરોત્તમઃ ॥ ૩૦॥

એવં નાના જના વિપ્ર સિદ્ધિં પ્રાપ્તા ન શક્યતે ।
વક્તું કેનાપિ કોઽહં તુ મૌદ્ગલશ્રવણેન વૈ ॥ ૩૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
માઘપારાયણચરિતવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૯.૨૨

## ૯.૨૩ જ્યેષ્ઠમાસપારાયણમાહાત્મ્યવર્ણનં નામ ત્રયોવિંશોધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
બ્રાહ્મણઃ સુમતિર્નામ કુષ્ઠયુક્તો બભૂવ હ ।
સમ્ભૂતો ગાલવે વંશે પીડાં લેભે સુદારુણામ્ ॥ ૧॥

સર્વાઙ્ગે ભક્ષિતઃ કીટૈઃ સદા દુર્ગન્ધસંયુતઃ ।
પૂયશોણિતઘર્માદ્યૈર્વ્યાપ્તઃ સર્વત્ર વિપ્રપ ॥ ૨॥

તતઃ સોઽપિ સ્વદેહસ્ય ઘાતાર્થં ઉદ્યતોઽભવત્ ।
સસ્માર ગણપં ચિત્તે વિઘ્નહીનાર્થમાદરાત્ ॥ ૩॥

એતસ્મિન્નન્તરે તત્રાજગામ દ્વિજસત્તમઃ ।
ધૌમ્યઃ સર્વાર્થવિત્ સાક્ષાજ્જાતવેદા ઇવાપરઃ ॥ ૪॥

તં દૃષ્ટ્વા પ્રણનામાદૌ રુરુદે દુઃખસંયુતઃ ।
સુમતિં તં પ્રદૃશ્યૈવ ધૌમ્યોઽગાદીત્ સ સૌખ્યદમ્ ॥ ૫॥

ધૌમ્ય ઉવાચ ।
મા ચિન્તાં કુરુ મા દેહઘાતં કુરુ મહામતે ।
મૌદ્ગલં શ‍ૃણુ ભાવેન રોગહીનો ભવિષ્યસિ ॥ ૬॥

સર્વસિદ્ધિકરં પૂર્ણં બ્રહ્મીભૂતત્વદાયકમ્ ।
મૌદ્ગલં શ્રવણેનૈવ ચલ શીઘ્રં મયા સહ ॥ ૭॥

એવમુક્ત્વા જનૈસ્તસ્ય તં ગૃહ્ય મુનિસત્તમઃ ।
જગામ પુલહં ધૌમ્યો નાનામુનિજનૈર્વૃતમ્ ॥ ૮॥

તત્ર જ્યેષ્ઠઃ સમાયાતો માસઃ સર્વાર્થસિદ્ધિદઃ ।
સ્વલ્પકાલેન યોગીશઃ પુલહો હર્ષિતોઽભવત્ ॥ ૯॥

શુક્લપ્રતિપદિ પારાયણં પ્રાજ્ઞઃ સમારભત્ ।
મૌદ્ગલસ્ય પુરાણસ્ય નાનાજનસમન્વિતઃ ॥ ૧૦॥

ઉપોષણસમાયુક્તા બભૂવુસ્તે મહામુને ।
શ્રવણે તત્પરાઃ સર્વે પુલહશ્ચ તથાઽભવત્ ॥ ૧૧॥

સુમતિર્ધૌમ્યસંયુક્તસ્તથાભૂતો મહામતિઃ ।
ગણેશં મનસિ ધ્યાત્વા પરં શુશ્રાવ મૌદ્ગલમ્ ॥ ૧૨॥

ચતુર્ભિર્દિવસૈઃ સોઽપિ સમાપ્તં તચ્ચકાર હ ।
પઞ્ચમ્યાં પારણં સર્વૈશ્ચકાર ગણપે રતઃ ॥ ૧૩॥

સુમતિઃ કુષ્ઠહીનઃ સ બભૂવે તત્ક્ષણાન્ મુદા ।
તં દૃષ્ટ્વા હર્ષસંયુક્તા વિસ્મિતાસ્તે બભૂવિરે ॥ ૧૪॥

ધૌમ્યેનાનમ્ય પુલહં સ્વાશ્રમં સ સમાયયૌ ।
તત્ર ધૌમ્યં પ્રપૂજ્યાદૌ જગાદ સુમતિર્વચઃ ॥ ૧૫॥

સુમતિરુવાચ ।
અસ્ય દેહસ્ય કર્તા ચ પિતા માતા મહામુને ।
ત્વમેવ મે ન સન્દેહઃ કિં કરોમિ ત્વદીપ્સિતમ્ ॥ ૧૬॥

દેહોઽયં મે મયા વિપ્ર તવાધીનઃ કૃતઃ સદા ।
શાધિ માં તદહં નિત્યં કરિષ્યામિ વિશેષતઃ ॥ ૧૭॥

ધૌમ્ય ઉવાચ ।
ગણેશં ભજ ભાવેન મૌદ્ગલેન સમન્વિતમ્ ।
તેન માં કૃતકૃત્યં ત્વં કરિષ્યસિ ન સંશયઃ ॥ ૧૮॥

એવમુક્ત્વા મહાયોગી ધૌમ્યઃ સ્વાશ્રમગોઽભવત્ ।
સુમતિર્ગણનાથં સ મૌદ્ગલેનાઽભજત્ સદા ॥ ૧૯॥

અન્તે બ્રહ્મમયો જાતો ભુક્ત્વા ભોગાન્ યથેપ્સિતાન્ ।
એવં જ્યેષ્ઠાભિધે માસે પારાયણફલં પરમ્ ॥ ૨૦॥

અથાન્યચ્છૃણુ ધર્મજ્ઞ વૃત્તાન્તં તત્ર સમ્ભવમ્ ।
પુલહો હર્ષસંયુક્તશ્ચક્રે પારાયણં પરમ્ ॥ ૨૧॥

તત્ર કશ્ચિત્તુ ચાણ્ડાલ આયયૌ સ યદૃચ્છયા ।
દૂર સ્થિતઃ પશ્યતિ સ્મ કિમિદં કૌતુકં મહત્ ॥ ૨૨॥

દૂરસ્થેન શ્રુતં તેન શ્લોકસ્ય પદમુત્તમમ્ ।
એકં સમ્પૂર્ણભાવેન ભક્તસંરક્ષકસ્ય ચ ॥ ૨૩॥

તતઃ સ વિસ્મિતો ભૂત્વા જગામ સ્વેચ્છયેરિતઃ ।
પાપકર્મા પુનઃ પાપં ચકાર વિવિધં મુને ॥ ૨૪॥

મૃતં તં યમદૂતાશ્ચ ગૃહ્ય સર્વે ત્વરાન્વિતાઃ ।
જગ્મુર્દેવં પ્રણમ્યાદૌ દદુસ્તં પાપકારકમ્ ॥ ૨૫॥

(Page ખં. ૯ અ. ૨૪ પાન ૬૯)
તત્રોવાચ મહાબુદ્ધિશ્ચિત્રગુપ્તો યમં વચઃ ।
મહાપાપી મહાભાગ ચાણ્ડાલોઽયં વિશેષતઃ ॥ ૨૬॥

ન પુણ્યસ્ય કદા લેશશ્ચાણ્ડાલેન કૃતઃ પ્રભો ।
મૌદ્ગલસ્ય પદં નાથ શ્રુતમેકમનેન ચ ॥ ૨૭॥

એતત્ સર્વં મયા તુભ્યં કથિતં તસ્ય ચેષ્ટિતમ્ ।
કુરુ યદ્ધર્મસંયુક્તં દણ્ડરૂપં મહામતે ॥ ૨૮॥

ચિત્રગુપ્તવચઃ શ્રુત્વા ધર્મો ધ્યાત્વા ગજાનનમ્ ।
વિચારમકરોચ્ચિત્તે કિં કરોમિ સુખપ્રદમ્ ॥ ૨૯॥

એતસ્મિન્નન્તરે તત્ર સત્યા વાક્ તમુવાચ હ ।
પ્રદૃશ્ય નરકાનેવ ચાણ્ડાલાય મહામતે ॥ ૩૦॥

સન્તર્જ્ય સ્વર્ગભૂમીષુ સ્થાપયસ્વ યથા સુખમ્ ।
તથા ચકાર સંહર્ષાદ્ધર્મરાજઃ પ્રતાપવાન્ ॥ ૩૧॥

સ્વસ્થાને ભોગસંયુક્તં કૃત્વા તં સ્થાપ્ય સૂર્યજઃ ।
સંસ્થિતસ્તત્ર ચિત્રં વૈ બભૂવે પરમાદ્ભુતમ્ ॥ ૩૨॥

ગાણેશાસ્તં પ્રગૃહ્યૈવ યયુઃ સ્વાનન્દકં પુરમ્ ।
ધર્માદયસ્તતઃ સર્વે વિસ્મિતાઃ સમ્બભૂવિરે ॥ ૩૩॥

એવમેકપદસ્યૈવ મૌદ્ગલશ્લોકગસ્ય યત્ ।
શ્રવણેન ફલં પ્રોક્તમતઃ કિં વર્ણયામ્યહમ્ ॥ ૩૪॥

એવં જ્યેષ્ઠાભિધે માસિ શ્રુત્વા પારાયણં નરાઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાયયુઃ ॥ ૩૫॥

તત્ર વક્તું મયા વિપ્ર શક્યતે ન કદાચન ।
વર્ષાયુતૈસ્તતસ્તુભ્યં કથિતં લેશતઃ પરમ્ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
જ્યેષ્ઠમાસપારાયણમાહાત્મ્યવર્ણનં નામ ત્રયોવિંશોધ્યાયઃ ॥ ૯.૨૩

## ૯.૨૪ દક્ષમુગલસંવાદે વિકલ્પવિજયો નામ ચતુર્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
ચિત્રં ત્વં સૂત વદસિ ન શ્રુતં કુત્રચિન્ મયા ।
એકં શ્લોકપદં શ્રુત્વા નરો બ્રહ્મમયોઽભવત્ ॥ ૧॥

અહો પાપસમાચારશ્ચાણ્ડાલઃ શ્લોકસમ્ભવમ્ ।
મૌદ્ગલસ્ય પદં શ્રુત્વા બ્રહ્મભૂતો બભૂવ હ ॥ ૨॥

અતો મૌદ્ગલજં પૂર્ણં માહાત્મ્યં કીદૃશં ભવેત્ ।
તદ્વદસ્વ દયાસિન્ધો સર્વસંશયનાશનમ્ ॥ ૩॥

સૂત ઉવાચ ।
ચાણ્ડાલં ગૃહ્ય ગાણેશા યયુઃ સ્વનગરં પ્રતિ ।
તત્ દૃષ્ટ્વાઽઽશ્ચર્યસંયુક્તો યમો વેધસમાગમત્ ॥ ૪॥

પ્રણમ્ય સ વિધાતારં જગદે વાક્યમુત્તમમ્ ।
વિનયેન સમાયુક્તસ્તેન સમ્માનિતો યમઃ ॥ ૫॥

ધર્મ ઉવાચ ।
મૌદ્ગલસ્ય ચ માહાત્મ્યમદ્ભુતં દૃશ્યતે મયા ।
ન દૃષ્ટં ન શ્રુતં નાથ કુત્રચિત્ સર્વસિદ્ધિદમ્ ॥ ૬॥

ચાણ્ડાલઃ પાપકર્મા કઃ શ્રુત્વૈકં શ્લોકજં પદમ્ ।
બ્રહ્મભૂતો બભૂવાઽપિ કિમિદં કૌતુકં વિધે ॥ ૭॥

એવં સર્વજના બ્રહ્મન્નજ્ઞાનેન સમન્વિતાઃ ।
જ્ઞાનયુક્તા ગમિષ્યન્તિ સ્વાનન્દં વિવિધાત્મકાઃ ॥ ૮॥

વિશ્વં ચરાચરં શ્રુત્વા ક્ષીણં સદ્યો ભવિષ્યતિ ।
(Page ખં. ૯ અ. ૨૪ પાન ૭૦)
અતો યત્નપરો ભૂત્વા વિશ્વં રક્ષ સુખપ્રદમ્ ॥ ૯॥

માહાત્મ્યં કીદૃશં ચાસ્ય મૌદ્ગલસ્ય ત્વયા કૃતમ્ ।
ન જ્ઞાયતે મયા સ્વામિન્ વદાઽપારં કિમાત્મકમ્ ॥ ૧૦॥

ધર્મસ્ય વચનં શ્રુત્વા તં જગાદ પિતામહઃ ।
નિઃશ્વસ્ય શૃણુ વિપ્રેશ વચનં દેવપાલકમ્ ॥ ૧૧॥

બ્રહ્મોવાચ ।
ગણેશેન સ્વભક્ત્યર્થં રચિતં મૌદ્ગલં પરમ્ ।
ભક્ત્યા સમ્પ્રાર્થિતેનેદં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૨॥

તસ્ય માહાત્મ્યમુખ્યં વૈ કો જાનાતિ રવેઃ સુત ।
કિં કરોમિ ન જાનામિ મૌદ્ગલસ્ય પ્રખણ્ડનમ્ ॥ ૧૩॥

એવમુક્ત્વા સ્વયં બ્રહ્મા દેવાન્ સસ્માર મુખ્યકાન્ ।
વિપ્રેન્દ્રાંસ્તે સમાયાતાઃ પપ્રચ્છુઃ કારણં પરમ્ ॥ ૧૪॥

તેષામગ્રે યથાવૃત્તં કથયામાસ વિસ્તરાત્ ।
ધર્મેણ સંયુતો બ્રહ્મા વૃત્તાન્તં મૌદ્ગલે ભવમ્ ॥ ૧૫॥

શ્રુત્વા તે ખેદસંયુક્તા બભૂવુર્મુનિસત્તમ ।
તત્ર વિષ્ણુશ્ચ તાન્ પ્રાહ વિચાર્ય હિતકારકમ્ ॥ ૧૬॥

વિષ્ણુરુવાચ ।

તુલાં કુરુ વિધાતસ્ત્વં મૌદ્ગલેન સમં ભવેત્ ।
સાધનેષુ યથા સર્વં હિતમાત્રં ભવિષ્યતિ ॥ ૧૭॥

તચ્છ્રુત્વા વિવિધાન્યેવ સાધનાનિ પ્રગૃહ્ય સઃ ।
એકત્ર સ્થાપયામાસૈકત્ર મૌદ્ગલકં પરમ્ ॥ ૧૮॥

તાનિ સર્વાણિ તેનૈવ ન સમાનિ બભૂવિરે ।
મૌદ્ગલેન મહાભાગ એકભાવપ્રધારણાત્ ॥ ૧૯॥

તતઃ ખેદયુતાઃ સર્વે વિચારં ચક્રુરાદરાત્ ।
મૌદ્ગલેન જિતં સર્વં કરિષ્યામઃ કિમઞ્જસા ॥ ૨૦॥

અસ્ય સેવનમાત્રેણ જન્તવો વિવિધાત્મકાઃ ।
ભુક્ત્વા ભોગાન્ ગમિષ્યન્તિ યથા બ્રહ્મણિ યોગિનઃ ॥ ૨૧॥

સ્વલ્પકાલેન વિશ્વં વૈ નષ્ટં સર્વં ભવિષ્યતિ ।
વિહારેણ વિહીનાશ્ચ ભવામ હ વયં તતઃ ॥ ૨૨॥

કો વિઘ્નો મૌદ્ગલસ્યૈવ કર્તવ્યો યેન માનવાઃ ।
ત્યક્ત્વા પુરાણં દેવાદ્યાઃ ભવિષ્યન્ત્યન્યચેતસઃ ॥ ૨૩॥

તતઃ શમ્ભુઃ સ્વયં પ્રાહ ભાવિ યત્તદ્ભવિષ્યતિ ।
મા કુરુધ્વં મહાવિઘ્નં મૌદ્ગલસ્ય વિચક્ષણાઃ ॥ ૨૪॥

અસ્મૈ વિઘ્નપ્રદાને તુ ક્રોધયુક્તો ગજાનનઃ ।
સન્ધક્ષ્યતિ જગત્ સર્વં સેશ્વરં નાત્ર સંશયઃ ॥ ૨૫॥

શિવસ્ય વચનં શ્રુત્વા ભયયુક્તાઃ સુરર્ષયઃ ।
બભૂવુસ્તત્ર જીવસ્તાનુવાચ ગણપં સ્મરન્ ॥ ૨૬॥

બૃહસ્પતિરુવાચ ।
ગણેશેન મહેશાદ્યા ઇદં રચિતમુત્તમમ્ ।
વિશ્વં નાનાસ્વભાવસ્થં મૌદ્ગલં તુ ન સંશયઃ ॥ ૨૭॥

મૌદ્ગલે ગણનાથસ્ય વચનં વર્તતે પરમ્ ।
મહાલયાન્તમેવેદં વિશ્વં ભાતિ નિરન્તરમ્ ॥ ૨૮॥

અન્યચ્ચ મૌદ્ગલસ્યૈવ કદા વિઘ્નં ભવિષ્યતિ ।
તદેવ ન ભવેન્મિથ્યા વચનં મુનિસત્તમાઃ ॥ ૨૯॥

અતો ગણેશ્વરં પ્રાર્થ્ય વિઘ્નં કુરુત દેવપાઃ ।

મૌદ્ગલસ્ય ગણેશાનઃ ક્ષુબ્ધો નાત્ર ભવિષ્યતિ ॥ ૩૦॥

બૃહસ્પતેર્વચઃ શ્રુત્વા દેવા હર્ષસમન્વિતાઃ ।
મુનયસ્તં મહાભાગં સાધુ સાધ્વબ્રુવન્ વચઃ ॥ ૩૧॥

તતસ્તં વિઘ્નરાજં તે તુષ્ટુવુઃ કરસમ્પુટાઃ ।
નાનાસ્તોત્રૈર્ગણાધ્યક્ષં પ્રસન્નં ચક્રુરાદરાત્ ॥ ૩૨॥

જગાદ તાન્ સ્વયં દેવઃ ખવાણીમયરૂપધૃક્ ।
સૃષ્ટ્વા વિકલ્પં દેવેશા ભવિષ્યથ સુખે રતાઃ ॥ ૩૩॥

તતો બ્રહ્મા ગણેશાનં સ્મૃત્વાઽસૃજત તત્ક્ષણાત્ ।
(Page ખં. ૯ અ. ૨૫ પાન ૭૧)
વિકલ્પં સંશયાકારં મહાતેજોયુતં ખલમ્ ॥ ૩૪॥

તં દૃષ્ટ્વા દેવમુખ્યા યે દેવા વિપ્રાદયોઽપરે ।
સદ્યસ્તે સંશયેનૈવ યુક્તા વિપ્ર બભૂવિરે ॥ ૩૫॥

કિં મૌદ્ગલેન વિઘ્નેશઃ પ્રસન્નો વા ભવિષ્યતિ ।
ગણેશો બ્રહ્મણાં નાથઃ કથં દેહધરોઽભવત્ ॥ ૩૬॥

રુચ્યર્થં કથિતં સર્વં વેદાદિષુ ન સંશયઃ ।
બ્રહ્મ બ્રહ્મણિ સંસ્થં તત્ સર્વમાન્યં વિશેષતઃ ॥ ૩૭॥

એવમુક્ત્વા યયુઃ સર્વે સ્વે સ્વે સ્થાને મહામુને ।
મોહિતા માયયા તસ્ય વિકલ્પસ્ય મહાદ્ભુતમ્ ॥ ૩૮॥

કિમર્થમાગતાઃ સર્વે કિં કૃતં સસ્મરુર્ન તે ।
વિકલ્પેન સમાયુક્તા બભૂવુર્ભ્રાન્તચેતસઃ ॥ ૩૯॥

તતસ્તે મૌદ્ગલં ત્યક્ત્વા સ્થિતાઃ સર્વે વિશેષતઃ ।
નાનાભાવપરા વિપ્ર ચક્રુઃ સ્વસ્વક્રિયાં પુનઃ ॥ ૪૦॥

વિકલ્પસ્તાન્ વિલોક્યૈવ હર્ષયુક્તો બભૂવ હ ।
પ્રસસાર ત્રિલોકેષુ નાનાસંશયકારકઃ ॥ ૪૧॥

તેન સર્વે જનાસ્ત્યક્ત્વા મૌદ્ગલં વિપ્ર સંસ્થિતાઃ ।
એવં ક્રમેણ નષ્ટં તત્ પુરાણં પ્રબભૂવ હ ॥ ૪૨॥

અન્યાનિ તુ પુરાણાનિ વેદાઃ સર્વાણિ મુખ્યકાઃ ।
નષ્ટાનિ નષ્ટવત્ કુત્ર સ્થિતાનિ સ્વલ્પભાવતઃ ॥ ૪૩॥

તતઃ કર્મવિહીનં તુ બભૂવ સચરાચરમ્ ।
દેવા દુઃખયુતાઃ સર્વે વિકલ્પં યોદ્ધુમાયયુઃ ॥ ૪૪॥

વિકલ્પેન જિતાઃ સર્વે નષ્ટવીર્યા બભૂવિરે ।
તતો ગજાનનં દેવં તુષ્ટુવુસ્તદ્વધાય તે ॥ ૪૫॥

પુનરાકાશવાણીસ્થો જગાદૈતાન્ ગજાનનઃ ।
મુદ્ગલાજ્ઞાવશા ભૂત્વા ક્રિયાં કુરુત મા ચિરમ્ ॥ ૪૬॥

વિકલ્પો વશગસ્તેન ભવિષ્યતિ ન સંશયઃ ।
એવમુક્ત્વા ગણાધીશો વિરરામ ચ શૌનક ॥ ૪૭॥

તતસ્તે હર્ષસંયુક્તાઃ શિવવિષ્ણુમુખાઽમરાઃ ।
કશ્યપાદ્યા યયુસ્તં તુ મુદ્ગલં યોગિનાં વરમ્ ॥ ૪૮॥

પ્રણમ્ય ભાવસંયુક્તાઃ પપ્રચ્છુઃ કરસમ્પુટાઃ ।
વિકલ્પજયદં પૂર્ણમુપાયં સ્વહિતપ્રદમ્ ॥ ૪૯॥

તેષાં વચનમાકર્ણ્ય પ્રહસ્યાઽઽપૂજ્ય તાન્ સ્વયમ્ ।
જગાદ વચનં યોગી મુદ્ગલો માયયા યુતાન્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુગલસંવાદે વિકલ્પવિજયો નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૯.૨૪

## ૯.૨૫ વિકલ્પપ્રતાપખણ્ડનં નામ પઞ્ચવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
આદૌ ગણેશ્વરં સ્મૃત્વા પરં સૃષ્ટ્વા વિકલ્પકમ્ ।
તેજસ્વિનં મહાભાગાઃ કથં નેચ્છથ તં પુનઃ ॥ ૧॥

શરણં માં પ્રપન્નાનાં કરિષ્યામિ પ્રિયં હિ વઃ ।
સ્થીયતાં સન્નિધાનેઽત્ર વિકલ્પઃ કિં કરિષ્યતિ ॥ ૨॥

મહર્ષયઃ કશ્યપાદ્યા મુદ્ગલેન શિવાદયઃ ।
આશ્વાસિતાઃ સ્થિતાસ્તત્ર સુખયુક્તા બભૂવિરે ॥ ૩॥

મુદ્ગલસ્યાશ્રમે તસ્ય પ્રવેશો નૈવ વિદ્યતે ।

વિકલ્પસ્ય મહાભાગ તેન નિઃસંશયા બભુઃ ॥ ૪॥

વિકલ્પેન ચ વૃત્તાન્તો જ્ઞાતો દેવર્ષિસમ્ભવઃ ।
ક્રોધયુક્તઃ સ્વયં હન્તુમાયયૌ મુદ્ગલાશ્રમમ્ ॥ ૫॥

(Page ખં. ૯ અ. ૨૫ પાન ૭૨)
આગતં તં સમાલોક્ય વિકલ્પં ભયદાયકમ્ ।
દેવેન્દ્રા મુદ્ગલં તત્ર જગુર્ભયસમન્વિતાઃ ॥ ૬॥

દેવેન્દ્રા ઊચુઃ ।
વિકલ્પઃ ક્રોધસંયુક્ત આગતઃ સ મહામતે ।
તવાશ્રમેઽધુના વિપ્ર યત્કરિષ્યસિ તત્ કુરુ ॥ ૭॥

તેષાં વચનમાકર્ણ્ય મુદ્ગલસ્તાનથાબ્રવીત્ ।
ચિન્તાં મા કુરુત પ્રાજ્ઞા હનિષ્યામિ વિકલ્પકમ્ ॥ ૮॥

એવમુક્ત્વા સ્વયં યોગી મુદ્ગલસ્તમથાઽઽયયૌ ।
વિકલ્પં તેજસા યુક્તં સર્વસંશયકારકમ્ ॥ ૯॥

ઉવાચ તં મહાયોગી મુદ્ગલઃ પરમાર્થવિત્ ।
દયાયુક્તઃ સ્વભાવેન પ્રેરિતો ગણપેન સઃ ॥ ૧૦॥

મુદ્ગલ ઉવાચ ।
કિમર્થમાગતોઽસિ ત્વં વિકલ્પં બ્રૂહિ સામ્પ્રતમ્ ।
તત્ર ગચ્છ રુચિર્યત્ર નોચેદ્ભસ્મ ભવિષ્યસિ ॥ ૧૧॥

મુદ્ગલસ્ય વચઃ શ્રુત્વા વિકલ્પઃ ક્રોધસંયુતઃ ।
જગાદ સ મહાવિપ્રં પ્રદહન્નિવ તેજસા ॥ ૧૨॥

વિકલ્પ ઉવાચ ।
માં દૃષ્ટ્વા વિષ્ણુશમ્ભ્વાદ્યા વસિષ્ઠાદ્યા મહર્ષયઃ ।
સંશયેન સમાયુક્તા બભૂવુસ્તત્ક્ષણાન્ મુને ॥ ૧૩॥

ત્વાં ન જાનામિ યોગીન્દ્રં સ્થિતઃ કુત્રાસિ વાડવ ।
વિજેતારં વદસિ માં સર્વેષાં મૂર્ખવદ્વચઃ ॥ ૧૪॥

મયા ચરાચરં સર્વં મદધીનં કૃતં કિલ ।
અધુના ત્વાં હનિષ્યામિ પરં મદ્દ્વેષકારકમ્ ॥ ૧૫॥

ત્વયા દેવેન્દ્રમુખ્યાશ્ચ દેવા મુનિસમન્વિતાઃ ।

વિકલ્પેન વિહીના વૈ કૃતાઃ કસ્માદ્વદસ્વ મામ્ ॥ ૧૬॥

ગર્વં હન્તું સમાયાતં ત્વદીયં મુદ્ગલાશ્રમમ્ ।
જાનીહિ ત્યજ સર્વાંસ્ત્વં નોચેદ્ભસ્મ ભવિષ્યસિ ॥ ૧૭॥

વિકલ્પસ્ય વચઃ શ્રુત્વા ક્રોધયુક્તો મહામુનિઃ ।
સસ્માર ગણપં ચિત્તે વિકલ્પસ્ય વધાય સઃ ॥ ૧૮॥

તસ્ય સ્મરણમાત્રેણ ચિત્તાન્ મુદ્ગલયોગિનઃ ।
અગ્નિઃ પ્રલયકૃત્તત્ર નિઃસૃતઃ સર્વદાહકઃ ॥ ૧૯॥

અગ્નિર્યયૌ મહાક્રૂરં વિકલ્પં ક્રોધસંયુતઃ ।
ખલં દર્શનમાત્રેણ દાહયુક્તં ચકાર સઃ ॥ ૨૦॥

તતઃ શાન્ત્યર્થમત્યન્તં યત્નં ચક્રે સ શૌનક ।
વિકલ્પશ્ચ તતોઽત્યન્તમગ્નિસ્તેજોયુતોઽભવત્ ॥ ૨૧॥

અતિદાહયુતઃ સોઽપિ વિકલ્પઃ ખેદસંયુતઃ ।
ગર્વં ત્યક્ત્વા મહાવિપ્રમનમન્ મુદ્ગલં પુરઃ ॥ ૨૨॥

જગાદ ભયભીતઃ સ રક્ષ માં મુનિસત્તમ ।
તેજસા તે પ્રદગ્ધં તુ શરણાગતવત્સલ ॥ ૨૩॥

શિવવિષ્ણુમુખાઃ સર્વે વિપ્રા વાસિષ્ઠમુખ્યકાઃ ।
જિતા મયા ન સન્દેહઃ સ્વલ્પાયાસેન યોગિપ ॥ ૨૪॥

ત્વં કિં સાક્ષાદ્ગણેશાન આગતોઽસિ ન સંશયઃ ।
ત્વાં જેતું ન સમર્થોઽહમતસ્તે શરણં ગતઃ ॥ ૨૫॥

રક્ષ રક્ષ દયાસિન્ધો દાહયુક્તં વિશેષતઃ ।
તેજસા તે પ્રણષ્ટં માં કૃતમાગઃ ક્ષમસ્વ મે ॥ ૨૬॥

વિકલ્પં વ્યાકુલં દૃષ્ટ્વા દયાયુક્તો બભૂવ હ ।
મુદ્ગલો ગણપાજ્જાતમગ્નિં શાન્તં ચકાર હ ॥ ૨૭॥

તતઃ સંજ્ઞાસમાયુક્તો વિકલ્પસ્તમુવાચ હ ।
સ્વસ્થચિત્તઃ પ્રણમ્યાદૌ મુદ્ગલં યોગિનાં વરમ્ ॥ ૨૮॥

વિકલ્પ ઉવાચ ।
જિતોઽહં ચ ત્વયા વિપ્ર રક્ષિતોઽગ્નેર્ભયાત્તથા ।
અધુના તે સમાધીનસ્તિષ્ઠામિ ત્વત્સમીપગઃ ॥ ૨૯॥

સ્થાનં દેહિ મહાભાગ તત્ર સ્થાસ્યામિ નિશ્ચલઃ ।
તવાજ્ઞાવશગો ભૂત્વા તવ દાસોઽહમઞ્જસા ॥ ૩૦॥

(Page ખં. ૯ અ. ૨૬ પાન ૭૩)
તસ્ય તદ્વચનં શ્રુત્વા ધ્યાનયુક્તો બભૂવ હ ।
જ્ઞાત્વા વિઘ્નેશ્વરસ્યૈવ કૃત્યં તં સ મુદાઽબ્રવીત્ ॥ ૩૧॥

મુદ્ગલ ઉવાચ ।
યોગાકારં ગણેશાનં ન જાનન્તિ નરાધમાઃ ।
દેહધારિસમં તં યે માનયન્તિ ગુણોદ્ભવમ્ ॥ ૩૨॥

તેષાં હૃદિ બહિઃ સ્થિત્વા તિષ્ઠ ત્વં સર્વદા મુદા ।
નાનાસંશયસંયુક્તાંસ્તાન્ કુર્વન્ સવિશેષતઃ ॥ ૩૩॥

મૌદ્ગલં સંશયેનૈવ યુક્તં કુરુ મદાજ્ઞયા ।
તેષાં હૃદિ સમાસ્થાય યોગિનાં ગણપદ્વિષામ્ ॥ ૩૪॥

ગણેશં યોગરૂપં યે માનયન્તિ વિકલ્પક ।
યોગિનોઽયોગિનો વાઽપિ તે ત્યાજ્યાઃ સર્વદા ત્વયા ॥ ૩૫॥

મૌદ્ગલે શ્રદ્ધયા યુક્તા ભવિષ્યન્તિ સદા મુદા ।
ગાણેશા યોગિનો નાન્યે જાનીહિ મમ વાક્યતઃ ॥ ૩૬॥

એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
વિકલ્પસ્તં તથેત્યુક્ત્વા પ્રણમ્ય સ્વસ્થલં યયૌ ॥ ૩૭॥

તતો હર્ષયુતા દેવા મુનયસ્તં પ્રણમ્ય ચ ।
મુદ્ગલં સ્વસ્થલં જગ્મુઃ કર્મયુક્તા જના બભુઃ ॥ ૩૮॥

તદહાન્ મૌદ્ગલં વિપ્ર સેવ્યતે નૈવ જન્તુભિઃ ।
દોષયુક્તૈર્વિશેષેણ વિકલ્પેન સમન્વિતૈઃ ॥ ૩૯॥

કલાવત્યન્તભાવેન મૌદ્ગલં નષ્ટકં ભવેત્ ।
દોષયુક્તા જનાસ્તત્ર ભવિષ્યન્તિ ગૃહે ગૃહે ॥ ૪૦॥

યોગિનો મૌદ્ગલં નિત્યં સેવન્તે ભાવસંયુતાઃ ।
ગણેશરૂપબોધે યે ચતુરાઃ સર્વપાવનાઃ ॥ ૪૧॥

નાન્યે પાખણ્ડિનો લુબ્ધા નાના છદ્મધરા ભુવિ ।

મોહયુક્તા વિશેષેણ ભવિષ્યન્તિ તુ મૌદ્ગલમ્ ॥ ૪૨॥

એવં દેવૈઃ કૃતો વિઘ્નો ગણેશાનેન પ્રેરિતૈઃ ।
મુનિભિર્મૌદ્ગલે તેનાઽભવન્ જન્મયુતા નરાઃ ॥ ૪૩॥

એતત્તે કથિતં સર્વં રહસ્યં પરમાદ્ભુતમ્ ।
શ‍ૃણુયાચ્છ્રાવયેદ્યસ્તુ વિકલ્પરહિતો ભવેત્ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
વિકલ્પપ્રતાપખણ્ડનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૯.૨૫

## ૯.૨૬ મૌદ્ગલપુરાણશ્રવણમાહાત્મ્યવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ભીમો નામાઽભવદ્વૈશ્યઃ સર્વધર્મવિવર્જિતઃ ।
અઙ્ગદેશે મહાપાપી દર્શનાત્ પુણ્યનાશકૃત્ ॥ ૧॥

સ કદાચિદ્વને સંસ્થો બભૂવે ચૌર્યકારણાત્ ।
તત્રાઽઽજગામ રાજર્ષિઃ સૈન્યયુક્તો વિદર્ભપઃ ॥ ૨॥

તં દૃષ્ટ્વા ત્યજ્ય શસ્ત્રાણિ ભીમઃ પાપપરાયણઃ ।
મહાવનાન્તરં ગત્વા તસ્થૌ પ્રાણપરીપ્સયા ॥ ૩॥

તત્ર મેધાતિથિર્માઘશુક્લપ્રતિપદિ દ્વિજઃ ।
પ્રારભ્ય મુનિસંયુક્તો મૌદ્ગલં કથિતું રતઃ ॥ ૪॥

તત્રાઽઽજગામ તાન્ દૃષ્ટ્વા વૈશ્યઃ પાપરતો મુને ।
ભયાત્ સમીપગસ્તેષાં સંસ્થિતઃ શસ્ત્રવર્જિતઃ ॥ ૫॥

રાજા સમાયયૌ તત્ર નનામ મુનિપુઙ્ગવમ્ ।
મેધાતિથિં તતઃ સર્વાન્ મુનીન્ ભાવસમન્વિતઃ ॥ ૬॥

પુનઃ પ્રણમ્ય સ્વસ્થાનં યયૌ ભાનુર્વિદર્ભપઃ ।
(Page ખં. ૯ અ. ૨૭ પાન ૭૪)
વૈશ્યો મુનિવને તત્ર સુષ્વાપ વિનયાન્વિતઃ ॥ ૭॥

પ્રાતઃ કાલે પુનઃ સ્નાત્વા કૃત્વા નિત્યક્રિયાં દ્વિજાઃ ।

મૌદ્ગલં શ્રોતુકામાસ્તે આયયુર્હષસંયુતાઃ ॥ ૮॥

તૈઃ સાકં ભીમવૈશ્યોઽપિ રાજભીત્યા સમાયયૌ ।
શુશ્રાવ મૌદ્ગલં તત્ર પુરાણં વિસ્મિતોઽભવત્ ॥ ૯॥

મૌદ્ગલસ્ય પુરાણસ્ય શ્રવણેન દુરાત્મનઃ ।
બુદ્ધિભેદો બભૂવાઽપિ સ તત્રૈવ સ્થિતોઽભવત્ ॥ ૧૦॥

વિચારમકરોચ્ચિત્તે ભીમઃ પાપપરાયણઃ ।
અહો વૈશ્યોઽહમાનન્દાત્ કિં કરોમિ દુરાત્મવાન્ ॥ ૧૧॥

પાપિનો નરકં યાન્તિ નરા નાસ્ત્યત્ર સંશયઃ ।
નરદેહં સમાસાદ્ય ધર્મં કુર્યાત્ સ માનવઃ ॥ ૧૨॥

એવં વિચાર્ય તત્રૈવ મૌદ્ગલશ્રવણે રતઃ ।
ત્યક્ત્વા સ્ત્રીપુત્રકાદ્યં સ ગણેશે લાલસોઽભવત્ ॥ ૧૩॥

ફાલ્ગુન્યાં પૂર્ણિમાયાં તત્ પુરાણં પૂર્ણમાભવત્ ।
મેધાતિથિઃ પ્રતિપદિ દ્વિજાન્ સમ્ભોજ્ય હર્ષિતઃ ॥ ૧૪॥

સ કૃત્વા પારણં સર્વાન્ વિસૃજ્ય ગણપે રતઃ ।
નિત્યં ગણેશ્વરં ભક્ત્યા પૂજ્ય ભક્તિપરોઽભવત્ ॥ ૧૫॥

ભીમઃ સ્વગૃહમાગત્ય ત્યક્ત્વા પાપાત્મકં પરમ્ ।
કર્મ સ્વધર્મસંયુક્તો બભૂવ ગણપે રતઃ ॥ ૧૬॥

મૌદ્ગલશ્રવણેનૈવ સર્વપાપવિવર્જિતઃ ।
બભૂવ ધર્મશીલશ્ચ ગાણપત્યો મહાયશાઃ ॥ ૧૭॥

શરીરાન્તે ગણેશાનમગમદ્વૈશ્યજઃ પરમ્ ।
બ્રહ્મભૂતો બભૂવાઽપિ દૃષ્ટ્વા વિઘ્નેશ્વરં મુને ॥ ૧૮॥

મૌદ્ગલં સતતં શ્રુત્વા ચૈવં નાનાજનાદયઃ ।
બભૂવુઃ પુણ્યશીલાશ્ચ કિલ બ્રહ્મણિ તન્મયાઃ ॥ ૧૯॥

તત્રાઽહં કતિ તે બ્રૂયાં શક્તો વક્તું ન કો ભવેત્ ।
નાનેન સદૃશં કિઞ્ચિજ્જાનીહિ ત્વં મહામુને ॥ ૨૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
માઘાદિસાર્ધમાસે મૌદ્ગલપુરાણશ્રવણમાહાત્મ્યવર્ણનં નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૯.૨૬

## ૯.૨૭ ભાદ્રપદાદિસાર્ધૈકમાસ શ્રવણમાહાત્મ્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
મહાયોગી ભાદ્રપદે પુલસ્ત્યો ગણપે રતઃ ।
પ્રતિપત્તો ગણેશં સમ્પૂજ્યારભત મૌદ્ગલમ્ ॥ ૧॥

તત્ર વિપ્રાદયો વિપ્ર શ્રવણાર્થં સમાયયુઃ ।
યથાવિધિ જનાઃ સર્વે શુશ્રુવુર્ભક્તિતત્પરાઃ ॥ ૨॥

અર્થેન સંયુતં નિત્યં મૌદ્ગલં મુનિસત્તમઃ ।
કથયામાસ હર્ષેણ ગણેશાર્થવિચક્ષણઃ ॥ ૩॥

તત્ર સર્પો બિલે સંસ્થઃ શુશ્રાવ ભયસંયુતઃ ।
કસ્મિંશ્ચિદ્દિવસે વિપ્ર ભાગ્યેન પ્રેરિતઃ પુરા ॥ ૪॥

મુનયઃ સુષ્વુપુઃ સર્વે રાત્રૌ સર્પો બહિઃ શનૈઃ ।
નિર્જગામ યયૌ માર્ગે સ્વેચ્છયા સુખસંયુતઃ ॥ ૫॥

(Page ખં. ૯ અ. ૨૭ પાન ૭૫)
વનસ્થો નકુલઃ કશ્ચિત્તં દદર્શ ભુજઙ્ગમમ્ ।
આયયૌ હન્તુમાવેશાત્તયોર્યુદ્ધં બભૂવ હ ॥ ૬॥

નકુલેન બલાઢ્યેન હતં સર્પં વનાન્તરે ।
તં ગૃહ્ય ગાણપાઃ સદ્યો બ્રહ્મભૂતં પ્રચક્રિરે ॥ ૭॥

તં જ્ઞાત્વા વિસ્મિતાઃ સર્વે દેવેન્દ્રાદ્યા મહામતે ।
પરસ્પરં સમૂચુસ્તે સાશ્રુનેત્રા મહર્ષયઃ ॥ ૮॥

અહો મૌદ્ગલમાહાત્મ્યં વક્તું સર્વૈર્ન શક્યતે ।
સર્પોઽજ્ઞાનાચ્ચ સ શ્રુત્વા કિઞ્ચિદ્બ્રહ્મમયોઽધુના ॥ ૯॥

સમ્પૂર્ણં મૌદ્ગલં યૈસ્તુ સંશ્રુતં તૈઃ પ્રલભ્યતે ।
ન જ્ઞાયતે વિશેષેણ કિં વિશિષ્ટમતઃ પરમ્ ॥ ૧૦॥

સમ્પૂર્ણં મૌદ્ગલં યૈશ્ચ સંશ્રુતં તે ગણેશ્વરાઃ ।
જ્ઞાતવ્યા લોકનાથા વૈ પાવનાર્થં ભવન્ત્યતઃ ॥ ૧૧॥

નરજન્મધરો યઃ સ્યાન્ મૌદ્ગલં ન શૃણોતિ ચેત્ ।

વઞ્ચિતો માયયા પૂર્ણો વૃથા ધિક્ તસ્ય જીવિતમ્ ॥ ૧૨॥

વિઘ્નરાજ નમસ્તુભ્યં દેહિ જન્મ ધરાતલે ।
નિત્યં મૌદ્ગલસંસક્તાન્ કુરુ નો માનવાન્ કિલ ॥ ૧૩॥

ધિક્ સ્વર્ગં દેવદેવેશાન્ યત્ર કર્મફલં ન ચ ।
ક્રિયતે દેવદેવેશૈઃ કર્મ તદ્વ્યર્થતાં યયૌ ॥ ૧૪॥

અહો કીટપતઙ્ગાદિ યોનૌ જન્મધરો ભવેત્ ।
ભારતે સાધુસઙ્ગેન બ્રહ્મીભૂતો ભવિષ્યતિ ॥ ૧૫॥

સર્પોઽયં નરવાક્-હીનો ન જાનાતિ કિમપ્યહો ।
મનુષ્યવાગ્ભવં ભાવં તથા શુશ્રાવ મૌદ્ગલમ્ ॥ ૧૬॥

તેનૈવ બ્રહ્મભૂતોઽયં તતઃ સ્વાનન્દકે પુરે ।
કિં પુનર્નરજાતિસ્થો પ્રાપ્નુયાન્ન ગજાનનમ્ ॥ ૧૭॥

એવમુક્ત્વાઽમરાદ્યાસ્તં સ્વં સ્વં સ્થાનકમાયયુઃ ।
અધુના પ્રકૃતં વચ્મિ સર્વસૌખ્યકરં પરમ્ ॥ ૧૮॥

આશ્વિન્યાં પૂર્ણિમાયાં ચ તત્ સમાપ્તં બભૂવ હ ।
મૌદ્ગલં હર્ષસંયુક્તાઃ શ્રોતારસ્તં પુપૂજિરે ॥ ૧૯॥

સર્વૈઃ સાકં મહાયોગી પારણં સ ચકાર હ ।
તતઃ સર્વાન્ પ્રતિપદિ વિસસર્જ મહાયશાઃ ॥ ૨૦॥

તદાજ્ઞયા યયુઃ સર્વે સ્વસ્વમાશ્રમકં મુને ।
ગણેશભજને સક્તા બભૂવુઃ સર્વભાવતઃ ॥ ૨૧॥

ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાયયુઃ ।
બભૂવુર્બ્રહ્મભૂતાસ્તે પરં દૃષ્ટ્વા ગણેશ્વરમ્ ॥ ૨૨॥

ઇતિ તે સર્વમાખ્યાતં યશઃ સાર્ધૈકમાસજમ્ ।
મૌદ્ગલશ્રવણાજ્જાતં ભાદ્રમાસાદિસમ્ભવમ્ ॥ ૨૩॥

એવં ત્વનન્તરૂપાશ્ચ જન્તવો બ્રહ્મ લેભિરે ।
ન વક્તું શક્યતે તત્ર મૌદ્ગલશ્રવણેન વૈ ॥ ૨૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે મુદ્ગલદક્ષસંવાદે
ભાદ્રપદાદિસાર્ધૈકમાસ શ્રવણમાહાત્મ્યવર્ણનં નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૯.૨૭

## ૯.૨૮ મહોદરચરિતમાહાત્મ્યવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
બ્રાહ્મણો વન્ધ્યભાવેન પીડિતઃ કર્મણા પુરા ।
ગાર્ગ્યવંશભવઃ કોઽપિ નામ્ના શમ્ભુરિતીરિતઃ ॥ ૧॥

નાનોપાયાઃ કૃતાસ્તેન વાન્ધ્યદોષપ્રહારિણઃ ।
તથાપિ તસ્ય પુત્રો વા પુત્રી દ્વિજ બભૂવ ન ॥ ૨॥

તતોઽતિદુઃખસંયુક્તો ગૌતમં સ જગામ હ ।
સસ્ત્રીકઃ પુત્રકામાર્થં તં નનામ મહામતિમ્ ॥ ૩॥

ગૌતમેન મુનીન્દ્રેણ સત્કૃતઃ શમ્ભુરાવસત્ ।
સેવાર્થં સ્વગુરોસ્તત્ર યત્નયુક્તો બભૂવ હ ॥ ૪॥

એકદા સુખમાસીનં ગૌતમં તં ચ ભક્તિતઃ ।
જગાદ પુત્રપ્રાપ્ત્યર્થં વચનં સ્વહિતાવહમ્ ॥ ૫॥

શમ્ભુરુવાચ ।
નાના યત્નાઃ કૃતાઃ સ્વામિન્ પુત્રપ્રાપ્ત્યર્થમાદરાત્ ।
લભ્યતે નૈવ સન્તાનો મયા કિં વદ કારણમ્ ॥ ૬॥

યેનોપાયેન મે પુત્રો ભવિષ્યતિ મહામતે ।
તમુપાયં વદ સ્વામિન્ કરિષ્યામિ ત્વદાજ્ઞયા ॥ ૭॥

ત્વં ગુરુર્મે પરા કાષ્ઠા પરં ત્વત્તો ન વિદ્યતે ।
તારયસ્વ મહાભાગ વાન્ધ્યદોષસમન્વિતમ્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા તં જગાદ મહામુનિઃ ।
ગૌતમઃ સર્વતત્ત્વજ્ઞઃ શમ્ભું દુઃખસમન્વિતમ્ ॥ ૯॥

ગૌતમ ઉવાચ ।
મા કુરુષ્વ વૃથા ચિન્તાં તવ પુત્રા દ્વિજોત્તમ ।
ભવિષ્યન્તિ ત્રયઃ પ્રાજ્ઞા વેદજ્ઞા ગણપપ્રિયાઃ ॥ ૧૦॥

શ઼ૃણુ ત્વં મૌદ્ગલં મત્તઃ સર્વસિદ્ધિપ્રદાયકમ્ ।
તેનાનન્તભવસ્થં તે પાપં નશ્યેચ્ચ તત્ક્ષણાત્ ॥ ૧૧॥

પુણ્યરાશિઃ સ્વયં સાક્ષાદ્ભવિષ્યસિ ચ તારકઃ ।
અન્યેષાં નાત્ર સન્દેહઃ સર્વસિદ્ધિયુતસ્તથા ॥ ૧૨॥

અન્તે ગણેશ્વરં પ્રાપ્ય બ્રહ્મીભૂતો ભવિષ્યસિ ।
તિષ્ઠાત્ર જ્યેષ્ઠમાસેઽહં કથયિષ્યામિ મૌદ્ગલમ્ ॥ ૧૩॥

એવં તસ્ય વચઃ શ્રુત્વા હર્ષયુક્તો બભૂવ હ ।
સુશીલયા સ્ત્રિયા સાર્દ્ધં તત્રૈવં સંસ્થિતોઽભવત્ ॥ ૧૪॥

તતઃ સ્વલ્પે ગતે કાલે જ્યેષ્ઠમાસઃ સમાયયૌ ।
અન્યે મુનિગણાસ્તત્ર શ્રવણાર્થં સમાયયુઃ ॥ ૧૫॥

તાન્ દૃષ્ટ્વા સ્ત્રીસમાયુક્તઃ શમ્ભુશ્ચાતીવ હર્ષિતઃ ।
વિધિયુક્તતયા સર્વે શ્રોતારસ્તત્પરા બભુઃ ॥ ૧૬॥

જ્યેષ્ઠે શુક્લે પ્રતિપદિ ગૌતમો યોગિનાં વરઃ ।
સમારભત્ સ હર્ષેણ મૌદ્ગલં સર્વસિદ્ધિદમ્ ॥ ૧૭॥

વ્યાખ્યાં ચકાર સર્વજ્ઞો મૌદ્ગલસ્ય યથાર્થતઃ ।
તચ્છ્રુત્વા વિસ્મિતાઃ સર્વે બભૂવુઃ શ્રવણે રતાઃ ॥ ૧૮॥

નિત્યં નિયમસંયુક્તાઃ શુશ્રુવુર્ભક્તિસંયુતાઃ ।
તત્ર કસ્મિન્ દિને વિપ્ર બભૂવ પરમાદ્ભુતમ્ ॥ ૧૯॥

ગર્દભસ્તત્ર દૈવેન હ્યાયયૌ ત્વતિદુઃખિતઃ ।
જ્વરેણ પીડિતોઽત્યન્તં દૂરે તસ્થૌ મહામુને ॥ ૨૦॥

શુશ્રાવ મૌદ્ગલસ્યૈવ શ્લોકં જ્ઞાનવિવર્જિતઃ ।
પીડાહીનો બભૂવાઽપિ તત્ર કિઞ્ચિત્ સ રાસભઃ ॥ ૨૧॥

હૃદા સમન્વિતો ભૂત્વા તસ્થૌ શ્રવણલાલસઃ ।
તતો ગૌતમવિપ્રેણ સમાપ્તં તત્કૃતં મુદા ॥ ૨૨॥

સર્વે સ્વસ્વક્રિયાં ચક્રુઃ પુનઃ પ્રાતઃ સમાયયુઃ ।
ગર્દભો દુઃખહીનઃ સ બભૂવે તત્ક્ષણાન્ મુને ॥ ૨૩॥

સ યયૌ સ્વેચ્છયા યુક્તઃ કાલવેગાન્ મમાર સઃ ।
તસ્મિન્ કાલે ચ તં નેતું ગાણેશાઃ પ્રયયુર્મુદા ॥ ૨૪॥

તં ગૃહ્ય બ્રહ્મભૂતં તે ચક્રુઃ શ્રવણપુણ્યતઃ ।
તં દૃષ્ટ્વા દેવવિપ્રાદ્યાઃ સ્વર્ગસ્થા વિસ્મયં યયુઃ ॥ ૨૫॥

(Page  ખં. ૯ અ. ૨૯ પાન ૭૭)
અથો શ ृણુ મહાભાગ ગૌતમો હર્ષનિર્ભરઃ ।
આષાઢ્યાં પૂર્ણિમાયાં સ સમાપ્તં તચ્ચકાર હ ॥ ૨૬॥

દ્વિજાદ્યૈઃ સ પ્રતિપદિ ચક્રે વૈ પારણં પુરા ।
સર્વે હર્ષયુતાસ્તં તે નત્વા સ્વસ્વાશ્રમં યયુઃ ॥ ૨૭॥

શમ્ભુઃ સુશીલયા સાર્ધં જગામ સ્વાશ્રયં તતઃ ।
ગણેશમભજન્નિત્યં જ્ઞાત્વા યોગવપુર્ધરમ્ ॥ ૨૮॥

તતઃ સ્વલ્પે ગતે કાલે સુશીલા ગર્ભસંયુતા ।
બભૂવ તાં પ્રદૃશ્યૈવાભવચ્છમ્ભુઃ સુવિસ્મિતઃ ॥ ૨૯॥

તતઃ શુભે મુહૂર્તે સા સુષુવે પુત્રમુત્તમમ્ ।
સર્વલક્ષણસંયુક્તં સુતા એવં ત્રયોઽભવન્ ॥ ૩૦॥

વેદજ્ઞાન્ સર્વમાન્યાંશ્ચ ગાણપત્યપરાયણાન્ ।
તાન્ દૃષ્ટ્વા વિસ્મિતઃ શમ્ભુર્ગુરું સસ્માર ગૌતમમ્ ॥ ૩૧॥

મૌદ્ગલે તત્પરઃ સોઽપિ બભૂવે નિત્યમાદરાત્ ।
અન્તે વિઘ્નેશ્વરં પ્રાપ તલ્લીનઃ પ્રબભૂવ હ ॥ ૩૨॥

નાના જના ગણેશાનં લેભિરે મૌદ્ગલસ્ય ચ ।
શ્રવણેન ચ પાઠેન મુને તેષુ કતિ બ્રુવે ॥ ૩૩॥

એતત્તે કથિતં વિપ્ર જ્યેષ્ઠાત્ સાર્દ્ધૈકમાસકે ।
મૌદ્ગલશ્રવણસ્યૈવ માહાત્મ્યં સ્વલ્પભાવતઃ ॥ ૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે મુદ્ગલદક્ષસંવાદે
મહોદરચરિતમાહાત્મ્યવર્ણનં નામાષ્ટાવિંશોઽધ્યાયઃ ॥ ૯.૨૮

## ૯.૨૯ વર્ષેણ મૌદ્ગલશ્રવણમાહાત્મ્યવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
રાજાઽઽસીત્ પુણ્ડ્રદેશસ્ય સુગ્રીવઃ સર્વશાસ્ત્રવિત્ ।

નાનાધર્મપરઃ સોઽપિ શાસ્ત્રાર્થજ્ઞો વિચક્ષણઃ ॥ ૧॥

તસ્ય દેશે હ્યનાવૃષ્ટિર્બભૂવે દુઃખવર્ધિની ।
ન વવર્ષ કદા મેઘસ્તતો રાજાઽતિદુઃખિતઃ ॥ ૨॥

ઇન્દ્રસ્ય વરુણસ્યૈવાનુષ્ઠાને તત્પરોઽભવત્ ।
બ્રાહ્મણૈર્નિત્યમત્યન્તં તોષયામાસ મેઘપમ્ ॥ ૩॥

તતો વૈ નવ વર્ષાપિ મેઘઃ પાપેન ચેરિતઃ ।
વીક્ષ્યાતિદુઃખસંયુક્તઃ સુગ્રીવોઽભૂત્તતો નૃપઃ ॥ ૪॥

રાજા રાજ્યં પરિત્યજ વિશ્વામિત્રં જગામ હ ।
પપ્રચ્છ તં પ્રણમ્યાઽસૌ મેઘવૃષ્ટિકરં પરમ્ ॥ ૫॥

તેન સઙ્કથિતં વિપ્ર મૌદ્ગલં શ ૃણુ ભૂમિપ ।
દેશે વૃષ્ટિશ્ચ સમ્પૂર્ણા ભવિષ્યતિ ન સંશયઃ ॥ ૬॥

તતો રાજા દ્વિજૈસ્તત્ર લેખયિત્વા ચ મૌદ્ગલમ્ ।
યયૌ સ્વનગરં હૃષ્ટસ્તચ્છુશ્રાવ મહામતિઃ ॥ ૭॥

જનૈઃ સાર્ધં સમીપસ્થૈસ્તતો વૃષ્ટિર્બભૂવ હ ।
પ્રારબ્ધે મૌદ્ગલે તત્ર તત્ દૃષ્ટ્વા વિસ્મિતો નૃપઃ ॥ ૮॥

સર્વે હર્ષયુતા લોકા જાતા પુણ્ડ્રનિવાસિનઃ ।
રાજા ગણેશ્વરં નિત્યમભજદ્ભક્તિસંયુતઃ ॥ ૯॥

(Page ખં. ૯ અ. ૨૯ પાન ૭૮)
ભાદ્રે શુદ્ધપ્રતિપદિ સમારભ્ય સ મૌદ્ગલમ્ ।
શુશ્રાવ નિત્યમાનન્દાત્ પુરાણં સર્વસિદ્ધિદમ્ ॥ ૧૦॥

પુનર્ભાદ્રપદં પ્રાપ્ય પરાં શુક્લચતુર્થિકામ્ ।
સમાપ્તં તત્ સ પઞ્ચમ્યાં ચક્રે વૈ હર્ષસંયુતઃ ॥ ૧૧॥

અતિસંહર્ષિતો રાજા શ્રાવણં પ્રાપ્ય સૌખ્યદમ્ ।
શુક્લપ્રતિપદિ પ્રાજ્ઞૈઃ પ્રારભન્મૌદ્ગલં પુનઃ ॥ ૧૨॥

નિત્યં શુશ્રાવ સુગ્રીવો ગાણપત્યપરાયણઃ ।
આષાઢ્યાં સ સમાપ્તં તદમાયાં પ્રચકાર હ ॥ ૧૩॥

પુનઃ પ્રારભ્ય સુગ્રીવો જનૈઃ શ્રેષ્ઠૈઃ સમન્વિતઃ ।
શુશ્રાવ વર્ષમધ્યે સ એવં વાર્ષિકમાચરત્ ॥ ૧૪॥

પ્રતિવર્ષં મહાભક્ત્યા શુશ્રુવુઃ સર્વનાગરાઃ ।
ભક્તિયુક્તા ગણેશાનમભજન્ દુઃખવર્જિતાઃ ॥ ૧૫॥

ન તત્ર વાન્ધ્યદોષેણ યુક્તઃ કશ્ચિદ્બભૂવ હ ।
ન રોગશોકસંયુક્તઃ સુગ્રીવે રાજ્યકર્તરિ ॥ ૧૬॥

સર્વસમ્પત્સમાયુક્તા જનાસ્તત્ર બભૂવિરે ।
રોગદોષાદિભિર્ભાવૈર્હીનાશ્ચ ભયવર્જિતાઃ ॥ ૧૭॥

તતઃ સર્વૈઃ સ રાજર્ષિર્જગામ નગરસ્થિતૈઃ ।
ગણેશં બ્રહ્મભૂતસ્તૈર્બભૂવે પરમદ્યુતિઃ ॥ ૧૮॥

ગચ્છતો નિજલોકં વૈ તસ્યાઙ્ગાદ્વાયુનાઽપરે ।
સ્પૃષ્ટા રૌરવસંસ્થાસ્તે પીડાહીના બભૂવિરે ॥ ૧૯॥

તાન્ ગૃહ્ય ગાણપા વિપ્ર બ્રહ્મીભૂતાન્ પ્રચક્રિરે ।
યમાદ્યા વિસ્મિતાઃ સર્વે પ્રશશંસુશ્ચ મૌદ્ગલમ્ ॥ ૨૦॥

વિપ્રવાર્ષિકમેવં તે કથિતં શ્રવણસ્ય યત્ ।
મૌદ્ગલસ્ય હિ માહાત્મ્યં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૧॥

સુગ્રીવદેશગઃ કશ્ચિચ્છ્રુત્વા વૃત્તાન્તમદ્ભુતમ્ ।
કુષ્ઠયુક્તો યયૌ તત્ર પુરાણશ્રવણાર્થતઃ ॥ ૨૨॥

વાર્ષિકં રાજશાર્દૂલો સમારભત ભક્તિતઃ ।
સોઽપિ નિત્યં પ્રશુશ્રાવ કુષ્ઠનાશાર્થમુત્તમમ્ ॥ ૨૩॥

શ્રુત્વા કુષ્ઠવિહીનઃ સ બભૂવે હર્ષસંયુતઃ ।
જગામ સ્વગૃહં પદ્ભ્યાં ગૃહકાર્યરતોઽભવત્ ॥ ૨૪॥

ભુક્ત્વા ભોગાન્ મનોજ્ઞાન્ સોંઽતે જગામ ગજાનનમ્ ।
બ્રહ્મીભૂતો બભૂવાઽપિ શ્રવણસ્ય ફલેન વૈ ॥ ૨૫॥

એવં સકૃત્ સમાશ્રુત્ય મૌદ્ગલં વિવિધા જનાઃ ।
ઇહ ભુક્ત્વાઽખિલાન્ ભોગાનન્તે સ્વાનન્દમાયયુઃ ॥ ૨૬॥

તત્રૈવ કતિ તે બ્રૂયાં નાલં વર્ષશતૈરપિ ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં વર્ષશ્રવણજં ફલમ્ ॥ ૨૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
વર્ષેણ મૌદ્ગલશ્રવણમાહાત્મ્યવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૯.૨૯
(Page ખં. ૯ અ. ૩૦ પાન ૭૯)

## ૯.૩૦ મૌદ્ગલનિત્યશ્રવણમાહાત્મ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
રાજાઽભૂચ્ચાક્ષુષે કશ્ચિન્ સુમેધો નામ ધારકઃ ।
નાનાધર્મપરો યજ્વા દાતા માની મહાબલઃ ॥ ૧॥

સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞો દ્વિજદેવાતિથિપ્રિયઃ ।
સપ્તદ્વીપાધિપો ભૂત્વા સ ચક્રે રાજ્યમુત્તમમ્ ॥ ૨॥

એવં રાજ્યપરો રાજા સર્વેષાં હિતકારકઃ ।
વાન્ધ્યદોષસમાયુક્તો બભૂવાતીવ દુઃખિતઃ ॥ ૩॥

નાનોપાયાંશ્ચકારાઽસૌ પુત્રપ્રાપ્ત્યર્થમાદરાત્ ।
નાલભત્ પુત્રમાનન્દદાયકં દુઃખિતોઽભવત્ ॥ ૪॥

પત્ન્યા વિચાર્ય રાજાઽસૌ ત્યક્ત્વા રાજ્યં તયા સહ ।
પ્રધાનેષુ વનં ઘોરં યયૌ શોકસમન્વિતઃ ॥ ૫॥

બભ્રામ ભ્રાન્તચિત્તોઽસૌ સુમેધા યત્ર તત્ર ચ ।
તતો મહાવનં રાજા દદર્શ ભયદાયકમ્ ॥ ૬॥

મરણે નિશ્ચયં કૃત્વા પ્રવિવેશ મહાવનમ્ ।
તત્ર વ્યાલા મૃગા વ્યાઘ્રાઃ પપલુસ્તં નિરીક્ષ્ય તે ॥ ૭॥

તતો રાજા પ્રિયાયુક્તો બભ્રામ ભ્રાન્તવદ્યથા ।
તત્ર ક્રતું દદર્શાપિ મહાયોગીન્દ્રમુત્તમમ્ ॥ ૮॥

કૃતાઞ્જલિઃ સ્ત્રિયા વિપ્રં પ્રણનામ પુરઃ સ્થિતઃ ।
તુષ્ટાવ તં વિધેઃ પુત્રં તેજોયુક્તં પ્રજાપતિમ્ ॥ ૯॥

સન્તુષ્ટસ્તં મહીપાલં સમાશ્વાસ્ય જગાદ હ ।
દુઃખં કિં તે મહીપાલ કિમર્થં વદ ચાગતઃ ॥ ૧૦॥

રાજા તસ્મૈ સ્વવૃત્તાન્તં કથયામાસ વિસ્તરાત્ ।

તચ્છ્રુત્વા ધ્યાનસંયુક્તો બભૂવ મુનિસત્તમઃ ॥ ૧૧॥

જગાદ નૃપતિં વિપ્ર ક્રતુસ્તં હર્ષયન્નિવ ।
મૌદ્ગલં શ‍ૃણુ રાજંસ્ત્વં પુત્રયુક્તો ભવિષ્યસિ ॥ ૧૨॥

મુદિતો રાજશાર્દૂલસ્તં પ્રણમ્ય તદાજ્ઞયા ।
યયૌ સ્વનગરં ચિત્રં પુરોહિતમુવાચ હ ॥ ૧૩॥

શ્રુત્વા વૃત્તં ગુરુસ્તસ્ય શાણ્ડિલ્યઃ સર્વશાસ્ત્રવિત્ ।
જગાદ તં મહીપાલં હર્ષનિર્ભરમાનસઃ ॥ ૧૪॥

શાણ્ડિલ્ય ઉવાચ ।
મૌદ્ગલં ચાનયિષ્યામિ સર્વસિદ્ધિપ્રદાયકમ્ ।
શ્રાવયિષ્યામિ તે રાજન્ મા ચિન્તાં કુરુ નિશ્ચિતમ્ ॥ ૧૫॥

એવમુક્ત્વા યયૌ સોઽપિ ક્રતું યોગીન્દ્રવન્દિતમ્ ।
તં પ્રણમ્ય યથાન્યાયં મૌદ્ગલં શ્રુતવાન્ પરમ્ ॥ ૧૬॥

લેખયિત્વા સ્વયં વિપ્રઃ શાણ્ડિલ્યઃ સર્વતત્ત્વવિત્ ।
યયૌ સુમેધસં ભૂપં જગાદ વચનં હિતમ્ ॥ ૧૭॥

શાણ્ડિલ્ય ઉવાચ ।
મૌદ્ગલેન સમં રાજન્ન કિઞ્ચિદ્વર્તતે પરમ્ ।
શાસ્ત્રં યોગીન્દ્રવન્દ્યં તત્ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૮॥

ક્રતોઃ પ્રસાદમાહાત્મ્યાન્ મયા જ્ઞાતમિદં પરમ્ ।
શ‍ૃણુ નિત્યં મહારાજ મૌદ્ગલં સર્વમુદ્ગલમ્ ॥ ૧૯॥

એવમુક્ત્વા સ્વયં વિપ્રઃ સમારભત હર્ષિતઃ ।
મૌદ્ગલં તં પ્રણમ્યાઽઽદૌ જગાદ નૃપસત્તમઃ ॥ ૨૦॥

સુમેધા ઉવાચ ।
મુહૂર્તં પશ્ય વિપ્રેશ શુભદં તત્પુનઃ પ્રભો ।
મૌદ્ગલં કથયસ્વ ત્વં સર્વસિદ્ધિકરં પરમ્ ॥ ૨૧॥

શાણ્ડિલ્ય ઉવાચ ।
ક્ષણભઙ્ગુરદેહોઽયં ન વિશ્વાસ્યો મહીપતે ।
વિઘ્નરાજં સ્મર ત્વં વૈ તેન કાલઃ શુભો ભવેત્ ॥ ૨૨॥

ગાણેશં નૃપશાર્દૂલ યત્કિઞ્ચિત્ સર્વસિદ્ધિદમ્ ।

તત્ર દ્વિવિધભાવેન સ નરોત્તમ આચરેત્ ॥ ૨૩॥

મુહૂર્તં શુભમાલોક્યાથવા તં ગણપં સ્મરન્ ।
સમારભેન્ન સન્દેહો માન્યત્વં તુ વિચારય ॥ ૨૪॥

એવમુક્તો નૃપસ્તેન તથેત્યુક્ત્વા સ્ત્રિયા સહ ।
શુશ્રાવ મૌદ્ગલં નિત્યં શાણ્ડિલ્યાદ્ધર્મસંયુતઃ ॥ ૨૫॥

તતઃ સ્વલ્પે ગતે કાલે ગર્ભયુક્તાં નિરીક્ષ્ય તામ્ ।
પત્નીં મહીપતિઃ સર્વૈર્હર્ષયુક્તો બભૂવ હ ॥ ૨૬॥

પુત્રં સા સુષુવે સાધ્વી સર્વલક્ષણસંયુતમ્ ।
રાજા નિત્યં સુહર્ષેણ શુશ્રુવે મૌદ્ગલં પરમ્ ॥ ૨૭॥

તદેકનિષ્ઠભાવસ્થો બભૂવે નિત્યમાદરાત્ ।
અન્તે નગરસંયુક્તો જગામ ગણપં પરમ્ ॥ ૨૮॥

તત્ર દૃષ્ટ્વા ગણેશાનં બ્રહ્મીભૂતો બભૂવ હ ।
જનૈઃ સાર્દ્ધં સુમેધાસ્તુ પુરાણશ્રવણેન વૈ ॥ ૨૯॥

શાણ્ડિલ્યોઽપિ વનં ગત્વા નિત્યં વિઘ્નેશમાભજત્ ।
ગણેશાગ્રે પુરાણં સ કથયામાસ મૌદ્ગલમ્ ॥ ૩૦॥

નિત્યં ભાવસમાયુક્તો મૌદ્ગલે તત્પરોઽભવત્ ।
શાન્તિયોગયુતો ભૂત્વાઽસેવત્તં ગણનાયકમ્ ॥ ૩૧॥

સર્વત્ર સર્વમાન્યઃ સ બભૂવ બ્રાહ્મણાગ્રણીઃ ।
અન્તે ગણેશ્વરં પ્રાપ યોગિવન્દ્યો મહાયશાઃ ॥ ૩૨॥

તસ્યાશ્રમો ગણેશસ્ય ક્ષેત્રમાભૂચ્ચ સિદ્ધિદમ્ ।
દર્શનાદ્યૈર્મહાવિપ્ર સર્વસૌખ્યકરં પરમ્ ॥ ૩૩॥

એવં નિત્યજપે સક્તા મૌદ્ગલસ્ય મહામુને ।
ઇહ ભુક્ત્વા પ્રભોગાંસ્તે બ્રહ્મભૂતા બભૂવિરે ॥ ૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
મૌદ્ગલનિત્યશ્રવણમાહાત્મ્યવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૦

## ૯.૩૧ વક્રતુણ્ડચરિતશ્રવણમાહાત્મ્યવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
નાનાતપઃપરઃ કુત્સઃ સાક્ષાદ્ દ્વિજવરોઽભવત્ ।
તપસા શુદ્ધભાવઃ સ બ્રહ્મશ્રદ્ધાપરાયણઃ ॥ ૧॥

શમી દમપરો ભૂત્વા જડોન્મત્તાદિકં પરમ્ ।
ચચાર સ તતઃ શાક્તેઽભવત્ બ્રહ્મણિ તન્મયઃ ॥ ૨॥

નામરૂપાત્મકાનાં તદ્બ્રહ્માસત્સંજ્ઞકં મતમ્ ।
તજ્જ્ઞાત્વા શાન્તિહીનશ્ચ બભૂવે ખેદસંયુતઃ ॥ ૩॥

તત્રાગતં સ યોગીન્દ્રં યાજ્ઞવલ્ક્યં પ્રતાપિનમ્ ।
નનામ તં મહાભાગં કુત્સો ધર્મવિદુત્તમઃ ॥ ૪॥

સમ્પૂજ્ય હર્ષસંયુક્તઃ પ્રપચ્છ વિનયાન્વિતઃ ।
વદ યોગં મહાયોગિન્ શાન્તિદં યોગિનાં મતમ્ ॥ ૫॥

યાજ્ઞવલ્ક્ય ઉવાચ ।
પઞ્ચચિત્તમયી બુદ્ધિઃ સંયોગાયોગરૂપિણી ।
તસ્યાં ભ્રાન્તિપ્રદા સિદ્ધિર્નાનાસિદ્ધિપ્રદર્શિની ॥ ૬॥

તત્ર બિમ્બં ગણેશસ્ય પતિતં મોહધારકમ્ ।
બિમ્બભાવં પરિત્યજ્ય બ્રહ્મીભૂતો ભવિષ્યસિ ॥ ૭॥

તદર્થં વક્રતુણ્ડસ્યાઽઽરાધનં કુરુ સર્વદા ।
તેન શાન્તિસમાયુક્તો ભવિષ્યસિ ન સંશયઃ ॥ ૮॥

બિમ્બં માયાયુતં પ્રોક્તં મોહિતં સિદ્ધિબુદ્ધિગમ્ ।
(Page ખં. ૯ અ. ૩૨ પાન ૮૧)
તદ્ભાવં હન્તિ તુણ્ડેન તેનાયં વક્રતુણ્ડકઃ ॥ ૯॥

માયાસુખં નરાકારં તસ્માદ્વક્રં પરં મુખમ્ ।
તયોર્બ્રહ્મસમાયોગે વક્રતુણ્ડોઽયમુચ્યતે ॥ ૧૦॥

કણ્ઠાધો માયયા યુક્તો મસ્તકં તદ્વિવર્જિતમ્ ।
વક્રાખ્યં તસ્ય વિપ્રેશ તેનાઽયં વક્રતુણ્ડકઃ ॥ ૧૧॥

અનેનાર્થેન સંયુક્તં વક્રતુણ્ડં ભજસ્વ ચ ।

તેન શાન્તિસમાયુક્તો ગાણપત્યો ભવિષ્યસિ ॥ ૧૨॥

એવમુક્ત્વા યયૌ યોગી યાજ્ઞવલ્ક્યો મહાયશાઃ ।
કુત્સો હર્ષસમાયુક્તો વક્રતુણ્ડપરોઽભવત્ ॥ ૧૩॥

તતઃ સ્વલ્પેન કાલેન શાન્તિં લેભે મહામુનિઃ ।
ગાણપત્યસ્વભાવેનાભજત્તં વક્રતુણ્ડકમ્ ॥ ૧૪॥

કુત્સો નિત્યં મહાયોગી વક્રતુણ્ડચરિત્રકમ્ ।
ખણ્ડં પપાઠ ભક્ત્યા સ મૌદ્ગલસ્ય સુહર્ષિતઃ ॥ ૧૫॥

તસ્ય ગેહે કદાચિત્તુ અગમત્ શૂલસંયુતઃ ।
ભગન્દરયુતઃ પાપી દ્વિજ આઙ્ગિરસોદ્ભવઃ ॥ ૧૬॥

દુઃખયુક્તો નનામાઽસૌ કુત્સં યોગવિદાં વરમ્ ।
સ્નાત્વા સુષ્વાપ વિપ્રેશ તત્સાન્નિધ્યેઽતિદુઃખિતઃ ॥ ૧૭॥

કુત્સો ગણેશં સમ્પૂજ્યાઽપઠત્તં વક્રતુણ્ડગમ્ ।
ચરિતં સોઽપિ શુશ્રાવાનાયાસેન ગૃહે સ્થિતઃ ॥ ૧૮॥

સમ્પૂર્ણે સંશ્રુતે તત્ર રોગહીનો બભૂવ હ ।
પ્રણમ્યાઙ્ગિરસસ્તં ચ યયૌ સ્થાનં સ્વકીયકમ્ ॥ ૧૯॥

ભુક્ત્વા સ વિવિધાન્ ભોગાન્ જગામાન્તે ગણેશ્વરમ્ ।
ચિત્રમાઙ્ગિરસોદ્ભૂતં પશ્ય શૌનક તે નમઃ ॥ ૨૦॥

એવં નાના જનાઃ સિદ્ધિં યયુઃ શ્રવણમાત્રતઃ ।
વક્રતુણ્ડચરિત્રસ્ય મૌદ્ગલસ્થસ્ય માનદ ॥ ૨૧॥

તત્રૈવં કતિ તે બ્રૂયાં મયા વક્તું ન શક્યતે ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં માહાત્મ્યં શ્રવણે ભવમ્ ॥ ૨૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
વક્રતુણ્ડચરિતશ્રવણમાહાત્મ્યવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૯.૩૧

## ૯.૩૨ એકદન્તચરિતમાહાત્મ્યવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।

પિપ્પલાદઃ પુરા કશ્ચિદ્બભૂવ બ્રાહ્મણોત્તમઃ ।
સ શૈવમાર્ગસંયુક્તોઽભજત્તં શઙ્કરં સદા ॥ ૧॥

ગૌતમીતીરસંસ્થઃ સ ક્રમતો યોગસંસ્થિતઃ ।
બભૂવ સહજે સંસ્થઃ સ્વાધીનત્વપરાયણઃ ॥ ૨॥

તતો વેદાર્થજં યોગં જ્ઞાત્વા શાન્તિધરં પરમ્ ।
સહજં મોહહીનં તત્ દૃષ્ટ્વા દુઃખયુતોઽભવત્ ॥ ૩॥

જગામ ગૌતમં વિપ્રો ભક્તિસંયુત આનમત્ ।
પપ્રચ્છ યોગશાન્ત્યર્થમુપાયં બ્રહ્મદં પરમ્ ॥ ૪॥

જગાદ ગૌતમો વિપ્રં સ પૃષ્ટશ્ચૈકદન્તકમ્ ।
બ્રહ્મ તસ્યૈવ ભક્ત્યા ત્વં શાન્તિયોગમવાપ્સ્યસિ ॥ ૫॥

યદ્યન્માયાવિકારૈશ્ચ સંયુક્તં મુનિસત્તમ ।
માયયા સહ તદ્વિદ્ધિ એકશબ્દપ્રવાચકમ્ ॥ ૬॥

માયાહીનં સ્થિતં યત્તન્માયિકં વા દ્વિજોત્તમમ્ ।
દન્તસંજ્ઞં વિજાનીહિ પશ્ય વેદે વિચક્ષણ ॥ ૭॥

તયોર્યોગે ગણેશાન એકદન્ત ઇતિ શ્રુતઃ ।
તં ભજસ્વ વિધાનેન શાન્તિયુક્તો ભવિષ્યસિ ॥ ૮॥

એવમુક્ત્વા મહાયોગી ગૌતમો વિરરામ હ ।
પિપ્પલાદશ્ચ સન્નમ્ય યયૌ સ્વસ્યાશ્રમં પરમ્ ॥ ૯॥

તત્રસ્થશ્ચૈકદન્તં સોઽભજદ્ભક્તિસમન્વિતઃ ।
ગણેશકૃપયા વિપ્રો યોગશાન્તિયુતોઽભવત્ ॥ ૧૦॥

તતો નિત્યં મહાવિપ્ર એકદન્તચરિત્રકમ્ ।
અપઠમૌદ્ગલે સંસ્થં ગાણપત્યસ્વભાવતઃ ॥ ૧૧॥

કસ્મિંશ્ચિત્ સમયે યોગી પૂજયિત્વૈકદન્તકમ્ ।
અપઠચ્ચરિતં તસ્ય તત્સાન્નિધ્યે સુભક્તિતઃ ॥ ૧૨॥

તત્ર પલ્લી સ્થિતા કાચિત્ સા શુશ્રાવ ચરિત્રકમ્ ।
જ્વરયુક્તા મહાભાગ જ્વરહીના બભૂવ હ ॥ ૧૩॥

દેહાન્ત ગણનાથં તુ જગામ ચરિતશ્રવાત્ ।
તં દૃષ્ટ્વા બ્રહ્મભૂતા સા બભૂવે ચિત્રમદ્ભુતમ્ ॥ ૧૪॥

એવમેકરદસ્યૈવ ચરિતસ્ય ચ સેવને ।
શ્રવણેન નરા નાર્યો બ્રહ્મીભૂતા બભૂવિરે ॥ ૧૫॥

તેષાં ન શક્યતે વક્તું ચરિતં કેનચિન્ મુને ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૧૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
એકદન્તચરિતમાહાત્મ્યવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૯.૩૨

## ૯.૩૩ મહોદરચરિતમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
માધ્યન્દિનો મહાભાગો મુનિઃ સર્વાર્થકોવિદઃ ।
સ્વધર્મનિરતો નિત્યં નાનાબલતપોન્વિતઃ ॥ ૧॥

સ શાન્ત્યર્થં જગામૈવ વ્યાસં સર્વજ્ઞમુત્તમમ્ ।
તં પ્રણમ્ય મહાભાગં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૨॥

માધ્યન્દિન ઉવાચ ।
શાન્ત્યર્થં કિં નરૈઃ કાર્યં તન્મે વદ મહામતે ।
યેન યોગયુતાઃ સર્વે બ્રહ્મીભૂતા બભૂવિરે ॥ ૩॥

વ્યાસ ઉવાચ ।
સંયોગાઽયોગયોર્યોગે બ્રહ્મભૂતો નરો ભવેત્ ।
તેન શાન્તિયુતો ભાવી સા શાન્તિઃ સર્વસમ્મતા ॥ ૪॥

સ એવ ગણનાથસ્તુ મહોદર ઇતિ સ્મૃતઃ ।
તં ભજસ્વ વિધાનેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૫॥

સંયોગાઽયોગરૂપઃ સન્ તયોરુદરગાન્ પરાન્ ।
ભુનક્તિ સકલાન્ ભોગાન્ સ્મૃતસ્તેન મહોદરઃ ॥ ૬॥

બ્રહ્મસુ બ્રહ્મસૌખ્યં યદ્ભોગરૂપં પ્રકીર્તિતમ્ ।
ભુક્તો ભોગઃ સ્થિતો યત્ર તદેવ જઠરં સ્મૃતમ્ ॥ ૭॥

જગતાં બ્રહ્મણાં વિપ્ર જઠરે સંસ્થિતઃ સદા ।
(Page ખં. ૯ અ. ૩૪ પાન ૮૩)
ગણેશો ભોગભોક્તા વૈ કોઽપિ તસ્યોદરે ન તુ ॥ ૮॥

પ્રોક્તો મહોદરસ્તેન વેદેષુ ગણનાયકઃ ।
એકસ્તં ભજ ભક્ત્યા વૈ તયા શાન્તિમવાપ્સ્યસિ ॥ ૯॥

એવમુક્ત્વા મહાયોગી વ્યાસો યોગીન્દ્રસત્તમઃ ।
વિરરામ સ તં નત્વા આશ્રમં સ્વં જગામ ચ ॥ ૧૦॥

મહોદરચરિત્રં સ મૌદ્ગલસ્થં વિશેષતઃ ।
સેવ્યયોગપરો ભૂત્વાઽભજત્તં તુ મહોદરમ્ ॥ ૧૧॥

તસ્મૈ તુષ્ટો ગણાધીશો દદૌ યોગં સુશાન્તિગમ્ ।
તતઃ શાન્તિયુતો નિત્યમભજદ્ગણનાયકમ્ ॥ ૧૨॥

મહોદરચરિત્રં યદપઠન્નિત્યમાદરાત્ ।
મહાયોગી સ્વયં તત્ર સ્થાપયામાસ વિઘ્નપમ્ ॥ ૧૩॥

કદાચિદ્ગણરાજં સ પૂજયિત્વા પપાઠ તત્ ।
મહોદરસ્ય માહાત્મ્યં તત્ર ચિત્રં બભૂવ હ ॥ ૧૪॥

મણ્ડૂકો દૈવયોગેન શુશ્રાવાજ્ઞાનસંયુતઃ ।
નિર્માલ્યે સંસ્થિતસ્તત્ર ભયભીતઃ સમન્તતઃ ॥ ૧૫॥

તતો બહૌ ગતે કાલે મૃતં તં કુત્રચિત્ સ્થલે ।
મણ્ડૂકં ચ સમાનેતુમગમન્ ગાણપા મુદા ॥ ૧૬॥

સઙ્ગૃહ્ય બ્રહ્મભૂતં તે ચક્રુરેકશ્રવાત્ પરમ્ ।
પાઠસ્ય પશ્ય વિપ્રેશ માહાત્મ્યં પરમાદ્ભુતમ્ ॥ ૧૭॥

એવં નાના જના વિપ્ર મહોદરચરિત્રકમ્ ।
સંસેવ્ય ભુક્તભોગાસ્તેઽભવન્ બ્રહ્મમયાઽમૃતાઃ ॥ ૧૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
મહોદરચરિતમાહાત્મ્યવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૩

## ૯.૩૪ ગજાનનચરિતશ્રવણપઠનમાહાત્મ્યવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
આશ્વલાયનવંશસ્થો બ્રાહ્મણઃ સુરુચિઃ પુરા ।
નામ્ના સ્વધર્મનિષ્ઠઃ સ બ્રહ્મજ્ઞાનપરોઽભવત્ ॥ ૧॥

નાનાયોગક્રમે સક્તઃ શમી દમપરાયણઃ ।
ચચાર યોગચર્યાં તામન્તે સહજગોઽભવત્ ॥ ૨॥

તત્ર સ્વાધીનતાં દૃષ્ટ્વા વિસ્મિતઃ પ્રયયૌ સ્વયમ્ ।
સ્વગુરું તં પ્રણમ્યાઽઽદૌ યોગં પપ્રચ્છ ઉત્તમમ્ ॥ ૩॥

સુરુચિરુવાચ ।
વદ યોગં મહાયોગિન્ શાન્તિદં સર્વભાવતઃ ।
અસ્માકં ત્વં પરા કાષ્ઠા ગુરુર્વંશધરઃ પ્રભુઃ ॥ ૪॥

આશ્વલાયન ઉવાચ ।
પૈલેન કથિતો યોગો મહ્યં શાન્તિપ્રદઃ પરઃ ।
તં તેઽહં કથયિષ્યામિ બ્રહ્મીભૂતપ્રદાયકમ્ ॥ ૫॥

ચિત્તં પઞ્ચવિધં ત્યક્ત્વાઽહં બ્રહ્મેતિ પ્રબોધતઃ ।
સરસં તેન શાન્તિસ્થો ભવિષ્યસિ ન સંશયઃ ॥ ૬॥

સરસં ચિત્તકં યસ્માત્ સમ્ભૂતં યન્મયં મતમ્ ।
અન્તે યત્ર ગતં તત્ત્વં ગજં જાનીહિ માનદ ॥ ૭॥

તદેવાનનકં યસ્ય તં ભજસ્વ વિધાનતઃ ।
ગજાનનં સુશાન્તિસ્થો ભવિષ્યસ્યધુના મુને ॥ ૮॥

એવમુક્ત્વા મહાવિપ્ર આશ્વલાયન આદરાત્ ।
તૂષ્ણીં સ્થિતઃ સ તં નત્વા યયૌ સ્વસ્યાશ્રમં પુનઃ ॥ ૯॥

ગજાનનપરો ભૂત્વાઽભજત્તં નિત્યમાદરાત્ ।
ગજાનનચરિત્રં સોઽપઠન્ મૌદ્ગલસંસ્થિતમ્ ॥ ૧૦॥

તેન તુષ્ટો ગણાધીશો દદૌ યોગં પ્રશાન્તિદમ્ ।
ભક્તાય વૈ સુરુચયે ભક્તવાઞ્છાપ્રપૂરકઃ ॥ ૧૧॥

તતસ્તેન રહસ્યં યચ્ચતુર્વેદસમુદ્ભવમ્ ।

જ્ઞાતં ગજાનનાખ્યે તત્ સંસ્થિતં બ્રહ્મણોદિતમ્ ॥ ૧૨॥

ગચ્છન્તિ યત્ર સર્વાણિ વિશ્વાનિ બ્રહ્મકાણિ તુ ।
યોગરૂપેણ યસ્તેષુ સ ગચ્છતિગ ઉચ્યતે ॥ ૧૩॥

સર્વગં બ્રહ્મ સત્પ્રોક્તમૃગ્વેદે સારગં પરમ્ ।
તદેવ ગશ્ચ વિજ્ઞેયો મુને નામ્નિ ગજાનને ॥ ૧૪॥

જાયન્તે વિવિધાન્યેવ વિશ્વાનિ બ્રહ્મકાણિ ચ ।
તસ્માદદઃ સ જઃ ખ્યાતોઽદ્વિતીયાત્મક એકકઃ ॥ ૧૫॥

આદિમધ્યાન્તભાવેષુ યાદૃશં તાદૃશં ભવેત્ ।
યજુષિ બ્રહ્મ સમ્પ્રોક્તં સ્મૃતોઽજઃ સ ગજાનને ॥ ૧૬॥

પઞ્ચચિત્તમયં સર્વં નાશવન્નાત્ર સંશયઃ ।
નષ્ટં નકારગં વિદ્ધ્યાઽઽસમન્તાદા ચ તત્ર વૈ ॥ ૧૭॥

નષ્ટભાવેષુ યસ્તિષ્ઠેદાસમન્તાત્તદેવ તત્ ।
બ્રહ્મ સામ્ના સમાખ્યાતં સ્થિત આનો ગજાનને ॥ ૧૮॥

પઞ્ચચિત્તમયં સર્વં નષ્ટં જ્ઞાતવ્યમઞ્જસા ।
તદેવ યોગભાવેન બ્રહ્મરૂપં પ્રકીર્તિતમ્ ॥ ૧૯॥

અથર્વણસમાખ્યાતમહમાત્મા ન સંશયઃ ।
અજ્ઞાનેન વિનાશાખ્યો ન સ્મૃતઃ સ ગજાનને ॥ ૨૦॥

એતદ્ બ્રહ્મમુખેભ્યશ્ચ ચતુર્ભ્યઃ સારમીરિતમ્ ।
ગજાનનો મહાવિપ્ર ચતુર્વેદાત્મકઃ સ્મૃતઃ ॥ ૨૧॥

એવં ગજાનનં જ્ઞાત્વાઽભજત્તં સુરુચિઃ સદા ।
અપઠત્તસ્ય માહાત્મ્યં તત્ર ચિત્રં બભૂવ હ ॥ ૨૨॥

કપોતો વૃક્ષસંસ્થઃ કઃ તત્ શુશ્રાવ ચરિત્રકમ્ ।
સ રોગસંયુતઃ પાપી રોગહીનો બભૂવ હ ॥ ૨૩॥

અન્તે ગજાનનં ગત્વા બ્રહ્મીભૂતોઽભવન્ મુદા ।
અજ્ઞાનશ્રવણેનૈવાઽતઃ ફલં કિં વદામિ તે ॥ ૨૪॥

એવં નાના જના ખણ્ડં યદ્ગજાનનનામકમ્ ।
શ્રુત્વા પઠિત્વા ભુક્ત્વાન્તે ભોગાન્ બ્રહ્મ પ્રલેભિરે ॥ ૨૫॥

॥ ॐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુગલસંવાદે
ગજાનનચરિતશ્રવણપઠનમાહાત્મ્યવર્ણનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૯.૩૪
(Page ખં. ૯ અ. ૩૬ પાન ૮૫)

## ૯.૩૫ લમ્બોદરચરિતવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
ભાર્ગવઃ કપિલો નામ સર્વશાસ્ત્રવિશારદઃ ।
કપિલસ્ય વરેણૈવ સમુત્પન્નઃ સુધર્મવિત્ ॥ ૧॥

નાનાતપઃસમાયુક્તો યોગનિષ્ઠો બભૂવ હ ।
તદર્થં શુનકં સોઽપિ જગામ વિનયાન્વિતઃ ॥ ૨॥

તં પ્રણમ્ય માહાત્માનં સ્થિત આર્જવસંયુતઃ ।
કદાચિત્તે મહાભાગં પપ્રચ્છ પિતરં મુદા ॥ ૩॥

કપિલ ઉવાચ ।
યોગશાન્તિપ્રદં નાથ વદ બ્રહ્મણિ તન્મયમ્ ।
ત્વં નો ગુરુઃ સમાખ્યાતસ્તારયસ્વ ભવાર્ણવાત્ ॥ ૪॥

શુનક ઉવાચ ।
વિશ્વાનિ વિદ્ધિ તં યોગં બ્રહ્માણિ નિઃસૃતાનિ ચ ।
યદાધારેણ વર્તન્તે તે ગચ્છન્તિ યદાત્મનિ ॥ ૫॥

તદેવ યોગદં બ્રહ્મ લમ્બોદરપ્રવાચકમ્ ।
તસ્યોદરે સ્થિતં બ્રહ્મ વિશ્વં ચ ભજ તં સદા ॥ ૬॥

તેન શાન્તિસમાયુક્તો બ્રહ્મીભૂતો ભવિષ્યસિ ।
નાન્યથા ત્વં મહાભાગ સિદ્ધિબુદ્ધિવિમોહિતઃ ॥ ૭॥

એવમુક્ત્વા મહાયોગી શુનકો વિરરામ હ ।
તં પ્રણમ્ય યયૌ સોઽપિ સ્વાશ્રમં હર્ષસંયુતઃ ॥ ૮॥

લમ્બોદરચરિત્રં સ મૌદ્ગલસ્થં જજાપ હ ।
ગણેશં પૂજયામાસ નિત્યં ભક્તિપરાયણઃ ॥ ૯॥

તેન તુષ્ટો ગણાધીશો દદૌ યોગં સુશાન્તિદમ્ ।
કપિલાય સ્વભક્તાય ભક્તવાત્સલ્યકારણાત્ ॥ ૧૦॥

શાન્તિયુક્તઃ સ્વયં યોગી તજ્જજાપ ચરિત્રકમ્ ।
નિત્યં પૂજાપરો ભૂત્વા લમ્બોદરસમીપગઃ ॥ ૧૧॥

તત્ર ચિત્રં કદાચિદ્વૈ બભૂવ શ‍ૃણુ શૌનક ।
બલીવર્દઃ સ્થિતઃ કશ્ચિદ્રોગાક્રાન્તઃ પપાત હ ॥ ૧૨॥

શુશ્રાવ તચ્ચરિત્રં સ સમ્પૂર્ણં જ્ઞાનહીનતઃ ।
સદ્યો વૈ રોગનિર્મુક્તો બભૂવે હર્ષસંયુતઃ ॥ ૧૩॥

નાજાનંસ્તન્ મહત્ પુણ્યં બલીવર્દઃ કદાચન ।
કાલેન સ મૃતસ્તત્ર બ્રહ્મીભૂતો બભૂવ હ ॥ ૧૪॥

એવમજ્ઞાનતો વાઽપિ જ્ઞાનતો વિવિધા જનાઃ ।
બ્રહ્મીભૂતા બભૂવુશ્ચ મયા વક્તું ન શક્યતે ॥ ૧૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
લમ્બોદરચરિતવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૯.૩૫

## ૯.૩૬ વિકટખણ્ડમાહાત્મ્યવર્ણનં નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
અશ્વત્થામા મહાભાગો દ્રોણપુત્રઃ પ્રતાપવાન્ ।
કૃપેણ માતુલેનૈવ જગામ વનમુત્તમમ્ ॥ ૧॥

ભારતે સંસ્થિતં સારં જ્ઞાત્વા કૃષ્ણમુખાચ્ચ્યુતમ્ ।
બુદ્ધેઃ પરતરં બ્રહ્માઽભવત્તત્રૈવ લાલસઃ ॥ ૨॥

બુદ્ધેઃ પત્યુર્ગણેશસ્ય હૃદિ જ્ઞાનં કથં ભવેત્ ।
પરિપૂર્ણં તદર્થં સ ગૌતમં શરણં યયૌ ॥ ૩॥

કૃપસ્તં વિનયેનૈવ પ્રણમ્યાશ્રમસંસ્થિતઃ ।
સેવાર્થં ભાગિનેયેન સંયુક્તઃ પરમાર્થવિત્ ॥ ૪॥

કદાચિદ્યોગિનાં મધ્યે ગૌતમઃ સંસ્થિતોઽભવત્ ।

કથયામાસ યોગં સ શાન્તિદં યોગસેવયા ॥ ૫॥

તત્ર હર્ષેણ સંયુક્તોઽશ્વત્થામા વિનયાન્વિતઃ ।
પપ્રચ્છ કૃપસંયુક્તઃ સંશયસ્યાપનુત્તયે ॥ ૬॥

અશ્વત્થામોવાચ ।
યોગપ્રાપ્ત્યર્થમાનન્દાત્ કસ્યોપાસનમાચરેત્ ।
યોગરૂપસ્ય યોગીશ બદ સર્વજ્ઞ તે નમઃ ॥ ૭॥

ગૌતમ ઉવાચ ।
ગણેશોપાસનં મુખ્યં પૂર્ણં શાન્તિપ્રદાયકમ્ ।
યોગાકારઃ સ વૈ વેદે નરે ગજમયત્વતઃ ॥ ૮॥

પઞ્ચચિત્તાત્મમોહેન તેન સર્વં વિમોહિતમ્ ।
ન જાનાતિ પરં ભાવં યોગદં ગણનાયકમ્ ॥ ૯॥

સમોહં ચિત્તમુત્સૃજ્ય સ્વયં ચિન્તામણિર્ભવેત્ ।
તસ્માદ્વિકટભક્ત્યા સ લભ્યતે વિકટઃ પ્રભુઃ ॥ ૧૦॥

પઞ્ચચિત્તમયં યદ્યત્તસ્માદ્વિકટભાવતઃ ।
ભ્રમં ત્યક્ત્વા સ્વચિત્તસ્થં તં ભજસ્વ ગજાનનમ્ ॥ ૧૧॥

તચ્છ્રુત્વા વિસ્મિતાઃ સર્વે મુનયસ્તં પ્રણમ્ય ચ ।
સ્વસ્વાશ્રમં સમાગમ્ય વિકટે ભજને રતાઃ ॥ ૧૨॥

અશ્વત્થામા કૃપશ્ચૈવ તં પ્રણમ્ય મહામતિમ્ ।
સ્વસ્વાશ્રમં સમાગત્ય વિકટે ભજને રતૌ ॥ ૧૩॥

મૌદ્ગલસ્થં ચરિત્રં તૌ વિકટસ્ય મહાત્મનઃ ।
પ્રપેઠતુર્મહાભક્ત્યા પૂજ્ય નિત્યં ગણેશ્વરમ્ ॥ ૧૪॥

તતઃ સ્વલ્પેન કાલેન સન્તુષ્ટો વિકટોઽભવત્ ।
દદૌ યોગં સ તાભ્યાં વૈ પૂર્ણશાન્તિપ્રદાયકમ્ ॥ ૧૫॥

તથાપિ તૌ મહાભાગૌ પાઠં ચક્રતુરાદરાત્ ।
ખણ્ડસ્ય વિકટસ્યૈવ વિકટં પૂજ્ય નિત્યદા ॥ ૧૬॥

એકદા પાઠસંયુક્તાવભૂતાં ચ દ્વિજોત્તમૌ ।
તત્ર શ્વા ચ કૃપસ્યાગ્રે શુશ્રુવે સંસ્થિતો મહાન્ ॥ ૧૭॥

અશ્વત્થામ્નશ્ચ માર્જારઃ સમીપસ્થિત આશૃણોત્ ।

તૌ રોગાદ્યૈર્વિહીનૌ ચ જાતાવજ્ઞાનતઃ શ્રવાત્ ॥ ૧૮॥

અન્તે સ્વાનન્દગૌ જાતાવેકશ્રવણપુણ્યતઃ ।
અતઃ કં મહિમાનં તે કથયામિ હ્યપારકમ્ ॥ ૧૯॥

અશ્વત્થામા કૃપશ્ચૈવ સ્વસ્વાંશે સઙ્ગતૌ મુદા ।
અન્તે યોગયુતૌ વિપ્ર વિકટે ભજને રતૌ ॥ ૨૦॥

શૌનક ઉવાચ ।
યોગયુક્તૌ કથં સૂત સ્વાંશગૌ તૌ બભૂવતુઃ ।
ગણેશેન તદાકારૌ મહચ્ચિત્રં વદસ્વ મામ્ ॥ ૨૧॥

સૂત ઉવાચ ।
દેવાઃ કલાંશભાવેન ભૂભારહરણાય વૈ ।
ભવન્તિ માનવાદ્યાસ્તે નાનાસામર્થ્યસંયુતાઃ ॥ ૨૨॥

ઇહ પાપં યદા કૃત્વા ગચ્છન્તિ યમપં મૃતાઃ ।
પતન્તિ નરકેષ્વેવ યથા દશરથાદયઃ ॥ ૨૩॥

અથવા પુણ્યમુગ્રં તે કૃત્વાંऽતે સ્વર્ગગા મુદા ।
ભવન્તિ ભોગસંયુક્તા યથા રામો યમસ્થલે ॥ ૨૪॥

ભવન્તિ યોગયુક્તાસ્તે યદા સ્વસ્વાંશગાસ્તદા ।
તદાકારા ગણેશાનં કલ્પાન્તે સઙ્ગતા મુદા ॥ ૨૫॥

યથા વિદૂરકઃ સદ્યઃ કૌરવે યમદેહગઃ ।
યમાકારો ગણેશાનમભજદ્ભક્તિસંયુતઃ ॥ ૨૬॥

અન્તે યોગસમાયુક્તો યમઃ પરમપાવનઃ ।
યયૌ ગણેશ્વરં વિપ્ર બ્રહ્મભૂતઃ સ્વભાવતઃ ॥ ૨૭॥

એતત્તે કથિતં પૂર્ણં ચરિત્રં શ્રવણાત્મકમ્ ।
વિકટસ્યૈવ ખણ્ડસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૮॥

એવં નાનાજનાદ્યાશ્ચ શ્રુત્વા ખણ્ડં મહાદ્ભુતમ્ ।
વિકટસ્ય સુખં ભુક્ત્વા બ્રહ્મીભૂતા બભૂવિરે ॥ ૨૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે દક્ષમુદ્ગલસંવાદે યોગામૃતાર્થશાસ્ત્રે
વિકટખણ્ડમાહાત્મ્યવર્ણનં નામ ષટ્ત્રિંશોऽધ્યાયઃ ॥ ૯.૩૬

(Page  ખં. ૯ અ. ૩૭ પાન ૮૭)

## ૯.૩૭ વિઘ્નરાજખણ્ડશ્રવણપઠનમાહાત્મ્યવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
વિભીષણો મહાભાગો લઙ્કાં પ્રાપ્ય સુહૃદ્ધૃતઃ ।
રામં પૂજ્યં સ્વયં નિત્યં ભક્તિયુક્તોઽભજત્ પરમ્ ॥ ૧॥

તત્રાદૌ ગણનાથસ્ય પૂજનં વેદસમ્મતમ્ ।
વિચાર્ય વિસ્મિતઃ સોઽપિ દુઃખયુક્તો બભૂવ હ ॥ ૨॥

ધારયામાસ મનસિ ગણેશં બ્રહ્મનાયકમ્ ।
સર્વપૂજ્યં ગણેશસ્યોચ્છિષ્ટભુજોઽમરાન્ પરાન્ ॥ ૩॥

કદાચિત્તત્ર યોગીશો નારદઃ સ્વેચ્છયાઽઽગતઃ ।
તં પ્રણમ્ય પ્રપૂજ્યૈવ પરં પપ્રચ્છ હૃત્સ્થિતમ્ ॥ ૪॥

વિભીષણ ઉવાચ ।
ગણેશોચ્છિષ્ટભોક્તારો દેવા વિષ્ણુમુખા મુને ।
અગ્રપૂજ્યપ્રભાવત્વાત્ કિમિદં વેદસમ્મતમ્ ॥ ૫॥

નારદ ઉવાચ ।
બ્રહ્માકારાઃ શિવાદ્યાશ્ચ નાનાયોગપ્રધારકાઃ ।
બ્રહ્માણ્યન્નમુખાન્યેવ વેદેષુ કથિતં બુધૈઃ ॥ ૬॥

તેષાં સ્વામી ગણેશાનો બ્રહ્મણસ્પતિસંજ્ઞિતઃ ।
બ્રહ્મણાં પાતૃભાવાદ્વૈ પાલયિતૃપ્રભાવતઃ ॥ ૭॥

તેષાં યોગપ્રદાનાર્થં દેહધારી બભૂવ હ ।
ગજાનનાદિચિહ્નૈઃ સ સંયુક્તો બ્રહ્મરૂપકૈઃ ॥ ૮॥

વિઘ્ના સત્તાત્મકાઃ પ્રોક્તાસ્તેષાં સ્વામી ગજાનનઃ ।
વિઘ્નૈઃ સર્વાન્ પ્રમર્દ્યૈવ ખેલતે યોગરૂપધૃક્ ॥ ૯॥

બ્રહ્માણિ વિઘ્નયુક્તાનિ ભવન્તે રાક્ષસાધિપ ।
સત્યસઙ્કલ્પહીનાનિ તદા તમભજન્ પરમ્ ॥ ૧૦॥

પરાધીનસ્વભાવં ચ જાનન્તે તાનિ નિત્યદા ।

સ્વકીયં ચ તતઃ પ્રીતો ગણેશો જાયતે પરઃ ॥ ૧૧॥

દદાતિ યોગમુખ્યં સ્વં ગણેશસ્તેભ્ય આદરાત્ ।
તદા વિઘ્નવિહીનાનિ ભવન્તે વીર્યવન્તિ તુ ॥ ૧૨॥

અતો ગણેશ્વરઃ પૂર્ણઃ સર્વેષાં પૂર્ણતાં ગતઃ ।
પૂર્ણસર્વાદિતાં વેદે જ્યેષ્ઠરાજપ્રભાવતઃ ॥ ૧૩॥

એવં વિઘ્નેશ્વરં નિત્યં ભજ ત્વં શાન્તિદાયકમ્ ।
રામઃ સ એવ વિઘ્નેશઃ કલાંશેન ન સંશયઃ ॥ ૧૪॥

ગણેશભજને કસ્ય વ્યભિચારો ભવેન્ન વૈ ।
સમૂહાનાં પતિત્વાત્તુ સમૂહા વિષ્ણુમુખ્યકાઃ ॥ ૧૫॥

એવમુક્ત્વા મહાયોગી નારદો ગણપં સ્મરન્ ।
યયૌ સોઽપિ મહાબુદ્ધિર્વિચાર્ય ગણપે રતઃ ॥ ૧૬॥

પપાઠ વિઘ્નરાજસ્ય સ ખણ્ડં મૌદ્ગલસ્થિતમ્ ।
નિત્યં ભક્તિપ્રયુક્તઃ સમ્પૂજ્ય તં ગણનાયકમ્ ॥ ૧૭॥

તતઃ શાન્તિસમાયુક્તો બભૂવેહ વિભીષણઃ ।
ગણેશમભજન્નિત્યં પરં રામૈક્યમાર્ગતઃ ॥ ૧૮॥

એકદા રાક્ષસાધીશો હ્યગમત્ સેતુબન્ધનમ્ ।
મહોદરં પ્રપૂજ્યૈવ તત્રસ્થઃ પાઠમાકરોત્ ॥ ૧૯॥

તત્ર ભેકી જલે સંસ્થા શુશ્રુવે ખણ્ડમુત્તમમ્ ।
વિઘ્નરાજસ્ય તેનૈવ સુખયુક્તા બભૂવ હ ॥ ૨૦॥

એતસ્મિન્નન્તરે તત્ર સા સર્પેણ ધૃતાઽભવત્ ।
ગ્રસ્તા મમાર ગાણેશૈર્નીતા સ્વાનન્દકે પુરે ॥ ૨૧॥

ભેકીં ગૃહ્ય બ્રહ્મભૂતાં ચક્રુર્હર્ષસમન્વિતાઃ ।
એવમજ્ઞાનતઃ પુણ્યં વિઘ્નેશચરિતોદ્ભવમ્ ॥ ૨૨॥

નાના જનાદયો વિપ્ર શ્રુત્વા ખણ્ડં યયુર્મુદા ।
સ્વાનન્દં ભુક્તભોગાશ્ચ મયા વક્તું ન શક્યતે ॥ ૨૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
વિઘ્નરાજખણ્ડશ્રવણપઠનમાહાત્મ્યવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૯.૩૭

(Page  ખં. ૯ અ. ૩૮ પાન ૮૮)

## ૯.૩૮ ધૂમ્રવર્ણચરિતમાહાત્મ્યવર્ણનં નામ અષ્ટત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
વરતન્તુર્મુનિશ્રેષ્ઠો નાનાવિધતપઃ પરઃ ।
શાન્તિં ન તપસા લેભે તતઃ ખેદયુતોઽભવત્ ॥ ૧॥

નશ્વરં વિશ્વમેવં સ જ્ઞાત્વા બ્રહ્મપરોઽભવત્ ।
તત્રાઽઽજગામ પૌલસ્ત્યો વિશ્રવા મુનિસત્તમઃ ॥ ૨॥

તં દૃષ્ટ્વોત્થાય વિપ્રેશં પ્રણનામ પુપૂજ હ ।
પપ્રચ્છાઽઽભોજ્ય હર્ષેણ યુક્તઃ પરમપાવનમ્ ॥ ૩॥

વરતન્તુરુવાચ ।
ત્વં સાક્ષાદ્યોગિનાં વન્દ્યઃ પાવનો હિ સમાગતઃ ।
મહાપુણ્યેન તે પાદપદ્મં દૃષ્ટં મયા પ્રભો ॥ ૪॥

યોગશાન્તિપ્રદં બ્રૂહિ યેન શાન્તો ભવામ્યહમ્ ।
નશ્વરં સર્વમુત્સૃજ્ય તદર્થં લાલસોઽધુના ॥ ૫॥

વિશ્રવા ઉવાચ ।
બ્રહ્મજ્ઞાનં વિના તાત ન શાન્તિં લભતે નરઃ ।
બ્રહ્મ નાનાવિધં વેદેષુ પ્રોક્તં વેદવાદિભિઃ ॥ ૬॥

તેષાં પતિં ગણાધીશં બ્રહ્મણસ્પતિસંજ્ઞિતમ્ ।
તં ભજસ્વ વિધાનેન તદા શાન્તો ભવિષ્યસિ ॥ ૭॥

વિશ્વં વપુઃ શિરો બ્રહ્મ ગજં યોગે તયોર્મતઃ ।
સિદ્ધિબુદ્ધિપતિઃ સાક્ષાત્ પરઃ સ્વાનન્દવાસકૃત્ ॥ ૮॥

વર્ણા ધૂમ્રાયિતા યત્ર મનસા મુનિસત્તમ ।
તેન ધૂમ્રાક્ષરઃ પ્રોક્તો બ્રહ્મભૂયપ્રદાયકઃ ॥ ૯॥

ધૂમ્રવર્ણં ગણાધીશં ભજ યત્નેન માનદ ।
તસ્યૈવ ભજનં કૃત્વા શાન્તિં પ્રાપ્તોઽહમુત્તમામ્ ॥ ૧૦॥

નાન્યથા પૂર્ણશાન્તિં તુ લભતે કોઽપિ નિશ્ચિતમ્ ।

વેદાદિભિર્મુનીન્દ્રૈશ્ચ વેદાર્થૈઃ પશ્ય તં વિભુમ્ ॥ ૧૧॥

પુલસ્ત્યેનોપદિષ્ટોઽહં નાનાયોગપરાયણઃ ।
ત્યક્ત્વા બ્રહ્માણિ તન્નિષ્ઠઃ સદાઽભૂવં ન સંશયઃ ॥ ૧૨॥

એવમુક્ત્વા મહાયોગી વિશ્રવાઃ સ્વસ્થલં યયૌ ।
વરતન્તુર્વિચાર્યૈવં ગણેશભજને રતઃ ॥ ૧૩॥

ખણ્ડં મૌદ્ગલસંસ્થં સ ધૂમ્રવર્ણાત્મકં પરમ્ ।
જજાપ નિત્યમાનન્દાત્ પૂજ્ય વિઘ્નેશ્વરં પરમ્ ॥ ૧૪॥

પૂર્ણશાન્તિયુતો જાતો યોગીન્દ્રઃ સર્વપારગઃ ।
ગણેશકૃપયા નિત્યમભજદ્ગણનાયકમ્ ॥ ૧૫॥

એકદા તીર્થસંસ્થઃ સ ધૂમ્રવર્ણં પુપૂજ હ ।
તસ્યાગ્રે નિત્યકં પાઠં સ ચક્રે ધૌમ્રવર્ણકમ્ ॥ ૧૬॥

તત્ર કાકઃ સ્થિતઃ સોઽપિ વૃક્ષશાખાપરાયણઃ ।
શૂલયુક્તઃ સ શુશ્રાવ ધૂમ્રવર્ણચરિત્રકમ્ ॥ ૧૭॥

સદ્યશ્ચ શૂલહીનઃ સ બભૂવે હર્ષસંયુતઃ ।
ઉડ્ડીય પ્રયયૌ તસ્માદ્ વૃક્ષાત્ સ્વેચ્છાપરાયણઃ ॥ ૧૮॥

અન્તે ગણેશ્વરં ગત્વા બ્રહ્મભૂતો બભૂવ હ ।
અજ્ઞાનશ્રવણાત્ પુણ્યં પશ્ય કિં કથયામ્યહમ્ ॥ ૧૯॥

એવં નાના જનાઃ શ્રુત્વા ધૂમ્રવર્ણચરિત્રકમ્ ।
બ્રહ્મીભૂતા બભૂવુસ્તે ભુક્ત્વા ભોગાન્ વિશેષતઃ ॥ ૨૦॥

તેષુ કિં તે મહાવિપ્ર કથ્યતે તન્ન શક્યતે ।
અતઃ સઙ્ક્ષેપતઃ પ્રોક્તં શ્રવણસ્ય ચરિત્રકમ્ ॥ ૨૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે મુદ્ગલદક્ષસંવાદે
ધૂમ્રવર્ણચરિતમાહાત્મ્યવર્ણનં નામ અષ્ટત્રિંશોઽધ્યાયઃ ॥ ૯.૩૮
(Page ખં. ૯ અ. ૩૯ પાન ૮૯)

## ૯.૩૯ નવમખણ્ડમાહાત્મ્યવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
પ્રહ્લાદો નામ વિખ્યાતો યોગી યોગપરાયણઃ ।
મયૂરેશં સમાશ્રિત્યાઽભજત્તં ભક્તિસંયુતઃ ॥ ૧॥

સ્વપ્ને દદર્શ દેવેશં મયૂરોપરિ સંસ્થિતમ્ ।
સિદ્ધિબુદ્ધિસમાયુક્તં ગજાસ્યં ભક્તવત્સલમ્ ॥ ૨॥

તં પ્રણમ્ય નનર્તાઽસૌ સાશ્રુનેત્રો મહાયશાઃ ।
તં જગાદ મયૂરેશો વરયસ્વ વરાન્ પરાન્ ॥ ૩॥

સ તં પ્રણમ્ય વિઘ્નેશમગદદ્ધર્ષસંયુતઃ ।
યોગશાન્તિપ્રદાં દેહિ ભક્તિં તેઽતિતરાં પ્રભો ॥ ૪॥

તસ્ય તદ્વચનં શ્રુત્વા તં જગાદ ગજાનનઃ ।
મૌદ્ગલે નવમં ખણ્ડં પશ્ય યોગપ્રદાયકમ્ ॥ ૫॥

તેન યોગીન્દ્રવન્દ્યસ્ત્વં ભવિષ્યસિ મહામતે ।
ભક્તિર્મે ભવિતા તે તુ દૃઢા સમ્પૂર્ણભાવતઃ ॥ ૬॥

એવમુક્ત્વાંઽતર્દધેઽસૌ મયૂરેશો મહામતિમ્ ।
સઞ્જાગૃતોઽભવત્ સોઽપિ સ્મૃત્વા સ્વપ્નં સુવિસ્મિતઃ ॥ ૭॥

તતો મૌદ્ગલસંસ્થં સ ખણ્ડં યોગાત્મકં પરમ્ ।
પપાઠાઽલિખ્ય ભક્ત્યા સ નવમં નિત્યમાદરાત્ ॥ ૮॥

યોગગીતાર્થકં યોગમલભત્તત્પ્રસાદતઃ ।
તતોઽતિહર્ષસંયુક્તોઽભજત્તં નવધા પ્રભુમ્ ॥ ૯॥

ક્ષેત્રસંન્યાસસંયુક્તો નિત્યં ભક્તિસમન્વિતઃ ।
પપાઠ પાઠકૃત્ પૂર્ણં નવમં મૌદ્ગલે સ્થિતમ્ ॥ ૧૦॥

કદા દૈત્યેન્દ્રમુખ્યશ્ચ બહુધા સિન્ધુસંજ્ઞિતઃ ।
ક્ષેત્રમૂર્તિં ગણેશસ્ય ખણ્ડયામાસ સંસ્થિતામ્ ॥ ૧૧॥

સિન્ધોશ્ચ પ્રતિમાં તત્ર સ્થાપિતાં દૈત્યપૈઃ પુરા ।
પ્રહ્લાદો દુઃખસંસક્તોઽભવદ્ દૃષ્ટ્વા ચ શૌનક ॥ ૧૨॥

ક્ષેત્રવાસિજનાઃ સર્વે ત્યક્ત્વા ક્ષેત્રં મયૂરકમ્ ।
પ્રપેલુર્ભયસંયુક્તા યત્ર તત્ર સુદુઃખિનઃ ॥ ૧૩॥

પ્રહ્લાદો યોગિવન્દ્યઃ સ ક્ષેત્રસંન્યાસભક્તિતઃ ।
ઉપોષણપરો ભૂત્વાઽતિષ્ઠત્તત્રૈવ નિત્યદા ॥ ૧૪॥

માનસીમકરોત્તત્ર પૂજાં વિઘ્નેશ્વરસ્ય સઃ ।
તસ્યોચ્છિષ્ટં બુભોજૈવ મનસા ભક્તિસંયુતઃ ॥ ૧૫॥

દૃઢાઽઽગ્રહં તસ્ય દૃષ્ટ્વા મયૂરેશોઽમૃતં સદા ।
ભક્તતાલુસ્થં તુ કૃત્વા તોષયામાસ તેન તમ્ ॥ ૧૬॥

એવં બહૌ ગતે કાલે શિવપુત્રો બભૂવ હ ।
મયૂરેશોઽવધાર્યાય સિન્ધોર્દેવર્ષિભિસ્તુતઃ ॥ ૧૭॥

સ સમાગત્ય સિન્ધોશ્ચ ખણ્ડયામાસ મૂર્તિકામ્ ।
તત્રસ્થાં સ્વયમેવં તુ નિવાસમકરોત્ પ્રભુઃ ॥ ૧૮॥

દૃષ્ટ્વા તં પૂજયામાસ પ્રહ્લાદો યોગિનાં વરઃ ।
પારણં સ ચકારૈવ હર્ષનિર્ભરમાનસઃ ॥ ૧૯॥

પ્રત્યક્ષં ગણરાજસ્તં પ્રસન્નો વરદોઽભવત્ ।
સ વવ્રે સન્નિધાનસ્થો ભજામિ ત્વાં તથા કુરુ ॥ ૨૦॥

બ્રહ્મૈવ બ્રહ્મકલ્પાન્તે મયૂરેશશ્ચકાર તમ્ ।
અન્યં સન્નિધિવાસસ્થં ગણં બ્રહ્મપ્રિયાખ્યકમ્ ॥ ૨૧॥

અન્યચ્ચ શ૾ૃણુ વિપ્રેશ વિશ્વામિત્રો મહામુનિઃ ।
ચકાર મૌદ્ગલસ્યૈવ ભક્ત્યા પારાયણં પરમ્ ॥ ૨૨॥

સરઠસ્તત્ર વૃક્ષસ્થઃ શુશ્રાવાજ્ઞાનભાવતઃ ।
જ્વરયુક્તઃ કદાચિદ્વૈ નવમં ખણ્ડમુત્તમમ્ ॥ ૨૩॥

સદ્યો હિ જ્વરહીનઃ સ બભૂવે પુણ્યગૌરવાત્ ।
યથેષ્ટં વિષયાન્ ભુક્ત્વાંઽતે સ્વાનન્દગતોઽભવત્ ॥ ૨૪॥

ગણેશ્વરં તત્ર દૃષ્ટ્વા બ્રહ્મીભૂતો બભૂવ હ ।
એવં નાના જના બ્રહ્મ લેભિરે ખણ્ડસંશ્રવાત્ ॥ ૨૫॥

કતિ તેષુ બ્રવીમ્યેવ કેન વક્તું ન શક્યતે ।
ભુક્તિમુક્તિપ્રદશ્ચાયં ખણ્ડો નવમસંજ્ઞિતઃ ॥ ૨૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
નવમખણ્ડમાહાત્મ્યવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૯.૩૯

## ૯.૪૦ નવમખણ્ડમાહાત્મ્યવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
અયં તે કથિતઃ પૂર્ણઃ ખણ્ડો યોગાત્મકઃ પરઃ ।
નવમઃ સર્વદઃ સાક્ષાત્ પૂર્ણયોગપ્રદાયકઃ ॥ ૧॥

એકસ્ય શ્રવણેનૈવ ખણ્ડસ્યાસ્ય મહામતે ।
સમ્પૂર્ણં મુદ્ગલસ્થં યત્ ફલં પ્રાપ્નોતિ માનવઃ ॥ ૨॥

ન શક્યતે મયા વિપ્ર માહાત્મ્યં ખણ્ડસમ્ભવમ્ ।
યત્ર યોગપતિઃ પૂર્ણો વર્ણિતો ગણનાયકઃ ॥ ૩॥

ચતુર્વેદભવં પુણ્યં શ્રવણેન ભવિષ્યતિ ।
સાઙ્ગૈઃ સાધનકૈશ્ચાસ્ય ખણ્ડસ્યાત્ર ન સંશયઃ ॥ ૪॥

અષ્ટાદશ પુરાણાન્યુપપુરાણાનિ યસ્તથા ।
શ‍ૃણુયાત્ સ નરસ્તસ્માદનન્તં ત્વસ્ય સંશ્રવાત્ ॥ ૫॥

શબ્દબ્રહ્મમયાન્નાના શાસ્ત્રાણિ નિઃસૃતાનિ તુ ।
તેષાં શ્રવણતો જન્તુરસ્યાનન્તં ફલં લભેત્ ॥ ૬॥

તીર્થાનિ સકલાન્યેવ યઃ કુર્યાદ્વિધિસંયુતઃ ।
તેભ્યોઽનન્તગુણં પુણ્યમસ્ય શ્રવણતો લભેત્ ॥ ૭॥

ક્ષેત્રાણિ વિવિધાન્યેવ યઃ કુર્યાદ્ભક્તિસંયુતઃ ।
તેભ્યોઽસ્ય શ્રવણેનૈવ લભેતાસઙ્ખ્યકં ફલમ્ ॥ ૮॥

દાનાનિ વિવિધાન્યેવ યઃ કુર્યાન્ માનવોત્તમઃ ।
અસ્ય શ્રવણમાત્રેણાનન્તં તેભ્યઃ ફલં લભેત્ ॥ ૯॥

યજ્ઞાન્ કુર્યાચ્ચ સમ્પૂર્ણાન્ યથા શાસ્ત્રપ્રમાણતઃ ।
તેભ્યોઽનન્તં ફલં પ્રોક્તમસ્ય શ્રવણમાત્રતઃ ॥ ૧૦॥

ઇષ્ટાપૂર્તાદિકાન્યેવ નાના સત્કર્મકાનિ યઃ ।
પ્રકુર્યાત્ સ ફલં તેભ્યો નરોઽનન્તં લભેચ્છ્રવાત્ ॥ ૧૧॥

બહુનાઽત્ર કિમુક્તેન નાનેન સદૃશં ભવેત્ ।
સાધનં યોગખણ્ડેન યોગો યત્ર નિરૂપિતઃ ॥ ૧૨॥

સમ્પૂર્ણો યોગખણ્ડસ્તે કથિતો વ્યાસવર્ણિતઃ ।
અતઃ પરં ગમિષ્યામિ સ્વાશ્રમં ત્વાજ્ઞયા ચ તે ॥ ૧૩॥

સમ્પૂર્ણં મૌદ્ગલં તુભ્યં કથિતં સર્વસિદ્ધિદમ્ ।
અતઃ પરં પુરાણં ચ નાસ્તિ શૌનક તે નમઃ ॥ ૧૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
નવમખણ્ડમાહાત્મ્યવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૦
(Page ખં. ૯ અ. ૪૧ પાન ૯૧)

## ૯.૪૧ પુરાણસમાપ્તિવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનક ઉવાચ ।
પુરાણેષુ મહાભાગ સંશયૈર્વિવિધૈઃ પરૈઃ ।
પ્રાપ્તૈસ્તૈઃ સંયુતોઽહં ચ સંસ્થિતઃ ખેદસંયુતઃ ॥ ૧॥

અન્યસ્યૈવ પુરાણસ્ય સંશયાઃ શ્રવણેન મે ।
ગમિષ્યન્તિ મહાબુદ્ધે વિચાર્યૈવં સ્થિતોઽભવમ્ ॥ ૨॥

આન્ત્યં મૌદ્ગલકં શ્રુત્વા સંશયા મે ગતાઃ પુરા ।
નિઃસંશયઃ કૃતઃ સૂત ત્વયાઽહં નાત્ર સંશયઃ ॥ ૩॥

એકો મે સંશયશ્ચૈવ હૃદિ તિષ્ઠતિ તં નુદ ।
ગચ્છ પશ્ચાન્નિજં સ્થાનં ધન્યં માં કુરુ શાન્તિદ ॥ ૪॥

ગણેશસ્ય રહસ્યં યજ્જ્ઞાતં વ્યાસેન ધીમતા ।
સર્વાતિગં મૌદ્ગલસ્થં મહચ્ચિત્રં પરાત્પરમ્ ॥ ૫॥

તતો વ્યાસેન શાસ્ત્રં તત્ કૃતં ભારતકં પરમ્ ।
ધર્માધર્મવ્યવસ્થાનં બ્રહ્મસાયુજ્યદાયકમ્ ॥ ૬॥

તત્રાઽઽદૌ ગણનાથસ્ય પૂજનં સ્મરણં કૃતમ્ ।
પશ્ચાદ્ગણેશ્વરસ્યૈવ વર્ણનં ન કૃતં કિલ ॥ ૭॥

સમ્પૂર્ણે ભારતે જાતે કૃતકૃત્યો મહામુનિઃ ।
અભવન્નાત્ર સન્દેહઃ કિમિદં કૌતુકં વદ ॥ ૮॥

શૌનકસ્ય વચઃ શ્રુત્વા સૂતઃ સસ્માર તં ગુરુમ્ ।
તત્ક્ષણાત્તત્ર યોગીશોઽભવત્ વ્યાસઃ સમાગતઃ ॥ ૯॥

તં દૃષ્ટ્વા હર્ષસંયુક્તાઃ સૂતશૌનકમુખ્યકાઃ ।
ઉત્થાયાઽઽપૂજ્ય તે નેમુઃ સ્થાપ્ય પ્રાઞ્જલયોઽભવન્ ॥ ૧૦॥

તતઃ સમીપે સંસ્થાપ્ય જગાદ મુનિસત્તમઃ ।
વ્યાસઃ શૌનકમુખ્યાંસ્તુ જ્ઞાત્વા સૂતપ્રયોજનમ્ ॥ ૧૧॥

વ્યાસ ઉવાચ ।
મયા શાસ્ત્રં કૃતં વિપ્ર ભારતં નાત્ર સંશયઃ ।
તત્રાયં બુદ્ધિગઃ સાક્ષાદ્વર્ણિતો બ્રહ્મસંજ્ઞિતઃ ॥ ૧૨॥

સિદ્ધિદો બ્રહ્મરૂપોઽયં મુખ્યં તદેવ સમ્મતમ્ ।
વિકુણ્ઠાદય એવં વૈ નાશયુક્તાઃ પ્રકીર્તિતાઃ ॥ ૧૩॥

સિદ્ધિબુદ્ધિવરેણૈવ મોહિતોઽહં ન સંશયઃ ।
ગણેશં સર્વભાવેન વર્ણિતું વિસ્મૃતોઽભવમ્ ॥ ૧૪॥

અન્યં ગ્રન્થં તતઃ કર્તુમુદ્યતો હ્યભવં મુને ।
તત્રાઽઽકાશભવા વાણી મામુવાચ શ◌ૃણુષ્વ તત્ ॥ ૧૫॥

ગણેશવર્ણનં પૂર્ણં પ્રશસ્તં મા કુરુષ્વ વૈ ।
મોહનાર્થં ગણેશેન જનાનાં રચિતં ત્વિદમ્ ॥ ૧૬॥

મુદ્ગલં મુનિમુખ્યં ચ ત્યક્ત્વા સર્વે મુનીન્દ્રકાઃ ।
સ્પષ્ટં ગણપતે રૂપં વર્ણિતું ન ક્ષમાઃ કદા ॥ ૧૭॥

શ્રુત્વાઽહં તાં નમસ્કૃત્ય સંસ્થિતો મૌદ્ગલે રતઃ ।
અતઃ સંશયહીનસ્ત્વં મૌદ્ગલં ભજ ભક્તિતઃ ॥ ૧૮॥

પુરાણેષુ ગણેશસ્ય સ્વરૂપં વર્ણિતં પરમ્ ।
બ્રહ્મણસ્પતિબોધસ્ય દાયકં નાત્ર સંશયઃ ॥ ૧૯॥

તથાપિ મોહિતાઃ સર્વે વિપ્રાદ્યા ન ગજાનનમ્ ।

જાનન્તિ તાદૃશં તેષુ સિદ્ધિબુદ્ધિવરેણ તે ॥ ૨૦॥

ગણેશવરદાનેન ભક્ત્યૈ મૌદ્ગલકં પરમ્ ।
દૃષ્ટ્વા ગણેશ્વરં પૂર્ણં જ્ઞાસ્યન્તે નાન્યથા ક્વચિત્ ॥ ૨૧॥

અતો મૌદ્ગલમેકં ત્વં ભજ વૈ નિત્યમાદરાત્ ।
કલિદોષેણ હીનઃ સન્ સર્વં ચ લભસે પરમ્ ॥ ૨૨॥

એવમુક્ત્વા મહાયોગી વ્યાસસ્તત્ર મહામતિઃ ।
વિરરામ ચ તત્રૈવ ધૂમ્રવર્ણઃ સમાયયૌ ॥ ૨૩॥

તં દૃષ્ટ્વોત્થાય નેમુસ્તે ગણેશં ભક્તિસંયુતાઃ ।
સમ્પૂજ્ય તુષ્ટુવુસ્તે વૈ ગાણેશૈર્ગણપપ્રિયૈઃ ॥ ૨૪॥

ધૂમ્રવર્ણઃ સઞ્જગાદ તુષ્ટસ્તાન્ હાસ્યસંયુતઃ ।
સ્વભક્તાન્ ગણનાથસ્તુ વચનં સુખદાયકમ્ ॥ ૨૫॥

ધૂમ્રવર્ણ ઉવાચ ।
કલેઃ પરાક્રમઃ સર્વો મયા સમ્પૂર્ણભાવતઃ ।
ખણ્ડિતો મુનિમુખ્યાશ્ચાઽધુના ચરત નિર્ભયાઃ ॥ ૨૬॥

એવમુક્ત્વા ગણાધીશસ્તાન્ ગૃહ્ય ધરણીતલે ।
સ્થાપયામાસ ધર્મેણ યુક્તાંશ્ચક્રે સ માનવાન્ ॥ ૨૭॥

જગાદ મુનિમુખ્યાંસ્તાન્ મૌદ્ગલં મે રહસ્યદમ્ ।
જપધ્વં નિત્યમાનન્દાત્તેનાઽહં વશગો ભવે ॥ ૨૮॥

નાનેન સદૃશં કિઞ્ચિત્ પ્રિયં ચોપનિષત્ પરમ્ ।
યત્રાઽહં પઞ્ચધા સંસ્થો યોગાકારસ્વરૂપધૃક્ ॥ ૨૯॥

પઞ્ચધા મે સ્વરૂપં તુ મૌદ્ગલેન પ્રકાશ્યતે ।
શ્રવણેન પુરાણસ્ય પઠનેન તદર્થતઃ ॥ ૩૦॥

મૌદ્ગલં યત્ર વિપ્રેશાઃ પઠ્યતે શ્રૂયતે જનૈઃ ।
તત્રાહં સંસ્થિતઃ સર્વૈર્ભક્તિગ્રહણલોલુપઃ ॥ ૩૧॥

બ્રાહ્મે બુદ્ધિસ્થિતં રૂપં વર્ણિતં મે તદંશતઃ ।
તત્રાઽહં સંસ્થિતશ્ચૈવ નિર્ગુણાકૃતિલક્ષણઃ ॥ ૩૨॥

બ્રહ્માણ્ડે પ્રણવાકારો નાનાખેલસમન્વિતઃ ।
વિશ્વાકારપ્રભાવેણાંઽશેન તત્ર સ્થિતો મુદા ॥ ૩૩॥

ગાણેશે મૂર્તિગોઽહં તુ તયોર્જ્ઞાનપ્રકાશકઃ ।
ગજવક્ત્રાદિચિહ્નૈઃ સંયુક્તસ્તિષ્ઠામિ સર્વદા ॥ ૩૪॥

અન્યેષુ ચ પુરાણેષુ શિવવિષ્ણ્વાદિરૂપધૃક્ ।
સંસ્થિતસ્તત્કલાંશેન નાનાભેદવિહારતઃ ॥ ૩૫॥

મૌદ્ગલે યોગરૂપોઽહં તિષ્ઠામ્યુપનિષદ્ગતઃ ।
સર્વેષાં મે સ્વરૂપાણાં યોગસ્તત્ર પ્રકીર્તિતઃ ॥ ૩૬॥

તેષાં પ્રકાશકં પૂર્ણં તથા યોગપ્રકાશકમ્ ।
મૌદ્ગલં મે પ્રિયં તસ્માત્તત્ સમં નૈવ વિદ્યતે ॥ ૩૭॥

ભક્ત્યા સમ્પ્રાર્થિતોઽહં તુ સૃષ્ટ્યાઽઽદૌ મુનિસત્તમાઃ ।
તદા મયા વરો દત્તો ભક્ત્યૈ ભક્તિવિવર્ધનઃ ॥ ૩૮॥

તદર્થં મૌદ્ગલં પૂર્ણં રચિતં ચ મયા પુરા ।
મુદ્ગલસ્ય હૃદિ ક્ષિપ્તં સર્વસૌખ્યપ્રદાયકમ્ ॥ ૩૯॥

મયાઽસૌ પ્રેરિતો યોગી પરં દક્ષાય મૌદ્ગલમ્ ।
કથયામાસ સમ્પૂર્ણં પુરાણં મે મુદાકૃતી ॥ ૪૦॥

તતઃ શિવાદિભિર્દેવૈર્મરીચ્યાદિમહર્ષિભિઃ ।
શેષાદિભિર્નરૈઃ સર્વૈઃ સેવ્યતે મે પુરાણકમ્ ॥ ૪૧॥

ન મૌદ્ગલં વિના વિપ્રાઃ સ્વરૂપં મે યથાર્થતઃ ।
જ્ઞાયતે કેનચિત્ ક્વાપિ પૂર્ણં સર્વપ્રકાશકમ્ ॥ ૪૨॥

અન્યત્ર મે સ્વરૂપં તુ વર્ણિતં પૂર્ણભાવતઃ ।
તત્ર મોહો ભવેન્નૂનં સિદ્ધિબુદ્ધિકૃતઃ પરઃ ॥ ૪૩॥

સૃષ્ટ્યાઽઽદૌ સિદ્ધિબુદ્ધિભ્યાં પ્રાર્થિતોઽહં વિશેષતઃ ।
જગતાં મોહનાર્થં ચ બ્રહ્મણાં ખેલકારણાત્ ॥ ૪૪॥

તદા મયા વરો દત્તો મૌદ્ગલં ત્યજ્ય માં કદા ।
જ્ઞાસ્યન્તિ ન ચ વિશ્વાનિ તેષુ બ્રહ્માણિ સંસ્થિતમ્ ॥ ૪૫॥

અતો માં મૌદ્ગલે સંસ્થં ભજધ્વં ત્વેકચેતસઃ ।
તેન મે ભક્તિસંયુક્તાશ્ચરિષ્યથ નિરન્તરમ્ ॥ ૪૬॥

નાનેન સદૃશં કિઞ્ચિન્ મત્પ્રાપ્તૌ સાધનં પરમ્ ।

સર્વસિદ્ધ્યર્થમેવં તુ જ્ઞાતવ્યં દ્વિજસત્તમાઃ ॥ ૪૭॥

અસ્ય શ્રવણમાત્રેણ કૃતકૃત્યો નરો ભવેત્ ।
ન શક્યતે ફલં વક્તુમપારત્વાન્ મયા કદા ॥ ૪૮॥

મૌદ્ગલશ્રવણેનૈવ સન્તુષ્ટોઽહં મહર્ષયઃ ।
દાસ્યામિ સકલાભીષ્ટં વૃણુધ્વં નિર્વિશઙ્કયા ॥ ૪૯॥

શૌનકાદ્યા ઊચુઃ ।
ભક્તિં દેહિ ત્વદીયાં નૌ યોગં શાન્તિપ્રદાયકમ્ ।
યદ્યદિચ્છામહે નાથ તત્તત્ સિદ્ધ્યતુ સર્વદા ॥ ૫૦॥

ગાણપત્યાંશ્ચ નઃ સર્વાન્ કુરુ ત્વં સર્વદા પરાન્ ।
ઇમાન્ વરાન્ ગુણાધ્યક્ષ પ્રાર્થિતાન્ દેવ દેહિ નઃ ॥ ૫૧॥

તથેતિ તાનથોક્ત્વાઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
વ્યાસાદીંશ્ચ જગાદાઽસૌ વૃણુધ્વં વાઞ્છિતાન્ વરાન્ ॥ ૫૨॥

તૈસ્તથૈવ ગણાધ્યક્ષઃ પ્રાર્થિતો ગણપપ્રિયૈઃ ।
તથેતિ તાનથોક્ત્વા ચ સૂતમૂચે ચ વિઘ્નપઃ ॥ ૫૩॥

વરાન્ બ્રૂહિ મહાભાગ ત્વયા સંશ્રાવિતં પરમ્ ।
દ્વિજેભ્યસ્તેન સન્તુષ્ટો દાસ્યામિ સ તથાઽબ્રવીત્ ॥ ૫૪॥

તથેતિ તમથોક્ત્વાઽસૌ ધૂમ્રવર્ણો ગજાનનઃ ।
અન્તર્ધાય સ્વમાત્માનં સ્વાનન્દસ્થો બભૂવ હ ॥ ૫૫॥

સર્વે સન્તુષ્ટચિત્તાસ્તે સ્વં સ્વં સ્થાનં યયુસ્તતઃ ।
મૌદ્ગલં તત્ સમાશ્રિત્ય ગણેશમભજન્ પરમ્ ॥ ૫૬॥

ઇમાં મુદ્ગલજાં શ્લોકૈઃ સંહિતાં વેદબૃંહિતામ્ ।
ત્રયોવિંશતિસાહસ્રૈઃ સાર્ધૈકશતસંયુતૈઃ ॥ ૫૭॥

અષ્ટાવિંશત્યધિકૈશ્ચ અધ્યાયૈશ્ચ ચતુઃ શતૈઃ ।
ખણ્ડૈશ્ચ નવભિઃ પૂર્ણાં સર્વસિદ્ધિમયીઞ્ચિતામ્ ॥ ૫૮॥

મુદ્ગલઃ કથયામાસ સર્વેષાં હિતકારણાત્ ।
શબ્દબ્રહ્મરહસ્યાખ્યાં સાક્ષાદ્બ્રહ્મપ્રદાયિનીમ્ ॥ ૫૯॥

(Page ખં. ૯ અ. ૪૧ પાન ૯૩)

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
નવમે ખણ્ડે યોગચરિતે યોગામૃતાર્થશાસ્ત્રે દક્ષમુદ્ગલસંવાદે
પુરાણસમાપ્તિવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૯.૪૧
॥ શ્રીગજાનનાર્પણમસ્તુ ॥

॥ શ્રીવક્રતુણ્ડાદ્યષ્ટમૂર્તિધરઃ ગણેશઃ પ્રસન્નો વરદો ભવતુ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે નવમઃ ખણ્ડઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણં સમાપ્તમ્ ॥

Proofread by Yash Khasbage

*MudgalapurAna Khanda 9 Yogacharitam*
pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*